This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

पं. द. ९०
११८

॥श्री वेदांतपरिभाषाटिप्पणस्येदंपुस्तकं॥

Checked 2012

Acc. NO. ~~312~~ M-1675
Title - वेदान्तपरिभाषा टिप्पण.
(वेदान्त शिखा मणि)
Author - रामकृष्णाध्वरींद्र.
Date - ?
Sub - वेदान्त.
folio - 125
Xerox - 251

KKSU LIBRARY
RAMTEK
441 106
M-1675
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे·प·टी·
१

श्रीगणेशाय नमः॥ ॥नैदाघभानुकिरणेष्विव वारिपूरः सर्वो विभाति यदबोधवशात्प्रपंचः॥ना
लाप[illegible]वचा निमीलति यत्प्रबोधात्तद्ब्रह्म नौमि सुखमद्वयमात्मरूपं॥१॥ आसेतोराहिमेरोरपि [illegible] भु
वि विदितानधर्मराजाध्वरीन्द्रान्वंदेहं तर्कचूडामणिगुणिजननक्षीरधीस्तातपादान्॥ यत्कारुण्यान्म
याप्यधिगतमधिकं दुर्ग्रहं सूक्ष्मधीकैरप्यात्तं शास्त्रजातं जगति [illegible] स्वकृता रामकृष्णाद्ध
येत॥२॥ वेदांतपरिभाषाख्यो सोऽहं तातविनिर्मितं॥ व्याकरोमि ध्वतिं सर्वं स्पष्टयंतार्थप्रकाशिका ३ प्रे
क्षावत्प्रवृत्त्यर्थं विषयप्रयोजने निर्दिशन्निर्विघ्नपरिसमाप्त्यर्थं मंगलमाचरन्ति शिष्यशिक्षायै
ग्रंथतो निबध्नाति। यदविद्येति। तं परमात्मानं नौमीति संबंधः। जीवाभिन्नं ब्रह्म शास्त्रप्रमेयमिति
सूचयितुमात्मशब्दः। नन्वेवं तस्यैवं [illegible] ज्ञत्वलक्षणोपकर्षाभावान्नमस्कर्तृनमस्कार्यताऽनुपपत्ति
रित्याशंक्य कल्पितभेदमादायाविद्याप्रतिबिंबकत्वादिविशिष्टं नमस्कर्तृत्वं तद्व्यावृत्तं सर्वज्ञत्वा
दिविशिष्टं उत्कृष्टरूपं नमस्कार्यमित्यभिप्रेत्याह परमेति। ननु ब्रह्मणो लक्षणप्रमाणाभावेन त
स्यैवासिद्धेः कथं जीवब्रह्माभेदः शास्त्रार्थ इति चेन्न तावत्समासाभावः भूतभौतिकोत्पत्तेरवत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च

अप्रमाणत्वात्। तथा हि विवादविषयो भूतानि भौतिकानि स्वोपादानगोचरापरोक्षज्ञानवत्कर्तृकानि णी
कार्यत्वात् घटवत्। न च परिदृश्यमानपृथिव्यादौ प्रत्यक्षेण कार्यत्वसिद्धावप्यतीन्द्रिये तदसिद्धेर्भाग
सिद्धो हेतुरिति वाच्यं। न चापि पृथिवीत्वादिना कार्यत्वकल्पनात्। न चाप्रयोजकत्वं लाघवानुगृहीतेन
अप्रत्यक्षेण घटादौ कार्यत्वेनैव कर्तृजन्यत्वावगमात्। अत एव तेनानादिचित्तकर्तृसिद्धावर्थान्तरत्वा ना४
घवादेकस्यैव कर्तुः सर्वज्ञस्य सकर्तृकत्वानुमितौ विषयत्वात्। न तस्मादनुमानेन जगन्निर्मातरि सर्वेश्व
रे प्रमाणं। तथा यतो वा इमानि भूतानि जायंते। यः सर्वज्ञः सर्ववित्। यस्य ज्ञानमयं तपः। तस्मादेतद्ब्र
ह्म नामरूपमन्नं च जायते इत्यादिश्रुतिश्च सर्वेश्वरे प्रमाणं। नापि लक्षणाभावः। नामरूपस्थि
केनर्तृत्वस्य नामरूपात्मकप्रपंचाध्यासाधिष्ठानत्वस्य तदाकारेण परिणममानमायाधिष्ठानत्व
स्य वा ब्रह्मलक्षणत्वात्। तदेतदाह। यद्विद्याविलासेनेति। यस्या विद्याया यद्विद्यापष्ठ्यर्थस्तु संबंध
मात्रे। शेषषष्ठी संबंधसामान्ये षष्ठीस्मरणात्। न हि शेषत्वाभक्त्वर्थात्। अन्यथा निर्विशेषसामान्य स्य
वहाराऽनुपपत्तेः। स च विवरणाचार्यमते आश्रयाश्रयीभावः। आचार्यवाचस्पतिमते विषयविषयी

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे०प०टी०
२

भावः। यद्वा यस्येति कर्मणि षष्ठी तच्चापि तद्विधानात् शंकरभगवत्पादैरपि ब्रह्मजिज्ञासेत्यत्र ब्रह्मण इ-
ति कर्मणि षष्ठीत्यभिधानात् तद्विषयत्वं चोभयसाधारणं। अविद्या नामाविद्यानिवर्त्यः निर्वचनीयोऽना-
दिर्भावरूपेति वक्ष्यते तेन ह्विलास अतज्ज्ञाननिवर्त्यत्वविशेषः। परमेश्वरस्येक्षणसंकल्प्यच[illegible]यत्वरूपः
। तदैक्षत सोऽकामयत तत्तन्मनोऽकुरुतेतिश्रुतिसिद्धः। तेन सहकारिणा भूतानि पंचसूक्ष्माण्यपं-
चीकृतानि विषयदशीनि भौतिकानि च तदुपादानानि पंचीकृतानि परिदृश्यमानपृथिव्यादीनि तेषां
सृष्टयो भवंतीत्यध्याहारः। अत्र भूतभौतिकग्रहणं नामरूपमात्रोपलक्षणार्थं सृष्टिग्रहणं च स्थि-
तिप्रलयोपलक्षणार्थं। अन्यथा शब्दप्रपंचस्य स्थितिप्रलययोश्चाग्रहणे ब्रह्मणोऽद्वितीयत्वा-
च ४ सिद्धिप्रसंगः। एवं प्रमाणेन तटस्थलक्षणं प्रदर्श्य स्वरूपलक्षणमाह। सदिति। यद्यपि सत्यादिप्रत्ये-
कं लक्षणं तथापि प्रयोजनसत्त्वनार्थमानंदग्रहणं। नचैवं चित्सदंशयोर्थ्ये आनंदस्य पुरुषार्थत्वापत्त-
दुपपादनात्। ज्ञायमानानंदस्यैव पुरुषार्थत्वात्। न चाहंज्ञानाभिन्नसुखी सादिप्रत्यक्षविरोधादानंदस्य ब्र-
ह्मणः इति श्रुतिविरोधाच्च न ज्ञानादिरूपं ब्रह्मेति वाच्यं सत्यं विज्ञानमानंदं ब्रह्म आनंदो ब्रह्मेत्यादिश्रुतेः एम० २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मणः सन्निहितत्वेनेहात्मकृतावगमेन राहोः शिर इत्यात्मनश्चैतन्यमिति भेदश्रुतिप्रत्यक्षयोरुपचरितार्थ
त्वात्। यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति ज्ञानबालोपनि
षद्वचनात् गुरुनमस्कारः कर्तव्य इति न केवलं समधिगतः तत्र परमगुरुत्वमेकस्य साक्षाद्विद्यागुरुत्वं चापि नच
णमति। श्रीमच्छंकर वन्द्याख्यानमिति। चिकीर्षितस्य ग्रंथस्योपादेयतासिद्धये स्वकीर्त्यै च तत्र ये च तत्वस्य
ज्ञानाविधिग्रंथकर्तृत्वसत्तामाह येनेति। ननु मोक्षसाधनब्रह्मज्ञानस्य शारीरकमीमांसाश्रवणसाध्य
त्वेन तत्रैव प्रेक्षावतां प्रवृत्त्युपपत्तेः नैतद्ग्रंथारंभस्य शंका मेधाविनामतिविततगहनगंभीरसूत्रभा
ष्यादिषु मन्दानामेव प्रवृत्तिसंभवेपि मंदधियां तत्र प्रवृत्त्यनुपपत्तेः न हि तद्ग्रहार्थमेतद्ग्रंथारंभस्साह तेनेति
। तेन धर्मराजाध्वरीन्द्रेण बोधाय ब्रह्मत्वबोधाय स एव कुतरस्य तन्त्र्याह। वेदान्तार्थीव॰ यद्यपि प्रमाण
। मालादौ संक्षेपतो वेदान्तार्थनिरूपणात्तेनापि मंदानुग्रहः तथापि न सर्वस्य वेदान्तशास्त्रार्थस्य प्रतिपाद
नं तत्रेति ध्येयं। स्वकीयग्रंथस्य निःप्रपञ्चप्रयोजनवच्छारीरकमीमांसापांसंगतिं दर्शयितुं करिष्यमाण
प्रमाणनिरूपणस्य परंपरया निःश्रेयसोपयोगं दर्शयन् शास्त्रस्य प्रथमं तत्साधनं तो साधयति इहेत्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे०प०टी०
३

न॥ स चेत्यत्र वेदांतविचारसाध्य इत्यध्याहारः। तथा च वेदांतविचारसाध्याद्ब्रह्मज्ञानान्मोक्षः संभव
तीति प्रथमः संबंधः मोक्षस्य विचारफलत्वे हेतुमाह। पुरुषार्थ इति। पुरुषेण वेदांतश्रवणाधिकारि
णाऽर्थ्यमान इत्यर्थः। तथा च काम्यमानानिषिद्धाधिकारिविशेषणकत्वान्मोक्षस्य तत्फलतेति भावः।
अत्रैव कामनायां विनिगमकमाह। परमेति। नित्येत्यर्थः परमत्वं वियदादेरपि नित्यत्वात्सिद्धांते जीवा
विद्यादेरनादित्वान्मोक्ष एवैतस्यैवकारेण तद्व्यवच्छेद्यशंकां निराकर्तुं धर्मार्थकाममोक्षेषु रस्युकेन
२ नु मोक्षस्य विचारफलत्ववन्नित्यत्वमपि संदिग्धमित्याशंक्य तन्नित्यत्वस्य लोके प्रसिद्धत्वात् इ
त्याह इहेत्यादिवति। न च तस्य सिद्धिरपि देहात्मवादिप्रसिद्धेवत्रिमनुत्वाहित्याह न स पुनरिति। मुक्तो
न पुनः संसारी भवतीत्यर्थः। ननु काम्यमानत्वं धर्मादीनामप्यविशिष्टं न च नित्यत्वात्तत्तो विर
क्तिरेवास्येति वाच्यं। तेषामपि पुरुषार्थत्वाविशेषेण नित्यत्वानुमानादित्याशंक्याव न्ते नोष्ध्यानुमा
नवद्बाधितविषयत्वमित्याह। इतरेषामिति त्रयाणां मध्ये द्वयोरर्थकामयोः प्रत्यक्षेणानित्यत्वाव
गमादित्यर्थः। अन्यथा धर्मस्यातींद्रियत्वेन त्रयाणां प्रत्यक्षेणानित्यत्वावगमासिद्धेरनुपपत्तेः।प राम०
३

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मू

द्वा प्रत्यक्षेण प्रत्यक्षादिप्रसिद्धेन कार्यत्वेन लिंगेन समर्थः। तथा च कार्यत्वलिंगकानित्यत्वानुमानबा
धितत्वात्प्रमाणं नित्यत्वानुमानमिति भावः। नन्वनुमानयोः समबलत्वान्नित्यत्वबाधस्याशंका प्र
निर्बलत्वात्सबलं नित्यत्वानुमानमिति॥ आह। तद्यथेति। इहास्मिन् धर्माधर्मात्मककर्मनिर्मितो
लोक्यत इति लोकः घटादिर्यथा क्षीयते तथा लोकांतरेष्वपि निर्मितो लोकः स्वर्गादिर्नश्यतीत्य
र्थः। नन्वपाम सोममममृता अभूम अगन्म ज्योतिरविदाम देवान्। अक्षय्यं ह वै चातुर्मास्ययाजि
नः सुकृतं भवतीत्यादिश्रुत्या स्वर्गादेरपि नित्यत्वमवगम्यत इति चेन्न। यत्कृतकं तदनित्यमिति
सामान्यतो दृष्टानुमानानुगृहीतेन तद्यथेत्यादिश्रुतिविरोधेन अक्षय्यमित्यादिश्रुतेः प्रलयपर्यं
तस्थायिफलाभिप्रायत्वात्। नन्वस्तु वेदांतविचारस्य ब्रह्मज्ञानद्वारा निःश्रेयसहेतुत्वं तथापि
प्रमाणनिरूपणस्य तदुपयोगाभावान्न शास्त्रसंगतिरित्याशंक्याह यतः शास्त्रं च निर्बाधं ब्रह्म तत्स्म
याज्ञेनं च मोक्षसाधनब्रह्मज्ञानं च प्रमाणाधीनमतः परंपरया निःश्रेयसोपयोगीति प्रमाणनि
रूपणं शास्त्रसंगतमित्यभिप्रायेण तन्निरूपणम्। शिष्यावधानाय प्रतिजानीते इति ब्रह्मेति। नहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे०प०टी०
४

तत्प्रमाणनिरूपणमेव तदुपयोगित्वाच्छास्त्रसंगतं स्यादित्याशंक्य प्रमाणनिरूपणस्य प्रमाणसामान्य
लक्षणप्रमाणोपयत्नादिसापेक्षत्वात्तन्निरूपणमपि तत्परिकरत्वाच्छास्त्रसंगतमित्याह। सप्रपंचमिति
न च सप्रपंचं तत्प्रमाणनिरूपणस्यैव प्रतिज्ञातत्वे सति विषयप्रयोजनयोरन्तरनिरूपणमसंगतं
स्यात्तयोरप्रतिज्ञातत्वादिति वाच्यं कृतस्य प्रमाणनिरूपणस्य शास्त्रविषयप्रयोजनोपयोगेन शेषि
णेष्वासंगिकतन्निरूपणसंभवात्। अत एव चिंतामणौ प्रमाणतत्त्वप्रतिज्ञायामपि मोक्षप्रयादिनि
रूपणं। यद्वा सप्रपंचेत्यत्रत्रितयविशेषणं तथा च जगदुपादानत्वसच्चिदानन्दात्मकत्वजीवाभिन्न
त्वलक्षणपरिकरोपेतं ब्रह्म तज्ज्ञानं च वेदान्तजन्यत्वप्रकाशकर्मनिरपेक्षमोक्षसाधनत्वादिलक्ष
णप्रपंचोपलक्षितं तत्प्रमाणमपि प्रमाणान्तरागृहीतसिद्धफलविषयापरोक्षज्ञानजनकवेदान्त
त्वादिरूपपरिकरोपेतं निरूप्यत इत्यर्थः। यद्यपि प्रपंचशब्दो निर्गुणत्वजीवाभेदस्वप्रकाशत्वसिद्ध
बोधिवेदान्तत्वादीनामेव परिकरत्वेन निर्देशः सगुणत्वजीवभेदपरप्रकाश्यत्वचक्षुरनुमानादीना
म प्रतिज्ञापत्तिः। तथापि धर्माभासं चेत्संवेदनादित्युनिराकर्तव्यतया परिकरत्वोपपत्तिरिति द्रष्टव्यम्। एवं

राम०
४

8

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रमाणनिरूपणं प्रतिज्ञापयंल्लक्षणमाह तेनेति। प्रमाणेनिरूपणीयेस्त्यर्थः। असाधारणकारण
त्वं सव्यापारवत्त्वे करणत्वं तेन न लिंगपरामर्शे हेतौ प्रवृत्तिमित्यसाधारणकारणे सव्यापारे च मनसि नाति
प्रसंगः। न तु विषये ऽतिव्याप्तिः तस्येन्द्रियसन्निकर्षद्वारा प्रत्यक्षप्रमां साधारणकारणत्वादिति चे
न तावद्विषयः प्रत्यक्षप्रमायां हेतुः तदभावेपि भ्रमप्रत्यक्षोदयात्। न च प्रत्यक्षप्रमायामेकदात्व
स्वतत्राकारत्वयोरभ्युपगमात्। नापि बाह्यप्रत्यक्षप्रमितौ तत्त्वाहि प्रत्यक्षस्थलेकू प्रत्यक्षर
स्थलेकूल्य स्वप्रमासामान्येयत्तदुपपत्तेः। प्रमालक्षणमाह। प्रमाकरणाकरणत्वाव गम्याय प्रमा
यांनिरूपणायामित्यर्थः। न चास्य लक्षणस्य स्मृतौ नातिव्याप्तिरलक्ष्यत्वादित्याह। स्मृतीति। ज्ञान
नुस्मतेरविसंवादिप्रवृत्तिजनकत्वात्तेषां तत्प्रमाणलक्षणकथनमयुक्तमिति चेन्न हि प्रत्य
स्यं प्रमाणमिह निरूपणीयं येनाव्याप्तिः स्यात्। यद्वा एतत्तरप्रयोजनाय प्रमात्वस्याभिधानात्। स्मृतावति
व्याप्तिवारणायानधिगतेति विषयविशेषणं। अनिर्वचनीयविषयभ्रमे ऽतिव्याप्तिवारणार्थं मत्तम
बाधितेति। ज्ञानपदं तुस्वरूपकथनार्थं। इच्छादिनिसंस्काराणामनधिगतपदेनैव वारणात्। यदा चक्षे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
५

रादौ नामपि फलद्वारा घटादिविषयत्वाभ्युपगमात् ज्ञानिव्याप्तिवारणार्थं सकर्मज्ञानेति। ज्ञप्तिरूपभा
वव्यस्याविवक्षितत्वेनातत्कारणेन ज्ञानिव्याप्तिः एतावपि यद्यपि धामारणव्यवहारः नहानत्वा
धारणालक्षणमाह। एतनीति। इच्छादावतिव्याप्तिवारणाय ज्ञानत्वमित्युक्तं। नन्वेकस्मिन् घटे घ
त्वप्रकारकत्वाद्यनिरंतरानेकज्ञानानि च नघंतेन च व्यक्तीपादिज्ञानादिषु विषयोलता थैवप्रथमलक्ष
णस्याव्याप्तिरित्यतआह॥ नीरूपस्येति। ननु नीरूपस्य कालस्य कथं चाक्षुषत्वं द्रव्यचाक्षुषं प्रति
यो महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य तंत्रत्वाहिति चेन्न एतानी घटो वर्त्तते इति प्रतीतेः नी
रूपस्यापि तस्य चाक्षुषत्वात्। अन्यथा चक्षुरवगतेपि घटे वर्त्तमानतासंदेहापत्तेः न चोत्प्र
त्त्वयोजकाभावेन तत्प्रतीतिरेवासिद्धेति वाच्यं। अनन्यथासिद्धप्रतीतिबलेन तस्य कालस्य प्रति
रूपद्रव्यचाक्षुषत्वाप्रयोजकत्वकल्पनात्। अन्यथा प्रयोजकानुसारेण प्रतीतिकल्पने नीरूप
स्याचाक्षुषत्वापत्तेः। नन्वेवमपि निरंतरोत्पन्नघटादिज्ञानसक्षे अव्याप्तिस्तदवस्थैव। तस्य तत्क्षण
न्तत्तत्संबंधांशे ज्ञानावगाहित्वेपि घटांशेन तदभावादिति चेन्नइष्टापत्तेः अत एव न शाब्दप्रमायाः प राम०
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रार्थांशे प्रमात्वानवच्छिन्नीयादिज्ञानस्य घटांशे प्रामाण्याभावेपत्तेकत्वानुपपत्तिः स्मृतिवद्बाधित
विषयत्वेन तदुपपत्तेः अत एवेदानीमहं सुखीत्यादिधारावाहिकत्वबुद्धेर्नाव्याप्तिः तस्याः पूर्वपूर्वज्ञा
नविषयक्षणविशेषवि षयत्वात्। नन्वेवमनुमित्यादेः क्षणास्फुरणं स्यात् इदानीं पर्वतो वह्निमा
न् इदानीं गौरयं तनं स्पृष्टा इदानीं महीयोगौरेनं त्सदृशी इदानीमनुमन्ये कल्पयामीति सर्वज्ञाने
षु कालस्यानुभूयमानत्वादिति चेत् किमनुमितौ पक्षविशेषणतया कालभानं साध्यविशेषण
तया वा नाद्यः सन्निकृष्टपर्वते ज्ञायमानानुमितेस्तदंशे प्रत्यक्षतयात तद्भानस्येष्टत्वात्। असन्नि
कृष्टे च तस्मिन् तत्प्रतीतेरेवासिद्धेः न द्वितीयः अनुमितेः साध्यांशे व्यापकतावच्छेदकमात्रप्रका
रत्वेन तत्र कालप्रकारत्वायोगात्। अन्यथानुमित्यनंतरं वह्नौ द्विहस्तत्वचिह्नत्वप्रकारकसंश
याभावप्रसंगात् तत्कालीनवह्निसिध्यर्थं धूमकालस्य पक्षतावच्छेदकत्वादिप्रयासानुपपत्तेश्च
अत एव न शाब्दज्ञानादावपि कालोल्लेखः दशमस्त्वमसि तत्त्वमसीत्यादिवत्सन्निकृष्टपदार्थांशे
शाब्दजन्यस्यापि ज्ञानस्य तत्र प्रत्यक्षतया कालस्फुरणस्येष्टत्वात् असन्निकृष्टे च तस्मिन् वाक्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
६

र्थभिन्नस्यकालस्यनायोगात् नाप्यनुमितौतत्स्फुरणंसन्निकृष्टेनविकालस्येष्टत्वाद्व्यवहितेचतस्मिन्नु
पमितेः कालविषयत्वेनदर्शनान्तरंमदीयागौरिदानीमिहैववर्ततेनवेतिसंदेहानुपपत्तेः। अतएवनार्थाप
त्तौस्फुरणस्फुरणशंकावकाशः तस्याअनुमितिसमानयोगक्षेमत्वेनकल्पनीयरात्रिभोजनांशेउ
पपादकतावच्छेदकमात्रप्रकारकतयाकालविशेषकत्वायोगात्तदेतदाह। कालस्येन्द्रियेति। प्रत्य
क्षप्रमाणजन्यानुभवविषयत्वाभ्युपगमादित्यर्थः। नन्वेवंशाब्दधारावाहिकद्वितीयादिज्ञानेषुव्याप्तिः
। तत्प्रत्यक्षविषयत्वानभ्युपगमादितिचेन्न। इतरसंसृष्टतयाज्ञानेनतत्संसर्गानुभवाभावलक्षणाया
जिज्ञासालक्षणयाआकांक्षायाः शाब्दज्ञानकारणस्यपदार्थज्ञानस्याभावेनतत्रधारावाहिकबुद्धे
रेवासिद्धेः। नचप्रथमशाब्दज्ञानकारणस्यपदार्थज्ञानस्यविनाशेपिशब्दजनितवाक्यार्थज्ञानादेवपदा
र्थविषयत्वात्द्वितीयादिशाब्दज्ञानंसंभवतीतिवाच्यं। तस्यपदार्थविषयत्वेपिपदजन्यपदार्थस्मृतत्वाभावे
नाकारणत्वात् पदजन्यपदार्थस्मृतेरेवासत्वात्। अन्यथापदलिंगानुमेयपदार्थस्याप्यन्वयबोधाप
त्तेः नचघटपदंघानेयेत्यत्रैवपदस्मरणान्तरकल्पनान्नद्वितीयादिज्ञानसंभवइतिवाच्यं। तथापिपद रा०म०
६

12

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृतिपदार्थस्मरणात्तात्पर्यज्ञानैर्वाक्यार्थज्ञानजननसमये प्रथमवाक्यार्थज्ञानस्याविनष्टत्वेन तत्रा
व्याप्त्यनवकाशात्। अत एव न धारावाहिकद्वितीयाद्यनुमितावव्याप्तिः अनुमितीत्यस्या द्वितीया
नुमितिसंभवेपि अनुमितित्वसाधनतायाः प्रकृतव्याप्त्यसमूहालंबनस्मृतित्वात्तोनुमित्यान
दुत्तरक्षणेऽनुमितिरित्यभ्युपगमेन तदा प्रथमानुमितेर्विनष्टत्वेन तस्याः ज्ञानार्थविषयत्वाभावा
त्। अनुधारावाहिकप्रत्यक्षबुद्ध्याद्यव्याप्तिरेवं नत्रुटपादिरहितप्रत्यक्षस्याविषयस्या विषयत्वेनानधि
गतार्थविषयत्वाभावात्। न चेदानीं कालो घट इति प्रतीतिनिबलात् कालस्यानीरूपत्वेपि चाक्षुषत्वंसा
धितमिति वाच्यं तथा सत्याकाशं बलाकारिति प्रतीत्यात्तस्यापि प्रत्यक्षत्वापत्तेः। न च प्रतीत्यनुसा
रेण महत्त्वसमानाधिकरणोद्भूतरूपत्वस्य कालाकाशव्यतिरिक्तचाक्षुषतायामेव प्रयोजकत्व
कल्पनात्तस्याप्यनुपगमे चाक्षुषत्वमिति वाच्यं। आकाशस्य प्रत्यक्षताभ्युपगमे तत्स्य शब्दलिं
गकानुमानप्रमाणानुसरणानुपपत्तेः। अप्रत्यक्षेऽप्याकाशे बालानां तलमलिनताभ्रमस्यतीति भाष्य
कारवचनविरोधाच्च। न च तत्र मिचेदं नमिति प्रत्यक्षेऽसोरभ्यस्येवाकाशे बलाकारस्याराबाकाशस्यवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०

८

काशस्यज्ञानोपनीतस्यभानात्तद्देशे परोक्षवृत्तेर्वाऽभ्युपगमाद्वा द्रव्यत्वंतस्यास्त्विति वाच्यं। नहि
नह्देवसवैवप्रत्यक्षेपिकालभानोपपत्तेर्नचाक्षुषत्वंतस्य स्पष्टचेराह। किंचेति। ननुधारावाहिकप्रत्यक्ष
स्थलेज्ञानभेदएव। अन्यथाज्ञानगणादि घटादिज्ञानस्य मुहूर्तंघटिकादिपर्यंतमवस्थानेनतद्देनंतरंवि
नाशस्यत्वनियामकाभावेनसर्वकार्यविरोधित्वबुद्धिपर्यंतावस्थापित्वाभ्युपगमेज्ञानतदनुभूयमान
घटस्यानुभवनाशजन्यसंस्काराभावेनमध्येस्मरणानुपपत्तिरितिचेत्सत्वेनघटाभावज्ञानानुपप
त्तिश्चेत्सारीकेनकिंत्विति। किंघटादिगोचरवृत्तेरौपचारिकज्ञानस्यैकत्वंनिराक्रियतेकिंवाचेतनस्य
ज्ञानस्यतत्वनाघटस्याह। यावदितियावत्कालमखिलप्रकाशनेघटइतिव्यवहारः। तावत्कालंतदाकारवृ
त्तेरैकेवल्याद्यवादितिभावः। एवकारस्यव्यवच्छेद्यमाह। नत्विति। गौरवादितिभावः। नहिंतनोत्पत्तिलाघव
त्स्थबुद्धिपर्यंतवृत्तेरैकेवनमध्ये अस्तिहविशेषान्नाशः तस्यसाधारणकारणत्वात् नचवृत्तेःस्वविषय
विरोधिघटाभावादिवृत्तिनाश्यत्वं। स्वोत्तरपटवृत्तेरपितन्नाशकत्वात् नापिस्वोत्तरवृत्तेर्नाशकत्वं। घटादिवृ
त्तेरेवाहास्तिन्यसमयेनाशाभावप्रसंगादित्याशंक्याह। वृत्तेरिति। वृत्तिपदंप्रकृतानभिज्ञापेनयाचवृत्तेःस्व राम०

14

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरोधस्फूर्तिपर्यन्तस्थायित्वाभ्युपगमादित्यर्थः तेन स्वोत्तरवृत्त्योर्ह्रासिन्यादीनां संग्रहः । फलबलेन सर्वस्यैव
दोहासिन्यसमयस्यापि निवर्त्तकत्वात् । अन्यथा यथा घटे तत्स्वेऽपि आकारवृत्तेः स्वोत्तरवृत्त्यंतराभावादि वि
नाशप्रसंगः । ननु स्वोत्तरवृत्त्योर्ह्रासिन्यसमपाहीनां कथं विरोधित्वमनुगतविरोधितावच्छेदकाभावादि
ति चेन्न । मरणादीनामनुगतप्रतिबंधकतावच्छेदकाभावेऽपि मणित्वादिना प्रतिबंधकतास्वीकारात् सर्वैवे
च विरोध्यननुगमस्यादोषत्वात् । द्वितीयं निरस्यति । तथा चेति । यथा घटादौ तदाकारवृत्तिरेका तथा चैत
न्यरूपं मुख्यज्ञानमपि यावद्दूरस्फुरणं तच्चैकमित्यर्थः ॥ ननु निरुपाधिकचैतन्यस्य स्वतएकत्वेऽपि तस्य
घटज्ञानाभावात् घटाकारवृत्त्युपहितस्य चैतन्यस्य ज्ञानेऽपि तदुपाधिभेदेन भेदावश्यंभावान्नैकत्वं युक्तमित्या
शंक्य घटावच्छिन्नचैतन्यवच्छिन्नमपि ज्ञानं तयोरेकदेशस्थत्वान्न भिद्यत इत्याह । नत्विति फलितेति । नन्वेवम
पि दिनभेदेन जायमानस्य घटादिज्ञानस्य नानात्वात्तस्य च दिनादिनांतरीयगत घटादिविषयत्वेन तत्राव्याप्तिः
। न चानधिगतपदेन स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वसमानाधिकरणज्ञानविषयविषयकत्वं विवक्षितमतो नोक्त
दोष इति वाच्यं । तथापि स्मृतावतिव्याप्तिः । ननु स्वविषयसमानविषयकज्ञानाजन्यत्वमधिगतविषयपदेन विव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षितमिति चेत्‌ न स्वविषयसमानविषयपदेन स्वविषयानतिरिक्तविषयकत्वविवक्षायामुपनीतभानप
टी० ८ क्षेऽवेनमितौ संशयोत्तरपक्षे च मतांतरे शाब्दज्ञानेऽव्याप्तिः प्रमेयत्वतात्कस्तत्तावति व्याप्तिश्च। नापि
स्वविषयाऽन्यूनविषयकत्वं सर्वेश्वरज्ञानमादाय लक्षणस्यासंभवप्रसंगात्‌ अथ स्वविषयान्यूनान
तिरिक्तविषयकत्वं तद्विवक्षितं तत्र संशयाद्युत्तरप्रत्यक्षानुमितिशाब्दज्ञानेषु नाव्याप्तिः ईश्वरज्ञान
मादायापि नासंभवः। व्याप्तिज्ञानपदार्थस्मरणयोर्न्यूनविषयत्वादीश्वरज्ञानस्य बाधितविषयत्वादि
ति चेन्न तथापि प्रमेयत्वतात्कस्तत्तावति व्याप्तिता इव स्यात्‌। तत्त्वमसीति वाक्यजन्याभेदज्ञानस्य तत्त्वं
पदलक्षितस्वरूपस्थितिजन्यत्वेन तत्राव्याप्तिश्च अनधिगतविषयपदेन संस्काराजन्यत्वं विवक्षितं स्व
तिश्च तज्जन्यस्येति नातिव्याप्तिः लिंगकरणतावादिमते संस्कारलिंगकानुमितौ सिद्धान्ते प्रत्यभिज्ञायामनुमि
तिमात्रे चाव्याप्तिः अनधिगतपदेनैव भ्रमेऽतिप्रसंगनिरासेन बाधितपदनिरर्थकतापत्तेः। अस्मन्मते तु ब्र
ह्मव्यतिरिक्तसकलपदार्थज्ञानस्य भ्रमतया पूर्वपूर्वानुभवसंस्कारजन्यत्वेन तदाजन्यत्वं। भ्रमत्वं दोषत्वे एम० ८
नैव तज्जन्यमस्तीति नोक्तदोष इति वाच्यं। रजतादिभ्रमे वा कचित्काचादिदोषबहुलातिरिक्तघटादिप्रपंचज्ञाने मूला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विघायाएवदोषत्वाभ्युपगमात्तस्मादुक्तप्रमालक्षणंअयुक्तमितिचेन्नः।अनधिगताबाधि
तार्थविषयज्ञानत्वं।अनधिगतत्वंचस्वाव्यवहितपूर्वक्षणावर्त्तिधर्मिविषयविषयकत्वेनानियतत्वात्तेन
स्मृतेस्तादृशसंस्कारविषयार्थकत्वात्तत्रनातिव्याप्तिः।ब्रह्मव्यतिरिक्तसकलप्रपंचज्ञानस्यसंस्कारजन्यत्वे
पितादृशसंस्कारविषयत्वार्थविषयत्वान्नाव्याप्तिः।ननुतत्त्वमसीतिमहावाक्यजन्याखंडाकारज्ञानेत्त
थाप्यव्याप्तिः तत्त्वलाक्षणिकतत्त्वंपदजन्याभेदोपस्थितेः स्वाव्यवहितपूर्वक्षणवर्त्तित्वादितिचेन्न
।सांप्रदायिकमतेप्रथमप्रमालक्षणेलक्ष्यलक्ष्यताभावेनेष्टापत्तेः।नचाप्रमात्वेतस्यभेदप्रतिभास
विरोधित्वंनस्यादितिवाच्यं।तस्याबाधितविरोध्यर्थविषयतया।तन्निवर्तकत्वोपपत्तेः।ज्ञानस्यभे
दज्ञाननिवर्तकतायांगौरवेणानधिगतविषयकत्वस्यातंत्रत्वात्।तदुक्तमष्टमवर्णकेविवरणा
चार्यैः।तत्त्वमसीतिवाक्यस्यजीवब्रह्मपदार्थप्रतीतिसमयेप्रतिपन्नैक्यविषयतयाऽनुवादप्राप्ता
वपिभेदप्रतिभासिविरोधितयाप्रामाण्यमितिग्रंथकृन्मतेतुतत्त्वमसीतिवाक्यजन्यमभेदज्ञानंप्र
थमलक्षणेपिलक्ष्यमेवनचाधिगताभेदविषयत्वादव्याप्तिः तत्त्वंपदाभ्यांप्राप्तत्वाकान्तसर्वज्ञत्वा

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
९

दिविशिष्टजीवब्रह्मणोरप्युपस्थितावपि विशिष्टयोरन्वयानुपपत्त्या विशेष्ययोरेवाभेदान्वय इति च
तुर्थग्रंथस्तत्र वक्ष्यमाणत्वेन पदार्थस्य स्मृतिसमयेऽभेदान्वयस्याप्रतिपत्तेः न च शाब्दप्रमायामु
पनीतभानपक्षे संशयोत्तरप्रत्यक्षानुमित्योरव्याप्तिः पदार्थव्याख्यावसर एव हि तत्प्रवक्ष्यमाणरीतिस्मृ
तिविषयत्वादिति वाच्यं। तयोरज्ञातसाध्यवाक्यार्थांशे एव प्रमात्वाभ्युपगमेन ज्ञातार्थांशे तत्त्वप्रमा
त्वस्येष्टत्वात्। यद्वाऽनधिगतविषयपदेन स्वसमानविषयकसंस्काराजन्यत्वं विवक्षितं। स्वसमान
विषयत्वं च स्वान्यूनविषयत्वं तेन प्रमुष्टतत्ताकस्मृतौ नातिव्याप्तिः। शाब्दप्रमानुपदार्थस्मृति
जन्यापि न संस्कारजन्या तज्जन्यानुमितिः प्रत्यभिज्ञा न्वान्यूनविषयताजन्येति नाव्याप्तिः। ब्रह्म
व्यतिरिक्तघटादिसकलप्रमायाः संस्कारजन्यत्वेपि तत्स्याभिन्नविषयत्वान्नाव्याप्तिः। अथवा स्वा
न्यूनविषयकानुभवाजन्यत्वं विवक्षितं तत्स्मृतत्वेन तज्जन्यत्वं अतः सर्वदोषनिरासः। तत अयु
क्तमिदं प्रमितिलक्षणमिति तदेतत्सर्वमभिसंधायेति नाव्याप्तिशंकापीति। इदानीं लक्षणाद्रूप
स्याव्याप्तिमाशंकते। नन्विति। कथं प्रमाणमिति उक्तप्रमाणलक्षणवत्त्वं भवतीत्यर्थः। यद्वा ननु

प्रम०
९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि इदं लक्षणं सर्वमतसाधारणं तदा धारावाहिकबुद्ध्यव्याप्तिः यदि सिद्धान्ते एवेदं तदा ब्रह्मज्ञान
स्यैव सिद्धान्ते प्रमाणतया मिथ्याभूतघटादिज्ञानस्याप्रमात्वात् तत्राव्याप्तिनिराकरणानुपपत्तेः अ
नधिगतपदवैयर्थ्यं चेत्याशयेन शंकते। नन्विति। कथं प्रमाणमिति प्रमाणत्वेन लक्ष्यं न भवतीत्य
र्थः। घटादिज्ञानमपि लक्ष्यमेव प्रमात्वव्यवहारात् व्यवहारार्थमेवाच तल्लक्षणप्रणयनादित्याश
येनाह उच्यत इति। नहि सिद्धान्ते घटादिज्ञानमपि लक्ष्यं त्वन्न तत्राव्याप्तिर्दुर्वारा तद्विषयस्य शुक्ति
रूप्यवद्बाधितत्वादित्याशंकायां तत्संसारदशायां घटादिप्रपंचस्य न बाध इत्याह। ननु नेह नाना
स्तीत्यादिश्रुत्या कालत्रयेपि घटादेर्बाधावगतेः कथं संसारदशायां न बाध इत्याशंक्य तया पार
मार्थिकत्वावच्छिन्नतदत्यन्ताभावापगमेपि अध्यासविरोधिनः स्वोपादाननिवृत्तिलक्षणबाधस्य
मुक्तिदशायामेवावगमादित्याह। यत्रेति। ननु संसारदशायामिति चोपादाननिवृत्तिलक्षणो बाध
इत्यनुषंगः। प्रपंचस्य संसारदशायां बाधाभावे हेतुमाह। यत्रहीति। नन्वेवमप्यबाधितपदेन का
लत्रयाबाध्यत्वस्यार्थस्य विशेषणत्वेनोक्तत्वात् दुष्टं तल्लक्षणाव्याप्तिस्तदवस्थैवेत्यत आह। तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेति। संसारदशायामबाधितत्वसिद्धेस्तीत्यर्थः। संसारदशायामिति संसारकालीनत्वोपादान
निवर्त्यघ्नति यागिकत्वलक्षणमेवाबाधितत्वलक्षणेऽविवक्षितमित्यर्थः। उक्तघटादिज्ञानघा
प्रामाण्यमभियुक्तवचनेनापि प्रथयति। तदुक्तमिति। लौकिकप्रमाणस्यात्मनिश्चयेनानुग्राह्यत्वाद
टी० ज्ञाप्यत्वाद्रूपं चप्यनुपपत्तिरित्यतआह। ब्रह्मेति ब्रह्मनिश्चयः संसारदशायामप्यस्तीत्यत उक्तं
१० साक्षात्कारेति। न लौकिकशब्देन प्रत्यक्षादिजन्यज्ञानमात्रमभिधाने स्वर्गेष्टसाधनादिज्ञानस्या
लौकिकस्यैव वैदिकलिंगादिप्रभवजन्यस्याप्रामाण्यं संवादाप्रामाण्यं स्यादित्याशंक्य ब्रह्मत्वमिति
रिक्तवस्तुज्ञाने सर्वं तेन विवक्षितमित्याह घटादीति। सामान्यलक्षणाधीनो विभाग इत्यतः
प्रमाणं लक्षयित्वा विभजते तानीति। प्रत्यक्षमेकं प्रमाणमिति चार्वाकः। प्रत्यक्षानुमाने इति
काणादसुगतमतानुसारिणः। शब्देन सह त्रीणि प्रमाणानीति सांख्याः। प्रत्यक्षानुमानशब्दाः
प्रमाणानीति नैयायिकाः। अर्थापत्त्या सह प्रमाणानि पंचेति प्राभाकराः। एवं प्रमाणविभागम त०म०
न्यथा व्याचक्षते तान्यसाह षडिति। अनुमानादीनां च पृथक्प्रामाण्यं तत्तन्निरूपणावसरेव १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थ्यामः। न च प्रत्यक्षस्य देशघटत्वात्तदभावे तन्निरूपयति। न चेति प्रमाणानां मध्ये इत्यर्थः। प्रमाक
रणत्वमनुमानादावपीत्यतः प्रत्यक्षेति। नावतिचोक्ते भ्रमप्रत्यक्षकरणेऽतिप्रसंग इत्यत उ
क्तं प्रमेति। नन्वयुक्तमिदं प्रत्यक्षप्रमाणलक्षणं प्रमायाः प्रत्यक्षप्रमाजन्यज्ञानरूपत्वेन पर
स्पराश्रयत्वात्। न चेन्द्रियजन्यज्ञानत्वं तथा स्मृत्यनुमित्यादेर्मनोजन्यत्वेन प्रत्यक्षत्वापत्तेः। ई
श्वरज्ञानस्येन्द्रियाजन्यत्वेनाप्रत्यक्षत्वापत्तेश्च। नापीन्द्रियत्वेनेन्द्रियजन्यत्वं साक्षात्त्वमस्त्वेतेन र
नुमितेश्च मनस्त्वेन जन्यत्वेन नातिव्याप्तिरिति वाच्यं। तथापि सिद्धान्ते मनसोऽनीन्द्रियतया सुखा
दिप्रत्यक्षे भ्रमे चातिव्याप्तिः। न च विषयजन्यज्ञानत्वं मनोविशेष्यकानुमित्यादौ तत्त्वसक्षात्
स्वादिप्रत्यक्षे भ्रमे चातिव्याप्तिः। न च विषयजन्यज्ञानत्वं मनोविशेष्यकानुमित्यादौ तच्छ्रेयार
व्यापकत्वाच्च। अत एव विषयत्वेन न जन्यज्ञानत्वं साक्षात्त्वं किंच न विषयत्वं साक्षात्कारनाव
च्छेदकं केवलविषयत्वस्यानुमेयसाधारणज्ञानत्वात्। प्रत्यक्षज्ञानविषयत्वस्य तद्रूपेऽव
त्वेनावच्छेदकत्वात्। न तज्ज्ञानविषयत्वस्य च ज्ञानकालमध्ये वर्त्तमानस्य न तत्त्वेनाविजनक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ११

तानवच्छेदकत्वात्। नचज्ञानकरणाजन्यज्ञानत्वंक्षात्कारकारणतावच्छेदं ज्ञानाजन्यकज्ञान
त्वं ज्ञानाकरणज्ञानत्वं वा साक्षात्त्वं। आद्यस्य स्मृतौ लिंगकरणत्वनिरासेनानुमितावप्यति
व्याप्तिः द्वितीयस्य विशेषणज्ञानकारणतावादिमते विशिष्टज्ञाने मतांतरे प्रत्यक्षज्ञानमा
त्रस्यैवेश्वरज्ञानजन्यतयाव्यापकत्वात्। तृतीयलक्षणस्य पूर्वानुभूतेः संस्कारोपक्षी
णत्वेन स्मृतिकरणतया तत्राव्याप्तिः संस्कारद्वाराकारणत्वेन प्रत्यभिज्ञायामव्याप्तेः न
च पूर्वानुभवस्य तत्तास्मरणोपक्षीणत्वेन तत्राहेतुत्वं विशेषणज्ञानकारणत्वानभ्युपग
मे न तत्तास्मरणकल्पने मानाभावात् अनुमित्यादेः सन्निहितांशप्रत्यक्षत्वेन तत्राव्याप्तेः
। नच साक्षात्त्वं जातिः सिद्धान्तवर्तिनो ज्ञानत्वाभावात् ज्ञानस्वरूपस्याखण्डैकत्वेन तस्यै
कव्यक्तिकत्वेन जातित्वायोगात् निश्चयत्वादिना सांकर्यप्रसंगाच्च। न च निश्चयत्वेन जातिः
वैपरीत्यापत्तेः मननत्वमननत्वयोरुभयस्याप्यजातित्वापत्तेः ततश्च प्रत्यक्षप्रमाणं दुर्निरू
प्यमित्याशंक्याह। प्रत्यक्षेति। अयमर्थः ज्ञानत्वमेव ज्ञानस्य प्रत्यक्षलक्षणं ज्ञानं च ब्रह्मैव। राम० ११

22

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यंज्ञानमित्यादिश्रुतेः।२ इदंचलक्षणंज्ञानस्यप्रत्यक्षत्वव्यवहारप्रयोजकंतत्तद्विषयांशेज्ञा
नस्यप्रत्यक्षत्वव्यवहारप्रयोजकंचानुपदमेवस्फुटंभविष्यति।चैतन्यरूपमेवज्ञानमबाधितघ
टादिवृत्त्यवच्छिन्नंघटादिप्रमेत्युच्यते।अतएवविशिष्टचैतन्यंप्रतिचक्षुरादेःकरणत्वाच्चक्षु
रादिभवतिप्रत्यक्षप्रमाणमिति।आत्मनःप्रत्यक्षत्वेप्रमाणमाह।यत्साक्षादिति।ब्रह्मणःप्र
माणव्यापारद्वारकंप्रत्यक्षत्वंव्यावर्तयितुमुक्तोसाक्षादितिविशेषणं।अपरोक्षप्रमाणंतरा
त्तस्योत्पत्तिसत्त्योरभावादित्यतआह।अपरोक्षादित्यस्येति।चक्षुरादेःप्रमारूपचैतन्यंप्रत्य
कारणत्वात्स्वप्रमांपकिंवाघटादिप्रमारूपंप्रति।नाद्यः।चैतन्यस्यस्वप्रकाशत्वेनस्वात्मनिप्रमा
णव्यापारानपेक्षतयातत्कारणाभावस्येष्टत्वादित्याशयेनपरिहरति।उच्यतइति।द्वितीयं
प्रत्याह।चैतन्यस्येति।चैतन्यस्यस्वरूपतोऽनादित्वेनेन्द्रियाजन्यत्वेऽपिवृत्तिविशिष्टचैतन्यमि
न्द्रियजन्यंतदेवघटादिप्रत्यक्षप्रमेत्युच्यतइत्यन्वयः।अतएवतस्येन्द्रियजन्यत्वेहेतुमाह।त
दभिव्यंजकेति।नत्वतिबिंबग्राहीत्यर्थः।ननुरजतोज्ञानव्यवहारदर्शनात्स्वरूपेणेन्द्रियजन्यत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
१२

द्वे सैव प्रत्यक्षप्रमानवृत्तिविशिष्टचैतन्यमित्याशंक्यासत्यं ज्ञानमित्यादिप्रकृत्यात्तत्त्वेयं वस्तुस्वरूपज्ञानत्वा
वगमानावृत्तेरव्यंजकत्वांतः करणधर्मत्वेन जडत्वाज्ज्ञानव्यवहारस्य च तत्प्रयोगात्वेनाप्युपपत्तेर्नेत्यान
मित्याहाव नावितिाउपचारे हेतुमाह। ज्ञानेति। नचायमपसिद्धांत इत्याह मदुक्तमिति। नन्वात्माभिन्न
मिथज्ञाने [redacted] तेंद्रियजन्यत्वात्प्रत्यक्षं नांतःकरणवृत्तिविशिष्टचैतन्यं
न्यंतः करणपरिणामात्मिकाया वृत्तेरेवानुपपत्तेः। तथाह्यंतः करणं न परिणामि निरवयवत्वादाका
शवत् निरवयवत्वं च तस्य सुखाद्युपलब्धिकरणजन्यादिंद्रियजन्याद्वा कर्तृत्वात् प्रत्यक्षज्ञानत्वाद्धटव
त्। न तज्ज्ञानवदिति धर्मिग्राहकानुमानाल्लाघवानुगृहीतात्सिध्यतीति न हेत्वसिद्धिरिति नैयायिकः
शंकनेनन्निति। कथमित्याक्षेपः। अंतःकरणं परिणामि सावयवत्वाद्घटवदित्यनुमानेन बाधादि
परिणामित्वानुमानेनेत्युक्तमित्याह। इत्थमिति। ननु धर्मिग्राहकानुमानान्मनसो निरवयवत्वसिद्धे
रसिद्धिमाशंक्याह। मनोवदिति। अयमाशयः ननु तावदुक्तानुमानान्न तत्सिद्धिः शरीरप्राणसंयोगादि
द्वारा न तत्करणं शरीरादिकमादायार्थांतरतया पि द्वितीयानुमानादिंद्रियत्वेन तत्सिद्धिः मनस इं
द्रियत्वे तस्य निराकरिष्यमाणत्वात्। किंचनांतःकरणं निरवयवं साक्षिवेद्यत्वाद्घटवदित्यनुमाना

राम०
१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्निरवयवत्वासिद्धिरित्याह। सादिद्रव्यत्वेनेति। रूपादौ व्यभिचारवारणाय द्रव्यपदं। गगनादौ तद्वारणाय सा
द्रेति। ननु मनस्यणुमानस्यैव मनसि प्रमाणत्वेन। तत्सरणीतया तेन च लाघवादनादित्वेनैव सिद्धौ वै
यर्थ्यमसिद्धेर्हेतुरित्याशंक्याह। अन्यतमत्वं मनःसिद्धौ नत्सादित्वं चक्षुरिति। एवभगवतीप्रमाणमित्याह सादित्व
चेति। अवगम्यत इति शेषः। तथा च तत्कृतलमनादर्जनत इति यत्नेरवगम्यत इति जानं। ननु नान्तःकर
णस्य सावयवत्वेन परिणामित्वं अंसावयवविनिघेद्व्यभिचारात्। न च तत्र तद्भिन्नत्वविशेषितं तस्यापि
णामेहेतुः अन्तःकरणस्यासावयवभिन्नत्वे प्रमाणाभावात् सादिद्रव्यत्वस्य घटादौ व्यभिचारेण नत्रा
प्रमाणत्वादित्यत आह। सा हा। वृत्तिरूपज्ञानस्येति। धीशब्दस्य ज्ञानशब्दपर्यायत्वमज्ञानानं त्वसाह
धीशब्देनेति। ननु ज्ञानं नान्तःकरणोपाधिकं मानसप्रत्यक्षत्वात् कामादिवत् न चक्षुरिति विरोधः म
नोजन्यपरं तथापि तदुपपत्तेरित्याशंक्याह। दृष्टइत्यादि वत्सामानाधिकरण्यश्रुतिरूपादानपरैव
अत एव दृष्टान्तसाध्यविकलइत्याह। अत एवेति। उत्कृष्टैर्वेस्थैः। ननु ज्ञानेच्छादेर्मनोधर्मत्वं
अहं जानाम्यहमिच्छामीत्यादि धर्मित्वावगाहिप्रत्यक्षानुभवविरोधात्कामादिश्रुतिस्वलिंगत्वमी
वनमिति चेद्गौणौपचारितार्थेत्याशंकतेनन्विति। न चान्तःकरणधर्मत्वज्ञानादेरात्मन्यध्यासः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
१३

परस्परविरुद्धधर्मवदन्तःकरणात्मनोरैक्याध्यासाभावाद्धर्मैक्याध्यासस्य धर्म्यध्यासव्यापकत्वान्नच
हमिसंतःकरणाभेद आत्मन्यध्यस्यत इति चेन्न । जाड्यचेतनत्वादिविरुद्धधर्मवत्त्वेन भेदावगमात् । भे
दाग्रहस्याध्यासहेतुत्वात् । किंच नानवगतयोरात्मभेदाग्रहः केवलभेदाग्रहेणाग्रहणाद्वाध्यासा
दर्शनेन तस्याहेतुत्वात् । नाप्यवगतयोरात्मान्तःकरणयोर्भेदाग्रहादध्यासः अनुमानेन तन्मनोत्स
जनेसाहित्यात्वमेनावगमसमये तस्यान्नभिन्नत्वेनावगतेः । नच स्फटिकविवेकग्रहेपि लौहि
त्यस्फटिकयोर्लौहित्याध्यासदर्शनात् । तद्वदन्तःकरणस्यैक्याध्यासाभावेपि स्वस्य तद्धर्माध्यासइति
वाच्यं । तत्र कुसुमच्छायाग्रहणेन तद्धर्माध्यासोपपत्तेः धर्मिधर्मान्तरज्ञातिविवेकाध्यासयोरन्यतर
स्यैव धर्माध्यासव्यापकत्वात् नचात्मा मनःप्रतिबिंबग्राही । निरूपत्वात् । किंच नाहमिसध्यासः इदं
रजतमितिवद्द्रूप्यावभासाभावात् । तस्मादध्यासव्यापकत्वाभावात् आत्मान्तःकरणयोरागमानुमा
नादिना परोक्षविवेकग्रहेस्य परोक्षविवेकग्रहाभावात् । नापि द्विरूप्यावभासाभावः स्वयः पिंडेस्व
योवन्हिरिति द्विरूप्यावभासाभावेपि अयो दहतीति द्विरूपावभासवदयमात्माहं मन इति तादात्म्याव
भासेपि अहमुपलंभे दुःखी सुपलब्धत्वदुःखित्वादिरूपेणात्मान्तकरणयोर्द्विरूप्यावभासदर्शनात्

राम०
१३

26

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रति।नन्वेवमप्यहंमनुष्यइतिअभेदव्यवहाराभावान्नसाक्षात्माध्यासइत्याशंक्याहदुःखीसुखीइत्यादिव्यवहारोऽपि
अनयोर्दहतीतिवत्तादात्म्यव्यवहारत्वात्तादात्म्याध्यासपूर्वकएवअन्यथातादात्म्यव्यवहारानुपपत्तेरित्यत
आह।अयःपिंडइतिनन्वयःपिंडव्यतिरेकेणवह्नेर्दहनक्रियाश्रयत्ववन्मनसआत्मव्यतिरेकेणदुःखा
द्याश्रयत्वादर्शनाध्यासावकाशइतिचेन्नश्रुतिस्मृतिन्यायैरात्मान्तःकरणयोर्भेदेनप्रसिद्धत्वात्।तथाहि
आत्माज्ञानरूपःस्वयंप्रकाशःसर्वगतःअत्रायंपुरुषःस्वयंज्योतिराकाशवत्सर्वगतश्चनित्यइत्यादि
श्रुतिसिद्धः।अहंकारभिन्नश्चसएवाधस्तात्सउपरिष्टादितिभूमाख्यप्रकरणेसर्वात्मत्वमभिधायअथातो
ऽहंकारादेशइति।अहंकारस्यापिसार्वात्म्यमुक्त्वाअथातआत्मादेशइतिआत्मनोऽहंकाराद्भेदेननिर्दे
शात्।अहंकारस्यजडाविद्योपादानत्वाज्जडःपरप्रकाश्यःमध्यमपरिमाणःबुद्धेर्गुणेनात्मगुणेनचैवा
राग्रमात्रोह्यवरोऽपिदृष्टइतिश्रुतेः।तथाक्रियाश्रयःविद्यानिवर्त्यश्चविज्ञानंयज्ञंतनुतेसधीःस्वप्नोभूत्वे
मंलोकमनुसंचरतियदापंचावतिष्ठन्तेज्ञानानिमनसासह।बुद्धिश्चनेंगतेनचपरमात्मानमश्नुतेभिद्य
तेहृदयग्रंथिःछिद्यंतेसर्वसंशयाः।क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइत्यादिवचनसिद्धः।तथा
हंकारोऽहमितिव्यावृत्तआत्माचसन्नितिसर्वविषयानुवृत्तः।तथाचात्माहंकाराद्दुघनेश्चउरत्वात्यद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
१४

नुवर्त्तंतश्चावृत्तादिन्नेयथाकुसुमेभ्यः स्रजमिति। ततस्य श्रुतिस्मृतिन्यायसिद्धोऽप्रमात्माऽहंकारयोर्भेदः। न
न्वेवमप्यहंकारमिश्रस्यात्मनोऽहंप्रत्ययविषयत्वं तस्यैंद्रियत्वेनातींद्रियत्वादितिचोदयति। नन्विति। इंद्रि
यत्वे नप्रमाणाभावेनातींद्रियत्वासिद्धेः प्रत्यक्षोऽहंकार इत्याह उच्यत इति। अतींद्रियत्वेप्रमाणमि
ति चेन किं मनस इंद्रियत्वे श्रुतिप्रमाणमुत स्मृतिः अनुमानं वा। नाद्यः तथाविधश्रुतेरनुपलंभा
दित्याह। वचनाद्विति। द्वितीयं पक्षमुत्थापयति मनःषष्ठानीति। उक्तस्मृतेर्मनस इंद्रियगणपूरकत्वं सं
ख्यापूरकत्वे प्रमाणाभावा नमस्तींद्रियत्वे प्रमाणमित्याह नेति। नन्विंद्रियसंख्यापूरणेन मनसोऽपि
इंद्रियत्वमनुमीयत इति तृतीयपक्षमाशंक्या प्रयोजकत्वादनुमानेनयुक्तमित्याह। अनींद्रियेणापि
।किंच मनस इंद्रियं इंद्रियगणपूरकत्वं संख्यापूरकत्वादित्यनुमाने विशेषव्याप्तिर्मूलमुत सामान्यव्याप्तिर्नो
घः दृष्टांताभावादित्याह। नहीति। ननु यद्यत्संख्यापूरकं तत्तज्जातीयं यथा पशौ प्रतिपन्नान् षष्ठान्त
ऋत्विजश्च ऋत्विग्भिः संख्यापूरकः प्रतिप्रस्थाता च ऋत्विग्जातीय इति सामान्यव्याप्तिपक्षमाशंक्य निराक
रोति यजमानेनेति। अनृत्विजापीति। ननु यजमानस्य ब्राह्मणत्वेन ऋत्विक्ताज्ञासमत्तीति नव्यभिचार इति
चेन्न। यथा सहार्थगतयपयन्त्संख्यापूरकं तत्तत्सहार्थतावच्छेदकेन रूपेण तत्तज्जातीयमिति व्याप्तेर्विवक्षि

एम०
१४

28

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्वा ह्वालक्षणस्य चापदार्थतावच्छेदकत्वात्। न चाखण्डकल्पितपदाश्रवणाद्वालक्षणपदाध्याहारेणाप्यन्वय
संभवात् ह्वालक्षणत्वं पदार्थतावच्छेदकमिति वाच्यं। चत्वारः खण्डिजइति खण्डितकपदस्यश्रुतत्वेनन्तत्वेनत्यैवा
नुषंगात् ह्वालक्षणपदाध्याहारे नियमाभावाश्च। नन्वध्याहारवादिमते यजमानः पंचमारउंभक्षयंतीत्य
त्र यजमानेहि तोरखाभावान्न व्यभिचार इत्याशंक्याह संदिग्धं व्यभिचारमाह। वदन्तिनित्ति। नहि पौरुषेय
त्वेन वेदसिद्धमार तेव दत्तशंकापीति भावः। ननु मन इन्द्रियं तत्से बाधकाभावाश्च स्वर्वहित्स्याशंक्य त्वं
हेत्वसिद्ध्या रूपयति यद्यपीत्यादिभिः। परं मन इत्यर्थादित्यादि मनोऽवगतं तथापि चक्षुरादिहिंद्रियभेदसिद्धिः। ए
तस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च सादिभ्यतिरादिपरयात्या चकारो भिन्नक्रमः स चक्षुस्त्वस्यने
नसंबध्यते तथा च मूलसाचिविधाय महंकारेण महतत्वाद्विजायते। इंद्रियाणां नतः सर्वविधेण ह्वाणमहा
मनेरसादिउराणवचनैर्मनसोऽनीन्द्रियत्वावगमादित्यर्थः। ननु सुखाद्युपलब्धेरिंद्रियजन्यापत्य
क्षत्वाद्रूपादिप्रत्यक्षवदित्यनुमानं मन इन्द्रियत्वे प्रमाणं। अन्यथा सुखादिज्ञानस्य साक्षात्त्वं न स्यादित्या
शंक्य निराकरोति नैवमिति। किमिन्द्रियजन्यत्वेन प्रत्यक्षमात्रे हेतुत्वं प्रत्यक्षज्ञानत्वाद्योप्रयोजको व्यभि
चारः इत्यभिप्रेत्याद्वितीये हेतोरप्रयोजकत्वमाह। नहीति। अनुमितसाक्षेरिति तव मनेरनिशेषः नन्विंद्रियत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
१५

न तज्जन्यत्वेन साक्षात्त्वप्रयोजकं अनुमित्यादेरपि मनस्त्वेन तज्जन्यत्वेन नातिप्रसंगः अत आह ईश्वर
ज्ञानस्येति। ननु उक्तं ज्ञानस्य प्रत्यक्षलक्षणं ज्ञानत्वेन प्रत्यक्षप्रमाणलक्षणोपयोगि चक्षुरादेरपि ज्ञान
न्यत्वरूपप्रमाणकत्वेन प्रत्यक्षप्रमाणत्वापत्तेः। न चान्यज्ञानस्य तत्तद्विषयांशे प्रत्यक्षत्वव्यवहारप्रयोज
कमिन्द्रियजन्यत्वादिकं त्वयैव निराकृतत्वात् विषयावच्छिन्नचैतन्यरूपप्रमाणफलत्वेन प्रत्यक्षप्रमा
णाभिन्नत्वस्य प्रत्यक्षविषयव्यापकत्वेन प्रत्यक्षत्वमात्रप्रयोजकत्वाभावादिति सारांशेनाक्षिपति सिद्धान्त
इति। ननु तावज्ज्ञानगतं प्रत्यक्षलक्षणं विषयव्यापकं न त्वान्य प्रत्यक्षत्वव्यवहारप्रयोजकमित्याक्षेपः स
र्वमतेष्वप्युभयसाधारणस्य प्रत्यक्षलक्षणस्य वक्तुमशक्यत्वेन तदभावस्यादोषत्वात्। आक्षेप्तृज्ञानग
तं विषयगतं चानुगमितं तद्द्वयं दार्शनिकत्वाप्रत्यक्षलक्षणमित्येवाक्षेपतत्परं समाक्षिपति
तत्र ज्ञानविषयगतयोरनतिप्रसक्तयोर्निरूप्यमाणत्वान्नायमाक्षेपो युक्त इत्याह। ज्ञानगतस्येत्यादिना।
अपि च इति। ज्ञानगतं तत्तद्विषयप्रत्यक्षत्वप्रयोजकस्यैव प्रत्यक्षप्रमाणलक्षणोपयोगित्वेन प्रधानत्वा
त्. विषयप्रत्यक्षलक्षणस्य च विषये प्रत्यक्षत्वव्यवहारस्य प्रयोजकान्तरे रोगो वा पपन्नेस्तस्याल्पत्व
मिति तल्लक्षणव्याप्तिनिराकरणार्थं व्याख्यातमनेन निरूपणमिति ध्येयं। ननु द्वितीये चैतन्यस्य कुतः प्रमा

राम०
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णत्वा कुतो वा प्रमाणस्य सतस्तस्य विषयचैतन्याभेद इत्याशंकायां प्रथमं हितोपदर्शकत्वेपाधिकं प्रमाणप्र
मेयादिभेदमुपपादयति। तथा हीति। नन्वेकस्य क्रियाकर्मत्वविरोधात् कथं प्रमाणप्रमेयप्रमावद्रसा शंका
यां तद्रूपान्तःकरणावच्छिन्नत्वेन प्रमातृत्ववत् तद्वृत्तिलक्षणक्रियानवकर्मघटाद्यवच्छिन्नत्वात् प्रमाणप्रमे
यभावं निदर्शयितुं प्रमातृचैतन्यस्वरूपमाह। अन्तःकरणेति। यद्वा प्रकृतज्ञानप्रसक्तलक्षणपये
गित्वात् स्वयं प्रमाणविषयचैतन्यस्वरूपमभिधाय वक्ष्यमाणविषयप्रसक्तत्वनिरूपकं प्रमातृचैतन
न्यं लक्षयति। अन्तःकरणेति। नन्वपरत्वेनान्तःकरणमतीन्द्रियतया प्रसक्तं तथापि नरस्य बहिर्निर्गमनाभा
वकथं परिणामात्मिका वृत्तिः। न चादित्यादिपर्यन्तदीर्घप्रभाकारेण परिणामदर्शनात्तद्वृत्तिरूपपत्ते
तिवाच्यं। अन्तःकरणस्य चाक्षुषत्वात् सौरालोकस्येव नयनगोलकनिःसृतस्य दीर्घप्रभाकारेण प्रतिभा
नात्। किं चान्तःकरणस्याणुत्वेन तस्य गमनक्रियायां अपसृत्य तन्निष्क्रमणादिपर्यन्तगमनेन तदवच्छिन्नजीव
स्यापि गमनत्वेन देहस्य निर्जीवत्वापत्तिः विभुत्वेन निष्क्रियत्वापत्तेः मध्यमपरिमाणत्वे च देहानुरूपपरिमा
णस्य देहवन्मध्यमत्वेन तदितिविषयप्रतिभासानुपपत्तिः किं च चक्षुरादिसंयुक्तस्य घटादेश्चैतन्य
प्रकाशेनैव स्फुरणोपपत्तौ अन्तःकरणवृत्तिवैफल्यं। तत्रान्तःकरणस्य सावच्छिन्नप्रमाणचैतन्यमिति।

31

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
१६

।उच्यते मनः मध्यमपरिमाणमेव न सर्वगतं मनिसत्वात्वाणाश्रवात् अयस्यतस्यैवोक्तानिगमादिश्रवणा
त्तु न चाणोर्देहव्यापिसुखाद्युपलब्धेः। न चांतरस्य तस्य बहिर्निर्गमनाभावात् तत्सुखाद्युपादानत्वं। तत्तो बहि
र्निर्गमनाभावेपि चक्षुरादिद्वारा धूमादिविषयदेशगमनोपपत्तेः। न च स्वतो गमनशीलस्य साहाय्या
नपेक्षेनिसोद्गतं। तज्जागोहकस्य कुल्याद्वारा केदारप्रवेशादर्शनात्। न चास्य मध्यमपरिमाणत्वे
स्तरिति धूमादिप्रतिभासानुपपत्तिः अतितिव्रछविरलतेजसम्बन्धेन सवितृकिरणवच्छीघ्रप्रस
रोपपत्तेः। न द्विनिक्षुविषयपरिमाणं तज्जागोहकेचतुष्कोणकेदारानुरूपपरिमाणस्य कृशामोचाय्यः
पिंडपरिणामस्य दर्शनेनांतःकरणस्यानिःस्यर्थताहनात्मकत्वात्। द्रव्यारंभकतायां सावयवत्वस्यैव प्र
योजकत्वात् न चांतःकरणनिर्गमने देहस्य निर्जीवत्वप्रसंगः शरीरत्वांतःकरणस्य धूमादिपर्यंतगमने
पि देहसंबंधाविरोधात्। तथा च तत्प्रयोजनार्थं तल्लयाभ्रवृत्तेन(?)। तत आत्मांतःकरणस्य वच्छिन्नचेत
न्यप्रमाणासे तत्त्वमितितिहेतवः अभिप्रेसाह। तत्र पृथक्तारिंना(?)। ननु चक्षुरादींद्रियद्वारा पर्वतादावंतःकर
णनिर्गमने न तद्देशे विषयसंबंधितया तदवच्छिन्नचैतन्यस्य विषयचैतन्याभेदादुक्तलक्षणस्य तत्रातिव्या
प्तिरित्यत आह। अत एव मितादिस्थलस्य तिन्नवच्छिन्नपदेनोपलक्षितेनातो उक्तस्थले मिथाप्रिः विशिष्ट राम०
१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिधानेचवह्निवह्निविषययोर्भेदे नन्वहिद्विशिष्टयोरपि चैतन्मयोर्भेदादुक्तलक्षणस्य घटादिष्वसत्त्वलक्ष
णे ऽव्याप्तिरित्याशंक्योपहितस्यनेनविवक्षितत्वान्नदोषइत्याह। तथाचेति। चक्षुरादिसन्निकर्षस्थले
मनोनिर्गमनेसिद्धेत्ततीत्यर्थः। तदुभयावच्छिन्नविषयचैतन्योपहितं उपाधिविशेषणयोर्भेदोवक्ष्यत
इतिभावः। ननूपाधिविशेषणयोरीषद्भेदापितयोः समानयोगक्षेमत्वेनतदुपहितयोरपिभेदएव
त्याशंक्यनहिविशेषणयोरिवोपाध्योः स्वरूपेणाभेदकत्वंकिंतुभिन्नदेशकत्वेनेत्याह। विभाययोरपी
ति। भिन्नदेशस्थत्वेनोपधेयभेदप्रयोजकयोरित्यर्थः। ननूपाध्योरपिस्वरूपेणैवभेदकत्वंकिंनभिन्न
देशस्थत्वेनेत्याह। नएवेति। तथाचप्रामाणिकत्वाद्गौरवंनदोषइतिभावः। तथाचेति। एकदेशस्थत्वे
नोपाध्योरभेदकत्वेसिद्धेइत्यर्थः। ननुसुखादिप्रत्यक्षस्थलेचक्षुरादिसन्निकर्षस्याकरणत्वान्निर्हेतो
रभावेनसुखादिवृत्त्यनुदयात्कथंचैतन्यस्यतदंशेप्रत्यक्षत्वमित्याशंक्यान्तस्वबाह्यविषयवत्ताविवेदृष्टा
पक्षात्सुखादिवृत्तिनिक्तस्यनएवेत्याह। सुखेति। प्रत्यक्षत्वमिति। सुखाद्यंशइतिशेषः। नन्वपाध्योः स्वरू
पेणैवभेदकत्वंयुक्तमन्यथानहंहंसुखीत्यादिस्थलेतावत्यान्तिरितिचोदयतिनन्विति। ननूपाध्योरे
ककालीनत्वेनोपधेयभेदाप्रयोजकत्वेभिन्नकालीनयोरेकदेशस्थयोर्घटपटयोर्भेदकत्वप्र संगात्।

33

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० १७

त्व

नचोपाधेयभेदसमये तयोः समकालीनविवक्षितमिति वाच्यं उपधेयाभेदसिद्धावेककालीनोपाधि
हृदयावच्छेदः तस्माच्चोपधेयाभेदशक्तिपरस्य रामरूपत्वात्त्वाघटवेनैकदेशस्थत्वस्यैवाभेदप्रयोजकत्वाद्
स्वरूपाप्रसक्तान्तरमाह। यदि चेति। तथा च स्वप्रयोगाणां स्वादेः वर्त्तमानत्वेन तद्वृत्त्यवच्छिन्नचैतन्यस्य वर्त्तमान
विषयावच्छिन्नचैतन्याभिन्नरूपत्वलक्षणाभावान्नातिव्याप्तिरिति भावः। यद्वा विषयवर्त्तमानत्वाभिधाने
तस्याप्रलक्षणत्वशंकानिरासार्थं नतद्वृत्तिनलक्षणाभिधानार्थं च वृत्तिमानस्यानुपाधित्वेन विषयो
पहितचैतन्ये नैवोक्तातिव्याप्तिनिराकरणात्। अत एव वक्ष्यति उपाधित्वाकारेणानन्वयी व्यावर्त्तको
वर्त्तमान इति ननु सुखादिस्मृतावतिव्याप्तिः स्वभावेऽपि धर्माधर्मिकोऽभ्यन्तः धार्मिकत्वमिसाहिवावरजन्य
वृत्त्यवच्छिन्नचैतन्यप्रतिधर्माधर्मयोर्वर्त्तमानत्वेनोपाधितया तस्य तदुपहितचैतन्याभिन्नतया तत्रा
तिव्याप्तिः अहमहष्टवान्भोगवत्वादिसत्वानुमानजन्यज्ञाने चातिव्याप्तिरिति शंकते। नन्वेवमिति। उराप
कर्मसाक्षात्धर्मादेर्वर्त्तमानत्वेऽपि भिन्नदेशस्थत्वादनुपाधित्वमित्याह तदुक्तं स्वकीयेति। योग्यविषयावच्छि
न्नचैतन्याभिन्नत्वं प्रमाणचैतन्यस्य विषयांशे प्रत्यक्षत्वप्रयोजकमिह विवक्षितं तच्च धर्मादिज्ञाने नायो
ग्यविषयत्वान्नातिव्याप्तिरित्याह। नयोग्यत्वस्येति। प्रत्यक्षयोग्यत्वस्येत्यर्थः। घटादिरूपत्वभावानाश्रयेण

रामः
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाधकमाह अन्यथेति। ननु योग्यत्वविशेषणदाने मिलितवर्त्तमानतासमये ध्वंसवीत्वादिवाक्यजन्यज्ञान
स्य तादृशं चेतन्याभिन्नत्वाभिव्याप्तिः न च पदज्ञानपदार्थस्मरणादिना तत्त्वस्य विनष्टत्वाच्छाब्दज्ञान
समये तन्निवर्त्तनमिति वाच्यं। वेदवाक्यादिविषयजन्यत्वस्य यावद्विषयमनुवर्त्तमानत्वाभ्युपगमादि
त्याशंकातस्यापि प्रत्यक्षज्ञानत्वेन लक्ष्यत्वाभ्युपगमान्नदोष इत्याह। नेत्येवमिति। ननु त्वं सुखी
त्यादिवाक्यात् यमपरोक्षज्ञानं वाक्यस्यैव नित्यत्वाद्दिवाक्यवत्परोक्षज्ञानजनकत्वादन्यथा कुल
मखीनाद्यपि वाक्यं रोत्तरसिद्धिरित्यापत्तेरित्याशंक्याह। दृशमस्त्वमसीति। अयमाशयः न तावत्त्वं सुखी
त्यादिवाक्येन स्वविषयापरोक्षज्ञानजनकं वाक्यत्वाज्ज्योतिष्टोमादिवाक्यवदित्यनुमानात्तस्याप
रोक्षज्ञानहेतुत्वं स्वयोग्यविषयत्वस्य तत्रोपाधित्वाद्दशमस्त्वमसीति तत्त्वमस्यादिवाक्यव्यभिचाराच्च न
च तज्ज्ञानमपि दशमस्त्वादिज्ञानं इन्द्रियाजन्यत्वान्न प्रत्यक्षमिति न व्यभिचार इति वाच्यं। इन्द्रियजन्यत्व
स्य विषयजन्यत्वस्य च प्रत्यक्षलक्षणस्य च दूषितत्वात्। नेत्येवं दशमस्त्वमसीत्यत्रेन्द्रियमेवापरो
क्षज्ञानं जनयतीति संप्रत्यन्ते इन्द्रियाद्दशमत्वज्ञानं न तत्र श्रवणात्त्वागपि न तत्र समानात्। न च श
ब्दसहकृतमिन्द्रियं तत्र कारणमिति वाच्यं। इन्द्रियस्य घटादिप्रत्यक्षेन दर्शनेपक्षणात्। प्रत्यक्षविषयत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० १८

वत्तद्रूपेऽसत्त्वेमानाभावात्। न च तत्त्वपरोक्षज्ञानमेव शब्दादुत्पद्यत इति नियमः कुतः। अपरोक्षज्ञानत्वमपे
क्षणि हन्ति प्रसंगात्। अत एव तत्त्वमसीत्यत्र न परोक्षज्ञानशंकावकाशः। अविद्यानन्मूलसं
सारनिवृत्तिप्रसंगात्। शब्दजन्यस्यैव ज्ञानस्य तत्त्वमस्यादिवाक्यात्मिसादिनारहीयवचनेनना।
विद्यानन्मूलसंसारनिवृत्तेकल्पावगमात् इति। ननु तत्त्वमसि त्वंदशमोसीत्यादिवाक्यजन्यज्ञानस्यै
न्द्रियाजन्यस्यापि योग्यवर्त्तमानविषयत्वमात्रेणापरोक्षत्वाभ्युपगमे पर्वतो वह्निमानित्यादावनु
मितेरपरोक्षत्वापत्तिरिति चेत्। किं सन्निकृष्टे पर्वते जायमानानुमितेः परोक्षत्वमापाद्यते उ
त सन्निकृष्टस्य। आद्ये पर्वतांशे तदापादनं वह्न्यंशे वा। नाद्यः इष्टत्वादित्याह। अत एवेति वि
षयचैतन्याभिन्नज्ञानस्य योग्यवर्तमानविषयस्यापरोक्षत्वाभ्युपगमादित्यर्थः। पर्वतो वह्निमानि
त्यादिज्ञानमपि त्वंदशमोसीत्यादिज्ञानवत् सन्निकृष्टपर्वतांशेऽपरोक्षत्वेनेष्टमित्युक्तं न द्वितीयमाह। पर्वतो
वह्निमानिति। आद्य इति शेषः। द्वितीयं दूषयति। वह्न्यंशे इति न चैवं तज्ज्ञानस्य वह्न्यंशेऽपरोक्षत्वाभावे तच्चोक्त
लक्षणातिव्याप्तिः योग्यवर्तमानविषयत्वेऽपि तद्विशिष्टचैतन्यस्य विषयचैतन्याभेदादित्याह वह्न्यं
शेत्विति। ननु त्वमसीत्यादि साधारणं परोक्षलक्षणं परिकल्प्य पर्वतो वह्निमानित्यादिज्ञानस्य परसिद्धत राम० १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितिभावस्य लक्षणेन प्रत्यक्षलक्षणेनेन गतार्थं । उक्तं भट्टपादैः । सिद्धानुमानमात्रं हि कर्तृत्वं परीक्षकैः । न
सर्वे लौकिकाः सिद्धस्य लक्षणेन निवर्त्तनं । इत्याशंकां प्रतिसिद्धिं वन्त्यंशेन पर्वतांशे इत्याह । तथा चेति
। यथा पर्वतो वह्निमानिति ज्ञानस्य निरुक्तप्रयोजकं तदभाववत्त्वप्रत्यक्षाप्रत्यक्षयोः क्रमात् । तथा प
र्वतं पश्यामि वह्निमनुमिनोमीत्यनुभवोपीत्यर्थः । नैकत्वं तज्ज्ञानस्य साधकं सत्त्वासत्त्वतांशप्रत्यक्षत्वे
ऽपि नु बाधकाभावादपीत्याह । न्यायमतेति । यद्वा तथानुभवस्तत्प्रकारकानुभवः यत्साधितं ज्ञानस्या
परोक्षत्वं स्वरूपपरोक्षत्वांशभेदेन स च पर्वतं पश्यामि वह्निमनुमिनोमीत्यादिरूपः स्वयमपि तत्रासंगच्छते ।
यद्यस्यांशभेदेन परोक्षत्वापरोक्षत्वे स्यातां । अन्यथा पर्वतांशेप्यनुमितिरिति तद्वदन्तो नैयायिकस्य म
ते पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिरित्यर्थः । द्वितीयं दूषयति । असन्निकृष्टेति । असन्निकृष्टपक्षका
नुमितिस्थले वन्यभिचारस्वरूपतदितरसर्वांशेपि न तज्ज्ञानं परोक्षमित्यर्थः । नन्वेवमपि तदर्भिचंदनमितिज्ञा
नस्य चंदनांशे इव सौरभांशे प्रत्यक्षत्वाभावेन तयोः योग्यत्वघटितलक्षणानि व्याप्तिदूषीरेति चेत्तस्य न
तत्तानें चंदनखंडांशे प्रत्यक्षं सौरभांशे परोक्षमिति तथापि तत्र हि विषयघटितयोग्यत्वघटितत्वं न स्यादिति विवक्षि
तस्य लक्षणस्य तत्राभावान्न दोष इत्याह स्फुरभीति । परोक्षमिति । आघ्रात इत्येतस्मिन् तत्तज्ज्ञाने स्फुरन्निः स्व

टी०
१९

नाप्नोति तु चेदनखंडकानुमितिवत्। न च हेतुत्वसिद्धिः परोक्षेपि ज्ञानेन तदभ्युपगमे जातिसांकर्यप्र
संगेन प्रसिद्धं जातिभावस्य तत्र जातित्वानुपपत्तेरेव बाधकत्वात्। न च तत्वापि ज्ञानस्य परोक्षत्वे
पर्वतं पश्यामीत्यनुभावानुपपत्तिः तस्य पर्वतगोचरलिंगपरामर्शादिप्रत्यक्षविषयत्वात्। न तत्र
तज्ज्ञाने प्रत्यक्षत्वलक्षणातिव्याप्तिरिति आशंकां निराकरोति। न चेवमिति। एवं शब्दार्थमाचाह एकत्रेति।
साक्षात्वादेर्जातित्वाभ्युपगमे हि न ह्यनुपपत्तिर्बाधिका स्यात् तदेव नास्ति जातसोपाधि उदासीनस्य
धर्ममात्रस्यैव तस्याभ्युपगमादित्याह। इष्टत्वादिति। ननु घटत्वादिवत् परोक्षत्वापरोक्षत्वयोर
पि जातित्वप्रसिद्धेरवश्यं तदुपगमित्याशंक्य घटत्वादावपि लौकिकेन तत्सिद्धिः प्राक्तनवध्या
दिसंज्ञावत् परिभाषामात्रत्वात् तत्वाच्य प्रमाणं न चैषा एतादृशवनीयादिप्रसिद्धिवत् प्रमाणमूलापन
परिभाषापि त्वार्थे साधयेदित्याह। जातित्वेति। ननु नीलघटत्वादावुपाधित्वप्रसिद्धिवत् घट
त्वादौ जातित्वप्रसिद्धिरपि तार्थे प्रमाणमित्याशंक्य सापि निर्मूलत्वादप्रमाणमित्याह। उपाधित्व
प्रसिद्धिवत् घटत्वादौ जातित्वोपाधित्वयोः प्रमाणसिद्धत्वात् तत्प्रसिद्धेः प्रमाणमूलत्वाभावो सिद्धे
रसत्वनत्र आह। सकलेति। घटत्वनीलघटत्वयो जातित्वोपाधित्वयोरविशेषः। अत एव घटत्वादि राम०
१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातित्वप्रमाणमाशंक्य निरस्यति घटोयमिति। घटत्वादेर्जातित्वे किं प्रत्यक्षमनुमानं वा तत्राद्यं नि
रस्य द्वितीयं निरस्यति जातित्वेति। घटत्वादिकं जातिः उपाधिभिन्नसामान्यधर्मत्वात्सत्तावदि
त्यनुमानं न तज्जातित्वे मानं नित्यैकत्वानेकसमवेतत्वलक्षणजातित्वाप्रसिद्धेन निरूपितव्याप्त्या
दिज्ञानाभावेन तत्साध्यकानुमानायोगादित्यर्थः। न च नित्यघटितजातित्वाप्रसिद्धावपि तत्तद्घटि
तनित्यैकत्वानेकसमवेतत्वानामात्माकाशघटादिषु प्रसिद्धत्वान्न घटत्वादेर्नित्यत्वसंशया
नन्तरं तद्विशिष्टे नैकत्वसंशयः ततस्तदुभयविशिष्टेऽनेकसमवेतत्वसंशय इति संशयरूपसा
ध्याप्रसिद्धिः पूर्वपूर्वस्यानेनानुमाने पक्षतावच्छेदकत्वेन निश्चयरूपविशिष्टसाध्यप्रसिद्धेर्वा संभ
वात्तत्साधकानुमानं संभवतीति चेन्नानित्यैकत्वप्रसिद्धावपि समवायस्याप्रामाणिकत्वेन त
द्घटितसाध्याप्रसिद्धेः। न च रूपी घट इति ज्ञानं संबंधविषयकं विशिष्टज्ञानत्वाद्दण्डी पुरुष इति
ज्ञानवदित्यनुमानं तत्समवाये मानमिति वाच्यं। घटाभाववद्भूतलमिति ज्ञानवत्स्वरूपसं
बंधमादायापि तदुपपत्तेः इह तन्तुषु पटसमवाय इति प्रत्यक्षं न तन्तुपटसंबंधे प्रमाणेन
तु नित्यसंबंधत्वलक्षणसमवायत्वेपि ब्रह्मभिन्ननिखिलप्रपंचस्यानित्यत्वावगमनात्ताद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
२०

शनित्यसंबंधासिद्धिरिति। ननु संयोगभिन्नसाक्षात्संबंधत्वं समवायत्वं तच्च नित्यत्वाद्विशेषणं तंतुघटसम
वायाभ्युपगमेपि न च पंचानित्यत्वश्रुतिविरोधः ततश्चानेकसमवेतत्वघटितसाध्यस्यसिद्धिरपि स
संपादितेति यदि ब्रूयात्तदाप्युपेत्य च न च समवायस्य कृते तदभावेन तद्घटितसाध्यस्य बाधितत्वात्
नुमानावकाशस्साह। समवायासिद्धेति। इह तंतुषु पटः समवाय इति प्रत्यक्षेणान्यत्र समवायासि
द्धावपि इह घटत्वमिति प्रतीतेः सत्त्वे सत्त्वमितिवत्स्वरूपसंबंधेनाप्युपपत्तेः न घटत्वादौ समवा
यसिद्धिरितिभावः। अनित्यतयेति पृथिव्याकाशगतकार्यत्वस्य निखिलस्य पंचस्य कृतकत्वानुमा
नेन तद्धेतुघटितसाध्यस्यानित्यत्वावगमादितिभावः। असिद्धेरिति बाधादितिभावः। उक्तरूपेण
रूपाधित्वेप्यतिरिक्तानि। एवमिति। नीलघटत्वादिरूपाधिलेन मानाभावादितिसर्वः। ननु पूर्वोक्तस्वलापर
श्लत्वेपाजातित्वाभावविरुद्धयोः कथमेकत्रज्ञानेऽथ निरासांशकावच्छेतयोरनुपपत्तिश्चेत्तन्नेवा
श्राद्यतदाश्रयत्वसंभेदान्नविरोधस्समभिन्नसहितीयसंयोगतद्ध्वंसत्ताभाववदवच्छेदकभेदेनैव
तन्मयत्वस्याभ्युपगमान्नविरोधस्साह। पर्वतइति। ननु घटाकारावच्छिन्नचेतस्यतदुत्पत्तिपरिणामा
वच्छिन्नचेतन्याभिन्नतयातस्यतद्देशेपिप्रत्यक्षत्वापत्तिः न च स्वाकारांतःकरणवृत्त्युपहितत्वस्यापि सम०
२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयविशेषणत्वान्नातिप्रसंग इति वाच्यं शुक्तिरूप्यादेरविद्यावृत्त्युपहितस्यांतःकरणवृत्त्युपहितत्वा
भावेन भ्रमत्वसंरक्षायाप्तेः सर्वेश्वरज्ञानस्य मायावृत्तिरूपत्वेन तदवच्छिन्नचैतन्यस्य प्रपंचाकारां
तःकरणवृत्तिरिति परमेश्वरज्ञानादौ नातिव्याप्तिरिति वाच्यं। अस्मदादेरीश्वरज्ञानस्य समयपरिमाणा
देः सर्वगतपरमेश्वरीयमायावृत्तिगोचरत्वेन तद्देशतत्संगतात्वस्यात्। किंचहरभिवंदनमि
न्द्रियज्ञानेसोरभांशे वसक्ष्यतास्याद्देवाद्याकारवृत्त्युपहितयोग्यविषयचैतन्याभिव्यक्त्वा। नचतत्तदिंद्रि
ययोग्यत्वं योग्यपदेन विवक्षितं। तथा सति प्रत्युक्तिरूप्यभ्रमे स्वाप्नगजादिभ्रमे चाव्याप्तिः। अंतःक
रणतद्धर्माणां साक्षियोग्यत्वान्न दोष इति चेन्न धर्मादेरपि प्रमाणायोग्यपारहाणसाक्षिविषयत्वेन तज्ज्ञानेऽति
व्याप्तेः केवलसाक्षियोग्यत्वविवक्षायां च साक्षिपदेनांतःकरणोपहितचैतन्याभिधाने जीवसाक्ष्य
योग्यसाधारणमिति परमेश्वरज्ञानेनाव्याप्तिरिति चेन्न। जीवेश्वरसाक्षिसाधारणस्य साक्षित्वस्यानि
र्वचनात् निर्वचने वा धर्मादावीश्वरसाक्षियोग्यत्वमादाय तज्ज्ञानेऽतिव्याप्तितादवस्थ्यात् नच जी
वसाक्षित्वस्यानिर्वचनात् निर्वचने वा धर्मादावीश्वरसाक्षियोग्यत्वमादाय तज्ज्ञानेऽतिव्याप्तिता
दवस्थ्यात् नच जीवसाक्षियोग्यत्वघटितमेवेह प्रयोजकं विवक्षितं। जीवत्वस्य सक्षत्वस्यैव लक्ष्यत्वोन्न

41

टी॰ २१

श्वरप्रत्यक्षेऽव्याप्तिर्दोषइतिवाच्यं एतद्वृत्त्यप्रत्यक्षसामान्यलक्षणस्याभावात् तस्मादुक्तप्रत्यक्ष
लक्षणं न युक्तमिति उच्यते तत्तदिंद्रियजन्यत्वे केवलसाक्ष्यत्वेन्यतरयोग्यतत्तत्साक्षिजन्यतत्तदाकार
वृत्त्युपहितविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तत्साक्षिजन्यतत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य त
त्तद्विषयांशे प्रत्यक्षत्वं साक्षित्वज्ञानोपाधानोपहितं चैतन्यं वृत्तिलक्षणज्ञानोपाधानं च मायांतः
करणमिति द्वयुपहितयोर्जीवेश्वरयोः साक्षिणोर्न लक्षणाव्याप्तिः तथा च घटज्ञानस्य तत्तदुक्तपरि
माणांशे प्रत्यक्षत्वं तस्य तदा परमेश्वरीयसाक्षिजन्यवृत्तिगोचरत्वेपि तद्वृत्तेरस्मदादिसाक्ष्यजन्य
त्वेन तत्साक्षिजन्यस्वाकारवृत्त्युपहितविषयचैतन्याभिन्नत्वाभावात्। नापिधर्मादिज्ञानेऽतिव्या
प्तिः तस्यास्मदादिसाक्षियोग्यत्वाभावात्। तदेतत्सर्वमभिप्रेत्याह तद्योग्येति। लक्षणघटकविशिष्ट
विशेषणानां प्रयोजनं सिद्धं सतीत्यर्थः। ननूक्तप्रत्यक्षलक्षणस्य घटादावव्याप्तिरित्याशंकानाह
श्रावृत्त्यवच्छिन्नचैतन्यस्यैव प्रत्यक्षत्वात्तद्व्यावर्त्तनं दर्शयन्नाह। तत्तदाकारेति। विषयस्य प्रत्यक्ष
त्वप्रयोजकीभूतनिरूपणान्तःप्रत्यक्षस्य एवं साशंकातत्रास्य प्रयोजनमस्तीत्याह। घटादेरिति। नन्वश
ब्दोलक्षणांतरव्यावृत्त्यर्थः इंद्रियजन्यज्ञानविषयत्वं स्वज्ञानजनकेंद्रियसन्निकर्षाश्रयत्वमन्यद्वा रा॰म॰ २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयप्रत्यक्षलक्षणं न भवतीत्यर्थः। न्यायमतेऽनुमिते मनइंद्रियजन्यत्वेन तद्विषयप्रमाणे वादाउ
त्तलक्षणस्यातिव्यापकत्वाद् तः करणनद्धर्मादि व्यापकत्वाच्चेति भावः। प्रमात्रभिन्नत्वमिति। यद्य
पि प्रत्यक्षज्ञानविषयत्वं विषयस्य प्रत्यक्षत्वं ज्ञाने च प्रत्यक्षत्वं पूर्वोक्तविषयचैतन्याभिन्नत्वं वि
वक्षितमिति स्वांशे प्रत्यक्षमनुमित्यादिज्ञानमादायानुमेयादौ नातिप्रसंगः। तद्विषयत्वं चैतादृ
शवृत्त्यवच्छिन्नचैतन्यस्य तद्विषयांशे प्रत्यक्षत्वं तत्त्वमिति नै सौरभादौ न तत्प्रसंगः। यद्वा योग्यत्वे
सति विषयचैतन्याभिन्नप्रमाणचैतन्यत्वं घटादेर्विषयस्य प्रत्यक्षत्वं तथापि विषयस्यापरोक्ष
त्वं संविदभेदादिति विवरणे न च तत्र च सांप्रदायिकैः प्रमातृभेदस्यैव विषयप्रत्यक्षलक्षणत्वेना
भिधानादेवमुक्तं। न च विज्ञानवादापत्तिः यात्किंचित्साम्यस्य सर्वसिद्धांतेपि तुल्यत्वात् द्विषयस्य संवि
दभेदेपि विज्ञानक्षणिकत्वविषयासत्त्वादेरनभ्युपगमेन सर्वसाम्याभावात् न तु प्रमात्रभेदो स्यंतः
करणविशिष्टचैतन्याभेदः स च न विषयप्रत्यक्षव्यवहारप्रयोजकः। जडस्य घटादेः तदभेदायो
गात् न च प्रमात्रभेदज्ञानविषयत्वं विषयस्य प्रत्यक्षत्वं अंतःकरणस्येंद्रियद्वारा घटादिदेशनिर्ग
मेनेन तदवच्छिन्नस्य प्रमातुः विषयचैतन्याभिन्नतया घटः सन्निति विषयचैतन्याभेद प्रसयपसतरभेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
२२

प्रत्ययत्वात् अनुमित्यादिस्थले च प्रमात्वविषयत्वेन तन्मात्रभिन्नत्वपात्रत्वासीन तद्भेद प्रत्ययस्य प्रमात्वभे
दविषयत्वाभावात् नातिव्याप्तिरितिवाच्यं। विषयत्वेन तन्मात्रस्य न तथा प्रमात्वभेदेपि अहं मनुष्य इतिवद् अहं
घट इति प्रतीत्यापत्तेः अहमिमं पश्यामीति प्रमात्वभेद प्रत्यक्षविरोधेन च घटः सन्नित्यादि प्रतीते
स्तद्भेदविषयत्वाभावात् तस्यानयुक्तमिदं लक्षणमिति चोदयति। नन्विति। सिद्धान्तवादी तु प्रमा
त्वभिन्नत्वं नाम न तावदेकपनवात् तद्भेद भ्रमविषयत्वं किं तु अन्यदेव तद्विवक्षितमित्याह। उच्यत इ
ति। ननु प्रमात्वभेदयनिघसत्ताजातिरेकत्वेन तन्निष्ठसत्तातिरिक्तसत्ताया अप्रसिद्धेः प्रसिद्धौ वा
वन्ह्यादेरनुमेयस्यापि प्रमात्वनिष्ठसत्त्वात्वे नातिव्याप्तिः प्रमात्वरूपत्वविवक्षायां घटः सन्नित्यादि
प्रतीतिसिद्धायाः घटादिसत्तायाः प्रमात्वलक्षणसत्तातिरिक्तत्वेन न तत्र लक्षणव्याप्तिरित्यत आह
तथा चेति। प्रमात्वलक्षणसत्तातिरिक्तसत्ताकत्वाभावे लक्षणे विवक्षिते सति घटादेरपरोक्षसिद्ध
मिति संबंधः किं घटादेरतिरिक्तसत्ताजातिमत्वात् चातिव्याप्तिः। अबाधितत्वलक्षणसत्ताधर्ममेव
त्वाद्वा प्रमात्वघनिरिक्तविषयत्वेन तन्मात्रलक्षणसत्तावत्त्वाद्वा। नत्राघमतिरिक्तसत्ताजात्यनभ्युपग
मान्निराकृतसद्वितीयं निरस्यति। घटादेरिति। ननु घटादेरपि घटः सन्नित्यादिप्रतीतिबलादस्त्वतिरिक्तं सत्त्वं

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न चासौ भ्रमः तथाप्यनिर्वचनीयसत्त्वधर्मसंभवादित्यत आह अधिष्ठानेति। तत्त्वतीतेरधिष्ठानस
त्ताविषयत्वेन तदंशेऽन्यथाख्यातित्वात् अनिर्वचनीयसत्त्वासिद्धिरिति भावः। त्वनीयं निरवचेष्टा। विषये
ति। ननु चैतन्यसत्तातिरिक्तसत्ताकत्वाभाव एव लक्षणमस्तु तस्य घटादावपि सत्त्वाद्घवाद्यस्त्वेत्या
शंक्य भ्रमात्वविशेषणवैयर्थ्यमाह। भ्रमेति। सा हीति। ननु भ्रमात्वघटितलक्षणस्य वह्न्यादा
वतिव्याप्त्यभावेपि स्ववृत्तिधर्मादावतिव्याप्तिर्दुर्वारेति शंकते नन्वेवमपीति। योग्यत्वस्येति। तत्तदिं
द्रियतत्त्वे केवलसाक्ष्यन्यतरयोग्यत्वस्येत्यर्थः। नन्वेवं वृत्तावव्याप्तिः तस्याः स्वगोचरत्वेमानाभा
वाद्वृत्तंतराभ्युपगमेऽनवस्थानाच्च तत्र साकारवृत्त्युपहितत्वघटितलक्षणाभावात् न च वृत्तिः स्व
विषयाज्ञाननाशकत्वे स्वरूपनिरस्यज्ञानवदित्यनुमानं तत्र मानमिति वाच्यं वृत्तौ ज्ञानत्वाभावेन हेतोः स्व
रूपासिद्धत्वात्। वृत्तिलक्षणज्ञानत्वविवक्षायां दृष्टांते साधनवैकल्यात्। उभयसाधारणमिति चेन्न।
चक्षुरादेरपि करणव्युत्पत्त्या तत्सद्भावात्वेन व्यभिचारात् वृत्तेर्ज्ञानपदस्य गौणत्वेन तत्र तत्त्वा
च्यत्वाभावात्। आत्मत्वस्योपाधित्वाद्वृत्तिर्न स्वविषयाजडत्वाद्घटवदिति अनुमानेन प्रतिरोधाच्च। किं
च वृत्तेः स्वविषयत्वेनात्मवत्स्वप्रकाशत्वापत्तिः नचेष्टापत्तिः वृत्तेर्न स्वप्रकाशत्वमिति सिद्धांतभंगापत्तेः। न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चवृत्तिरपिस्वप्रकाशास्वसत्तायांप्रकाशाव्यभिचारित्वावगमाहात्मवदितिवाच्यंसुखादेरव्यभिचारत्व
टी० २३ चतत्रापीष्टंस्वप्रकाशत्वंतत्रतदाकारवृत्त्यभ्युपगमात् स्वप्रकाशात्मसंबंधेनैवान्येषांप्रकाशोप
पत्तावनेकस्वप्रकाशत्वकल्पनेगौरवात् आत्मैवास्यज्योतिरितिश्रुतिविरोधाच्चतस्मादयुक्तंवृ
त्तेः स्वविषयत्वंनतत्प्रदृष्टांतबलवल्लक्षणाव्याप्तिरितिशंकते। नन्वेवमिति। स्वाकारवृत्त्युपहितत्व
स्यप्रभानत्वविशेषणस्यार्थः। परिहरति। नानवस्थेति। इदमत्राकूतं। अस्तितावद्वृत्तिगोचरानु
भवः। घटमहंजानामीतिसचनवृ त्त्यंतरंतत्रापिवृत्त्यंतराभ्युपगमाच्चत्तोऽनवस्थापातात्। न
चचैतन्यमेवतत्रानुभवः। तथासतिव्यवहितपदार्थस्यापितेनभानप्रसंगात्। सन्निहितप्रकाशक
त्वेचघटज्ञानसमयेतदूनपरिमाणादेरपितस्यसंगात्स्वसत्तायांप्रकाशव्यभिचारादावरणभंगा
र्थपरिमाणादौवृत्त्यभ्युपगमइतिचेत्तर्हिसुखादेर्वृत्तिविनापिचैतन्येनप्रकाशप्रसंगात्। यदिचप्रत्य
क्षत्वसिद्धयेचैतन्यलक्षणानुभवस्याविनाशिनः संस्कारजनकत्वाभावेनस्मरणानुपपत्तयेचसुखा
दौतदाकारवृत्त्यभ्युपगमइतितदाप्रकृतेपितुल्यं एवंचवृत्तिः स्वविषयात्रमाप्रकाशत्वेसतिप्रका। रा०म० २३
श्यमानत्वादात्मवदित्यनुमानंवृत्तिविषयत्वेप्रमाणं। नचात्रात्मत्वमुपाधिः सर्वेज्ञानगुणइतिश्रु

45

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुमितेर्व्याप्यमतेपि स्वविषयत्वाभ्युपगमेन न तत्र व्यभिचारेणोपाधेः साध्याव्यापकत्वात् अत एव न स्वविषय
त्वाभावसाधकेन जडत्वेन स्वप्रकाशत्वविरोधः। उक्तानुमितौ व्यभिचारान्न च वृत्तेः स्वविषयत्वे स्वप्रकाशत्वाप
त्तिः जडत्वेन तस्याः स्वावच्छिन्नचैतन्ये स्वप्रकाशत्वाभ्युपगमादिति। एवं वृत्तावव्याप्तिं निराकृत्य प्राति
भासिकरजतादौ अन्तःकरणान्तरधर्मे चक्रमादिषु नाव्याप्तिरित्याह। एवं चेति। उक्तन्यायेनान्तःकरणादावपि
त्वाकारवृत्तिविषयत्वे सिद्धे इत्यर्थः। तर्हि कथमन्तःकरणादेः केवलसाक्षिवेद्यत्ववचनं इत्याशंक्य प्रमाणव्यापारा
नपेक्षसाक्षीवेद्यत्वं तेन तोन विरोध इत्याशयवानाह केवलेति। इममाशयमजानानस्यायं सिद्धान्त शंकानि
राकरोति। न चेति। स्वाशयमुद्घाटयति। नहीति। न चायमपसिद्धान्त इत्याह। अत एवेति। अहंकारत्ववच्छिन्नमेवं
तःकरणं चैतन्यस्य विषयभावमापद्यते इत्यहंकारटीकाविवरणे इत्यर्थः। अव्याप्तिनिराकरणमुपसंहर
ति तथा चेति। आदिपदात् शुक्तिरूप्यादिपरिग्रहः। न तु ब्रह्मणो ज्ञानरूपत्वेन तत्र लक्षणस्य तत्रा[illegible]व्याप्तिः। न
स्य प्रमाणमात्रसत्तारूपत्वेन तदतिरिक्तसत्ताशून्यत्वात् घटादेश्च प्रमात्रसत्तातिरिक्तव्यावहारिकसत्ताक
त्वेन न तत्राव्याप्तिः। अन्यथा तत्त्वसंसारकालीनबाधाभावलक्षणव्यावहारिकसत्तानभ्युपगमे घटादिज्ञा
ने दृष्टान्तत्वप्रमालक्षणस्याव्याप्तिप्रसंगः। न चान्तःकरणविशिष्टचैतन्यस्य प्रमातृचैतन्यशब्दार्थत्वेन तयानिश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
२५

सत्तायाव्यावहारिकसत्तारूपत्वाद्ब्रह्मणस्तद्व्यतिरिक्तपारमार्थिकसत्ताकत्वेन तत्र नातिव्याप्तिः स्वप्नरूपवघटा
दौ नाव्याप्तिः। तस्य प्रमातृनिष्ठव्यावहारिकसत्ताश्रयत्वाहितिवाच्यं। न ह्यापि व्यावहारिकसत्तायाः सर्वत्रै
कत्वेनवन्ह्यादावतिव्याप्तेः शुक्तिरूप्यादेर्मूलाविद्याकार्यत्वपक्षे तन्निरिक्तसत्ताश्रयत्वेन तत्राव्याप्तेश्च
किंचैवं विषयस्य प्रत्यक्षसामान्यलक्षणायोग्यत्वस्यैवातीन्द्रियधर्मादिष्व्याप्तेस्तस्य सामान्यलक्षणेन पप
त्तौ विशेषणवैयर्थ्यात्। ननु प्रमातृचैतन्याभिन्नत्वमेव प्रमाणाभिन्नत्वमिह विवक्षितं तेन पारमार्थिके ब्रह्म
णि नातिव्याप्तिः घटादेस्त्वज्ञानसमये प्रमातृचैतन्याभिन्नत्वतया नाव्याप्तिः। वन्ह्याद्यधिष्ठानचैतन्यस्या
नुमितिदशायां प्रमातृव्यतिरिक्ततया तद्विषयवन्ह्यादौ नातिव्याप्तिः। घटादेस्त्वज्ञानसमये प्रमातृव्य
तिरिक्ततया तद्विषयवन्ह्यादौ नातिव्याप्तिरिति चेन्न। प्रमातृशब्देनांतःकरणोपलक्षितचैतन्याभिधा
ने वन्ह्यादेरपि तदुपलक्षितचैतन्याभिन्नत्वेन तत्रातिव्याप्तिस्तदवस्थैव विशिष्टाभिधाने च घटादिज्ञा
ने तदधिष्ठानचैतन्यस्यांतःकरणोपहितचैतन्याभेदेपि विशिष्टप्रसभेदाभावेन तत्राव्याप्तेः जातिप्रतिभा
सिकरजतस्य शुक्त्यवच्छिन्नचैतन्याभिन्नत्वस्य स्वमात्रोपलब्धृगज्ञादेः स्वमायापरिणामत्वपक्षे तदवच्छिन्न
चैतन्याभिन्नत्वस्य प्रमातृचैतन्याभिन्नत्वाभावेन तत्राव्याप्तिश्च। किंचैवमंतःकरणविषयोः प्रत्यक्ष रामं०
२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वापत्तिः तयोर्विशिष्टचैतन्याधेयत्वाभावात् नष्टोऽन्तःकरणविशिष्टचैतन्ये अन्तःकरणमध्यस्थत्वेनाऽपि वा
स्मिन्पक्षे तत्ताकारवृत्त्युपहितेति विशेषणवैयर्थ्यापत्तिः घटज्ञानसमये परिमाणादेरन्तःकरणविशिष्टचै
तन्याध्यस्तत्वाभावेन प्रमातृपदेनैव तन्निवारणसम्भवात्। तस्मात् उद्घटं घटादेः प्रत्यक्षमिति उच्यते प्रमातृ
भिन्नत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वं प्रमातृभिन्नं चान्तःकरणावच्छिन्नचैतन्याभेदज्ञानविषयत्वमिह वि
वक्षितं तेन घटमहं जानामीत्यन्तःकरणविशिष्टभेदानुभवेऽपि घटः सन्निहिततदुपहितचैतन्याभेदज्ञानवि
धाभावेन न तत्राव्याप्तिः परिणामादेस्तु तदानीमभेदज्ञानाविषयत्वान्नातिव्याप्तिः। अनुमित्यादिस्थले तु स
न्त्यवच्छिन्नचैतन्यस्यान्तःकरणानुपहितत्वेन वह्न्यादेस्तदभेदज्ञानविषयत्वाभावान्न प्रत्यक्षत्वं अन्नेव
शुक्तिरूप्यस्वाप्नगजादेः साक्ष्यभेदज्ञानविषयत्वात्प्रत्यक्षत्वमेव। एवमविद्यान्तःकरणयोरपि प्रत्यक्षत्व
मुपपादनीयं इदं च लक्षणं विषयस्य तत्तत्प्रत्यक्षत्वव्यवहारप्रयोजकमिति न विशेषणवैयर्थ्यं सामा
न्यलक्षणं तु योग्यत्वमेव तेनेन्द्रियसाक्ष्यन्यतरयोग्यत्वं तत्फलबलकल्प्यमिति न धर्मादावतिप्रसङ्गः
घटाभावादेश्चानुपलब्ध्यापीन्द्रियसाक्ष्ययोग्यत्वान्न प्रत्यक्षत्वं। यथाचेन्द्रिययोग्यत्वं तथाऽग्रे वक्ष्यते
विशेषलक्षणे च। योग्यत्वं तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यत्वं विवक्षितमिति न सौरभादावतिव्याप्तिः।

rr·

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
२५

अत एव शास्त्रप्रतिपाद्यब्रह्मणि न तत्प्रसंगः। स्वप्रकाशस्य तस्याविवक्षितयोग्यत्वाभावात्। यद्वा योग्य
त्वे सति स्वाकारवृत्त्युपहितसाक्षिचैतन्याध्यस्तत्वं विषयस्य प्रत्यक्षत्वं। न चाथ च घटादेः शुद्धचैतन्याध्यस्त
स्यापि स्वज्ञानसमये स्वाधिष्ठानचैतन्यस्य साक्ष्यभेदेन साक्षिण्यध्यस्ततापत्तिः परोक्षत्वं प्रातिभासिक
रजतस्य च साक्षिण्यध्यासान्नातिव्याप्तिः वक्ष्यति च विषयचैतन्येऽध्यस्तमपि रजतं साक्षिण्यध्यस्तमि
ति अत एव स्वप्नोपलब्धगजादेः प्रत्यक्षत्वं तदिंद्रियोपरमेपि अंतःकरणोपाधिकात्तत्स्य च
स्वविशिष्टेऽध्यासाभावेपि स्वोपहितचैतन्येऽध्यस्तत्वात्। अविद्यायां तच्चिन्मात्राश्रितत्वेपि स्वज्ञान
समयेपि साक्षिण्यध्यासात्प्रत्यक्षत्वे परिमाणादेश्च घटाकारवृत्तिदशायां साक्षिण्यध्यस्तत्वेपि तत्स्वा
कारवृत्त्युपहितत्वाभावान्नातिव्याप्तिः तदेतत्सर्वं मनसि निधायाह तदयं निगलितार्थ इति। प्रत्यक्षत्व
मिति। न तत्प्रत्यक्षत्वव्यवहारप्रयोजनमित्यर्थः। सौत्रांतिकास्तु संवेदनगतो विषयाकारप्रतिबिंबः
तथाविधबिंबसन्निधानेऽपरः परः प्रतिबिंबत्वाद्दर्पणादिगतमुखादिप्रतिबिंबवत् इति नित्यानुमे
याविषया इत्याहुः। तन्मते विषयस्य प्रत्यक्षलक्षणाकथनेनापुक्तमिति चेन्न। घटमहं पश्यामीति विषया
परोक्षत्वस्यानुभवसिद्धत्वात् तल्लिंगाद्यप्रतिसंधानेपि तदनुभवदर्शनाच्च। किं च घटादेर्नित्यानुमेयत्वे राम०
२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।तथा सत्यन्वयव्यतिरेकावगतज्ञानहेतुत्वाभावयोरिंद्रियतत्सन्निकर्षयोर्वैयर्थ्यप्रसंगात्त्वन्मते घटा
दिज्ञानस्येंद्रियसन्निकर्षाजन्यत्वात् तस्मान्निरुंघटादिप्रत्यक्षत्वानन्निंद्रियतत्संनिकर्षवैयर्थ्यंसि
द्धं तेपि तुल्यं चेतन्न रूपस्य घटादिज्ञानस्येंद्रियसन्निकर्षाजन्यत्वादिसाशंका तयोर्वृत्तिजनने विनियो
गान्नवैयर्थ्यमित्याह तन्नेति। एवं घटादेः प्रत्यक्षत्वेसिद्धे संयोगसंयुक्ततादात्म्यसंयुक्ताभिन्नतादात्म्या
८५ नामिंद्रियसन्निकर्षाणामिंद्रियस्य च घटत्वे न रूपत्वमरूपत्वाद्यवच्छिन्नचैतन्याभिव्यंजकवृत्तिजनने
विनियोगः स्पष्टः। नन्वेवमपि चैतन्यस्यैव ज्ञानत्वात्तत्सन्निकर्षस्य तत्रानुपयोगस्तदवस्थ एव साक्ष
वयवैयर्थ्यमंतःकरणं चतुर्विधवृत्त्यवच्छिन्नं चतुर्विधमित्युच्यते। एवमज्ञानमपि चैतन्यमिंद्रियस
न्निकर्षजन्यवृत्त्यवच्छिन्नं तज्जन्यमित्याशयेनाह स्याच्चेति। यद्यपि वृत्तिविशिष्टचैतन्यमात्रमित्यत्रवि
शिष्टचैतन्यमोस्येंद्रियसन्निकर्षजन्यत्वमुक्तमेव तथापि तस्यैव दृष्टांतमुखेनात्रोपपादनान्न पौनरुक्त्यं
त्वन्मत्यायथाप्यत्र प्रत्यक्षनिरूपणप्रस्तावेंऽतःकरणचातुर्विध्यनिरूपणमसंगतं स्यादिति दृष्टंबा।उ
ता यैतं सम्मतिमाह। तदुक्तमिति। एवं विषयप्रत्यक्षत्वे प्रयोजकांतरनिरूपणानंतरं ज्ञानगतमपि ज्ञानस्य प्र
त्यक्षत्वप्रयोजकं निर्दिष्टमित्युक्तं रसानौ नहिभजनेनतत्रेति। सर्ववादिसंमतत्वेन सकलव्यवहारहेतुत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

टी० नप्रथमोद्दिष्टं सविकल्पकं प्रथमं निरूपयतितत्रेति। तयोर्मध्ये इत्यर्थः। वैशिष्ट्यावगाहीति। ननुविशेषण
२६ ज्ञानजन्यत्वमित्यर्थः तज्जन्यत्वस्य प्रमाणाभावेनानभ्युपगमात् वैशिष्ट्यावगाहित्वमिच्छौवपीत्यत्र दा
उक्तं ज्ञानेनेति। ज्ञानत्वंचनिर्विकल्पेपीसतउक्तंवैशिष्ट्यावगाहीति संसर्गानवगाहीति। ननुसविक
ल्पस्यविशेषणज्ञानजन्यत्वमभ्युपगतं नवा आद्ये तदेवसविकल्पस्यलक्षणमस्तु न चेत्कुतो नि
र्विकल्पकत्वसिद्धिः नखल्वनुतदनभ्युपगमेज्ञानगणस्य सविकल्पकंज्ञानं समानाधिकरणविशेषण
ज्ञानजन्यं विशिष्टज्ञानत्वादित्यनुमानं संभवति। नचदृष्टंवनविवेचितमित्यनुभवो निर्विक
ल्पके प्रमाणं अल्पविशेषणाविषयत्वेनापि तदुपपत्तेः तस्मादुदाहरणाभावान्नयुक्तं निर्विक
ल्पलक्षणमित्याशंक्य लोकव्यवहारयोः प्रसक्षासिद्धं तदित्याह। यथेति। यद्यपिज्ञानंस्वविषयमप्यभे
दावगाहित्वप्रमाणं तथापि अर्थात्संसर्गानवगाहित्वसिद्धिरिति भावः। ननुसोयंदेवदत्त इत्येक
त्रस्यामित्र येववाक्यप्रयोगो देशकालोपलक्षितदेवदत्तलक्षणाभेदविषयमिंद्रियजन्यमप्युक्तिप्र
त्यक्षमिति कथंशाब्दमेवोदाहृतमिति चेन्न संसर्गभेदविषयज्ञानमिंद्रियजन्यमितितथापितन्न
निर्विकल्पकं सन्निकर्षवशादुपलक्षणदेशकालादेरपि तत्र भानसंभवाच्छाब्देतुज्ञाने तात्पर्यविष रा०म०
२६

52

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यैस्येवमाननियमादभेदमात्रविषयत्वमित्यतो निर्विकल्पकमिति भावः। प्रकृष्टप्रकाशश्चन्द्र इत्यस्य
ज्ञानमानंदं ब्रह्मेत्यवांतरवाक्यजन्यं ज्ञानं न प्रत्यक्षं इंद्रियाजन्यत्वाज्ज्योतिष्टोमादिवाक्यजन्यज्ञान
वदिति चोदयति। नत्विति शाब्दमिति। इंद्रियजन्यत्वस्यानुमित्यादिसाधारणत्वेन सुखादिप्रत्यक्षा
व्यापकत्वेन च प्रत्यक्षत्वप्रयोजकत्वस्य निराकृतत्वान्नेदं तत्प्रयोजकमित्याह। नहीति तथा
च सुखादिप्रत्यक्षव्यभिचारादप्रयोजकत्वान्नानुमानावतार इति भावः। ननु प्रयोजकांत
रानिरूपणादिंद्रियत्वेन तज्जन्यत्वमेव प्रयोजकमित्याशंकते किं त्विति। प्रयोजकांतरमुक्तं स्मा
रयति। योग्येति॥ विषयस्येत्यादि चैतन्यप्रति उपलक्षणत्वं तेन हा सुखादिस्मरणे प्रत्यक्षत्ववारणा
य वर्तमानपदमिति ध्येयं। उक्तमिति। तदुक्तप्रायमित्यर्थः। नन्वस्त्वमद्यपि प्रत्यक्षत्वप्रयोजकं त
थापि नेदं प्रत्यक्षं व्यवहिते देशकालादिविशिष्टे देवदत्ताकारवृत्त्यवच्छिन्ने चैतन्यस्य विषयचैत
न्याभिन्नत्वादित्याशंक्य नहि देशकालादिसंसर्गविषयमिदं शाब्दज्ञानं किं त्वभेदविषयकं स्वाभे
दश्च देवदत्तलक्षणसंनिहित इति तज्ज्ञानं प्रत्यक्षमित्याह नत्वेति। निरुक्तस्य प्रयोजकत्वसि
द्ध्यर्थः। नन्वेवमपि तत्त्वमसीत्यादिवाक्यजन्यं ज्ञानं कथं व्यवहितसर्वज्ञत्वादिविशिष्टविषयं प्र

53

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० सक्षं कथं स्यात्तज्ज्ञानं तत्पदार्थाभेदविषयं नाहमीश्वर इत्यादिप्रत्यक्षविरोधादित्याशंक्य न हि न तज्ज्ञानं
२७ कर्तृत्वसर्वज्ञत्वादिविशिष्टभेदविषयं येन तद्विरोधः स्यात् किं तु तत्त्वंपदलक्ष्यस्वरूपविषयं तच्च सन्नि
हितमेवेति तद्विषयमपि ज्ञानं प्रत्यक्षविषयमित्याह। एवमिति। नन्वेवमपि सोयं देवदत्त इत्यादिवा
क्यजन्यज्ञानस्य निर्विकल्पकत्वं गामानयेत्यादिवाक्यजन्यज्ञानवत् संसर्गावगाहित्वादित्याशं
क्याह। नन्विति। गामानयेत्युदाहरणे तत्र उक्तार्थानामन्वययोग्यत्वात्तज्जन्यज्ञानस्य गोकर्मकमेकदंडक
रणकस्वानयनक्रियाकसंसर्गविषयत्वेपि तत्त्वमसीत्यादौ उक्तार्थानामन्वयानुपपत्तेः ल म ८
क्षितस्य च पदार्थस्यैकत्वेनेतरेतरसंसर्गाभावात् तज्जन्यज्ञानेन संसर्गावगाहित्वानुमानं बाधितमि
त्याह। उच्यत इति। ननु तत्त्वमसीत्यादौ न लक्षणा तत्त्वंपदार्थयोरीश्वरजीवयोः स्वामिभृत्य
भावादिनैवान्वयोपपत्तौ लक्षणाबीजाभावात्। ततश्च तज्जन्यज्ञानं संसर्गविषयमेवेत्याशंक्याविं
स्वामिभृत्यभावा [redacted] देः पदार्थसंसर्गत्वाद्वाक्यगम्यत्वं तन्न तद्विषयत्वाद्वानाद्यः भोजनवक
रेणैसैंधवमानयेत्यत्र नाभिमतस्याश्वादिसंसर्गस्य यथेष्टः प्रवेशयेत्यत्र तद्वत् संसर्गस्य च वाक्यज रा म०
न्यज्ञानविषयत्वापत्तिरित्याह। वाक्येति। न द्वितीयः स्वद्वितीयवस्तुलक्षणएवतात्पर्यविषयत्वादित्याह। २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकृते चेति। अयं भावः अद्वितीयं ब्रह्म वाक्यार्थः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रान्त
स्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति नैनैव रूपेणोपसंहृस ऐतदात्म्य
मिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीति नवकृत्वोऽभ्यस्तस्य च मानान्तरानवगतस्य येनाश्रुतं श्रु
तं भवतीत्यादिवाक्यान्तरोचितस्य मृत्स्नाहृतस्य परशुग्रहणादिदृष्टान्तैरद्वितीयत्वेनोपपादितस्य
ब्रह्मणो ज्ञानाचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्य इत्याचार्योपदेशजनितानिर्वि
चिकित्सानिरतिशयानन्दलक्षणमोक्षफलस्यावगतेस्तस्यैव तात्पर्यविषयत्वात् उपक्रमोपसंहा
रावभ्यासोऽपूर्वता फलं। अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इत्युपमादेस्तात्पर्यग्राहकत्वाभ्युपग
मात्। स्वामिभृत्यभावादिलक्षणवाक्यार्थः। तत्रोपक्रमाद्यभावेन तात्पर्याविषयत्वात्। किंच न तावदिदं
वाक्यं राजपुरुष इत्यादिवदीश्वरजीवयोः स्वामिभृत्यभावं प्रतिपादयति तत्त्वमसीति समानाधिकर
णवाक्यान्तरप्रतीतेः। नापि मृद्घट इतिवत्तादात्म्यं जीवेश्वरयोरनादित्वेन तादात्म्यप्रयोजककार्य
कारणभावादेरभावेन तदयोगात्। केचित्तु पदानामर्थवत्त्वापलक्षणापरिहारार्थं च भिन्नाभिन्नं ब्रह्म
वाक्यार्थ इति तन्न। मिथ्याभेदस्य तत्त्वावेदकश्रुतिप्रतिपाद्यत्वायोगात्।। किंच वाक्यस्य भिन्नाभिन्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
२८

परत्वेन तद्रूपस्य प्रमाणासिद्धत्वात् मुक्तिदशायामपि ब्रह्मणो भिन्नाभिन्नत्वापत्तौ संसारादविशेषप्रसंगः। ननु ब्र
ह्मैवेदं ब्रह्मैव भवतीत्यादिश्रुत्यन्तरे तज्ज्ञानादुक्तनिवृत्तिश्रवणान्मुक्तावस्थं तं भिन्नं ब्रह्मेति चेन्न तावदु
क्तं न शाब्दज्ञानं तदभ्यासो वा अकृतब्रह्मणः कृतश्रवणाभ्यासस्यापि यथापूर्वं संसारोपलब्धेः नापि साक्षा
त्कारः तस्य भिन्नाभिन्नब्रह्मविषयकस्य स्वविषयाभेदनिवर्त्तकत्वायोगात् स्वविषयाभावतया भेदनि
वर्त्तकत्वेऽभेदस्यापि तन्निवृत्तिप्रसंगात्। असंताभेदविषयक एव साक्षात्कार इति चेत्ताभेदनिवृत्तेः
भवतीत्यपूर्वं। असंताभेदाभावेन तस्योपरोक्षज्ञानविषयत्वासिद्धेः भावे वाऽस्मन्मतप्रवेशापत्तेः त
स्मात्तु भिन्नाभिन्नं ब्रह्म वाक्यार्थ इत्यलमतिविस्तरेण। एवं सत्यादिज्ञानवाक्यजन्यज्ञानस्यापि संसर्गा
गोचरत्वमुपपादनीयं ननु सत्यादिवाक्यस्य सत्त्वादिविशिष्टार्थबोधकत्वात्। कथं तज्जन्यज्ञानस्य संस
र्गागोचरत्वं किंचनेदं संसर्गावगाहि अस्य लक्षणावाक्यत्वेन लक्ष्ये लक्षणावैशिष्ट्यबोधकत्वात्। कथं
तज्जन्यज्ञानस्य संसर्गागोचरत्वं किंचनेदं संसर्गावगाहि अस्य लक्षणावाक्यत्वेन लक्ष्ये लक्षणो वैशिष्ट्य
बोधकत्वात्। किंचनेन तज्जन्यज्ञानेन निपादकार्थमात्रावगाहित्वे अलक्षणस्य व्यावृत्तिव्यवहारप्रयो
जनतया सत्यादिवाक्यस्यापि तत्प्रदवाच्यत्वेनान्यावृत्तत्वेन च ब्रह्मबोधकत्वे प्रातिपदिकार्थमात्राव राम०
२८

गाहित्वायोगात्। किंचास्य जातिपदिकार्थमात्रबोधकत्वमपि शक्त्या लक्षणया वा नाद्यः वाक्ये शक्तेरनभ्यु
पगमात् सत्यादिपदानां बाधायोग्यत्वादिविशिष्टतत्तत्पदार्थशक्यतया परिच्छिन्नेन चक्तनिसाम
र्थ्याभावात् अत एव न द्वितीयः वाक्यस्य क्वचिदप्यशक्तत्वेन शक्यसंबन्धलक्षणालक्षणायोगात् प
दानां च विनिगमनाविरहेण प्रत्येकं लक्षणात्वायोगात्। मुख्यार्थानामन्वययोग्यत्वेनान्वयानुपपत्त्य
भावाच्च। न हि तया विना लक्षणा संभवति तथात्वे वा पदान्तरवैयर्थ्यप्रसंगात्। अपि च सत्यादिपदाना
नैकार्थमात्रपरत्वेन यथा सन्ति हस्तकर इत्यादिवत्पर्यायापत्तेः। एवं च प्रयोगः सत्यादिवाक्यं संसृष्टा
र्थबोधकं स्वोपस्थापितपदार्थान्योन्यसंसर्गबोधकवाक्यत्वात् ज्योतिष्टोमादिवाक्यवत्। न च जर
द्गवादिवाक्ये व्यभिचारः तस्याकांक्षादिमत्त्वाभावेन वाक्याभासत्वात् आकांक्षासन्निधियोग्यतावं
ति पदानि वाक्यमिति हि वाक्यविदः न च विपक्षे बाधकाभावः संसर्गबोधकत्वे वाक्यत्वाभावप्र
संगस्यैव बाधकत्वात् तस्मान्न सत्यादिवाक्यजन्यज्ञानं निर्विकल्पकमिति उच्येत सत्यादिवाक्यं संसा
र्गोचरज्ञानजनकं स्वरूपलक्षणवाक्यत्वात् जातिपदिकार्थमात्रपरत्वाद्वा प्रकृष्टप्रकाशश्चंद्र इति वा
क्यवत् न च दृष्टान्तसाधनवैकल्यं अस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति जातिपदिकार्थमात्रविषयप्रश्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० दृष्टिनेन प्रतिवचनस्यापि तत्त्वातिपदीकार्थमात्रपरत्वात् अन्यथा प्रतिवचनस्य प्रश्नाननुरूपत्वापत्तेः
२९ न च प्रश्ने चंद्रस्य साधारणधर्मस्यातव्यावृत्तेश्चंद्रपदप्रवृत्तस्य वा विषयत्वात्सोपि न तन्मात्रपर इति वा
च्यं। असाधारणधर्मस्य प्रकाशविशेषस्य चंद्रे प्रत्यक्षेणावगतत्वात् अत एव नातद्वृत्तिपरः प्रश्नः।
चंद्रो चप्रव्यावृत्त इति निश्चितत्वात् नापि चंद्रपदवाच्यत्वं तद्विषयः अयं चंद्रपदवाच्य इति ज्ञातत्वा
त्। तर्हि कथं संशय इति चेत् चंद्रत्वस्य तत्र वैशिष्ट्यस्य वा चंद्रपदवाच्यत्वज्ञाने तत्त्वेन सज्ञानेन तत्र
तत्संशयसंभवात्। अत एव लोके तदनुभवः चंद्रश्चंद्रपदवाच्य इति। जानामि तत्स्वरूपं तु न जाना
मि तदेव किमिति पृच्छामीति न चैवमपि लक्षणवाक्यादतव्यावृत्तिवैशिष्ट्यप्रतीतेर्विशिष्टार्थपर
त्वात् दृष्टान्तदार्ष्टान्तिकयोः साधनवैकल्पसाम्यबाधश्चेति पूर्वोक्तं अतव्यावृत्तवाचकपदाभावेन
साक्षाद्बोधकस्य लक्षणवाक्यस्यार्थात्तद्बोधकस्य लक्षणवाक्यस्यार्थात्तद्बोधकत्वेपि न सरख्या
भावात् न हि गामानयेति वाक्यं अर्थादश्वानयनव्यावृत्तिबोधकमपि न संभवति। तथा चाहुः शब
रस्वामिनः यच्चार्थादर्थो न स चोदनार्थ इति। ब्राह्मणश्चातव्यावृत्तिस्वरूपत्वेन तत्र तद्वैशिष्ट्याभा
वात् चंद्रत्वतव्यावृत्तेश्चंद्रत्वरूपत्वेपि तस्य तत्त्वातिपदिकार्थत्वेन वाक्यस्य वस्तुतः प्रातिपदिकार्थमात्र ए०म०
२९

परत्वस्यानपायात्तामिच न लक्षणाऽनुपपत्तिः अर्थवादकेपि लक्षणास्वीकारात् लाघवेन तात्पर्यसंबं
धस्यैव लक्षणत्वात्। अर्थवैकपदे एव लक्षणा न च नियामकाभावः विशेष्यवाचकपदस्यैव निया
मकत्वात्। न च पदांतरवैयर्थ्यं तत्समभिव्याहारवशादेव तस्य तत्परत्वावगमात् एतावतैव वाक्यांतरं
स्वरमित्युच्यते। अत एव गंभीरायां नद्यां घोषः प्रतिवसति चित्रगुमानय यस्त्वचनदीपदगोपदयोस्तीरादि
पदार्थलक्षणायामपि न पदांतरवैयर्थ्यं यद्वा सर्वपदे एव लक्षणा यत्तु नानेकघात्मकस्वरूपख्यातिः
नैवैकैकपदार्थत्वरूपलक्षणस्य संभविदानेकात्मकस्यैकैकेनालाभात्। तत्र प्रवृत्तिपदे लक्षणाभ्युपगमे
पि न पदांतरवैयर्थ्यं। नञ्ब्रह्मश्वकाशादिपदेषु च सत्सादिपदेषु च जहल्लक्षणायां च प्रादेन्यस्य प्रती
त्यापत्तिः अजहल्लक्षणायां विशिष्टार्थप्रतिपत्तिर्दुर्वारेति चेन्न। जहदजहल्लक्षणायां च शक्तेरेव
वाच्यैकदेशस्योपस्थितिरिति सांप्रदायिकाः गौरनित्यः सास्नादिवद्विशिष्टशक्तस्य पदस्य वाच्यैकदेशविशे
ष्यपरत्वेऽपि न लक्षणा शक्त्यैव तस्य स्वातंत्र्येणोपस्थितत्वात् तस्यानन्योपस्थितेर्यथाहि सर्ग। अत एव गौ
र्नित्येन गोत्वस्य स्वातंत्र्येणोपस्थितेर्न लक्षणेत्यस्मन्निरुक्तचरणाः। युक्तं चैतत् न च स्वाद्दोषाभावा
ल्लक्षणापक्षे हि प्रमाणांतरानवगतस्य ब्रह्मणः ज्ञातत्वान्न रूपेण लक्षणया नोपस्थितिस्तदुपस्थि

59

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्ठपदार्थानेरेणोत्तनवस्थान चात्र पर्यायताशंकापि विशिष्टशक्त्याऽभ्युपगमात् नैवं वलक्षणाऽनभ्युप
टी० गमेऽशक्यपस्थितानां वृत्तिविशेषबाधायोग्यत्वापरिच्छिन्नत्वसर्वात्मत्वविशिष्टपदार्थानां भेदेन परस्प
३८ रान्वयबाधापत्तिरित्युक्तमिति वाच्यं तत्तत्पदविषयाभेदस्य विशिष्टपदार्थेष्वसंभवे न च काशेविशे
षोपलक्षितचैतन्यस्य ज्ञानानंदाद्यात्मकस्य तदभेदलक्षणस्य ब्रह्मणः शब्दाज्ञानविषयत्वात् । अत
एव सोयं देवदत्त तत्त्वमसीत्यत्र शक्त्या विशिष्टपदार्थोपस्थितावपि योग्यताबलाद्विशेष्यस्वरूपमे
वाभेदान्वययोग्यबोधविषय इति चतुर्थे वक्ष्यते ततश्च सिद्धं सत्यादिवाक्यजन्यज्ञानस्य निर्विकल्प
कत्वमिति एवं तत्त्वमस्यहं ब्रह्मास्मि अयमात्मा ब्रह्मेत्यादिमहावाक्यस्यापि तत्पदार्थमात्रपरत्वा
त्तन्मात्रावगाहिज्ञानजनकत्वमुक्तं । इदानीमखण्डार्थत्वप्रसिद्धिरपि निर्विकल्पकहेतुत्वेन माण
मित्याह । इदमेवेति । यत्संसर्गानवगाहियथार्थज्ञानजनकत्वं इदमेव तत्त्वमस्यादिवाक्यानामख
ण्डार्थत्वं न तु निर्भेदवस्तुपरत्वं तस्य भेदाभावविशिष्टवस्तुपरत्वस्य निर्धर्मकत्वमित्यादिवाक्यसा
धारण्यात् स्वकृतेतरभावाद्भिन्नचान्यदखण्डार्थत्वं तस्यानिर्वचनादिति भावः । राजपुरुष इत्यादौ संस
र्गपरे वाक्येऽनिवाप्तिनिवारणायोक्तं संसर्गानवगाहीति तच्चैवाभेदनान्वयेऽभ्रमात्सदार्थसंसर्गानवगा रा०म० ७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हितत्वमेदत्वमजनकेतत्वसंगवारणायययथार्थेति। अत्र चत्ववाचार्थनिरूपितसंसर्गागोचरत्वंस्थोप
स्थापितपदार्थसंसर्गागोचरत्वंवासंसर्गानवगाहिपदेनविवक्षितमितितेननचाव्याप्त्योःव्याप्तिः
संयोगः नित्यसंबंधः समवायश्चात्रैचनातिव्याप्तिः लक्षणायानदुपहितशब्दत्वमोजना
द्रोकर्तव्यताभावसंसर्गावगाहिज्ञानाजनकत्वादिदं चोपलक्षणं प्रातिपदिकार्थमात्रपरत्वमखं
डार्थत्वमित्यपिद्रष्टव्यं अत एवोभयत्रचित्सुखाचार्यसंमतिमाह। तदुक्तमिति। या संसर्गी संगिसम्बधी
हेतुनाद्वयमखंडार्थेनोक्तेति संबंधः। लक्ष्यं निर्दिशति गिरामिति। कार्यकारणभावाहितद्रव्यविष
यसमानाधिकरणपर्यायशब्दानामित्यर्थः नतु नःप्रातिपदिकार्थेनेत्यस्य चतुर्थपादस्यसाकांक्ष
त्वादानर्थक्यमखंडार्थपदानुषंगे च संसर्गपरे हि वाक्ये प्रातिपदिकार्थप्रतिपादकत्वसत्वादतिव्याप्ति
रित्याशंक्याह। प्रातिपदिकार्थेति। यस्य वाक्यस्य प्रातिपदिकार्थमात्रपरत्वं तस्य तत्राखंडार्थत्वंच्य
तोनात्र तस्य संगतिरितिप्रदर्शितलक्षणाभिप्रायं तदुदाहरणमिति द्रष्टव्यं। एवं सविकल्पकनिर्विक
ल्पकभेदद्वैविध्येननिरूपितस्य प्रत्यक्षज्ञानस्य प्रकारां तरेणद्वैविध्यमाह तच्चेति। द्वैविध्यप्रकारमे
वाह जीवेति। साक्षिपदं तज्जन्यपरं तथा चेजीवसाक्षिजन्यमीश्वरसाक्षिजन्यमिति द्विविधमित्यर्थः।

61

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
३१

ऽत्र तु एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यमित्युत्तरग्रन्थोऽपि संगच्छते अन्यथाऽस्य साक्षिद्वैवि
ध्यप्रतिपादनपरत्वे प्रत्यक्षज्ञानद्वैविध्यं निरूपितमित्युत्तरग्रन्थो विरुध्येत न च साक्षिद्वैविध्यादर्थात्सि
द्धस्य ज्ञानद्वैविध्यस्योत्तरग्रन्थानुवादो न विरुध्यत इत्युक्तं तथापि सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्ष
ज्ञाननिरूपणानन्तरं साक्षिद्वैविध्यनिरूपणस्यासंगतत्वापत्तेः प्रत्यक्षज्ञानद्वैविध्यं साक्षिद्वैविध्य
निरूपणाधीनमिति तन्निरूपयति। तच्चेत्यादिना। जीवो नामेति। यद्यपि जीवत्वं प्रमाणे निरूपिष्यत
इति नेह तन्निरूपणं युक्तं तथापि जीवसाक्षिणोर्भेदं निरूपयितुं जीवस्वरूपकथनमित्यवधेयम्। अत्र त
एवं व्यावर्त्तकान्तःकरणस्यैकत्वाज्जीवतत्साक्षिणोरभेदमाशंक्य निराचष्टे अन्तःकरणस्येति। ननु वि
शेषणोपाध्योर्वर्त्तमानव्यावर्त्तकत्वेन भेदाभावादन्तःकरणविशिष्टतदुपहितचैतन्ययोर्जीवतत्साक्षि
णोरभेद इत्यत आह विशेषणं चेति। कार्यान्वयीति अत्र बोद्धव्यं पदान्वयित्वेऽन्वयीत्यर्थः। एवमुत्तरत्रा
पि कार्यपदं व्याख्येयं तथा च कार्यान्वयित्वे सति व्यावर्त्तकत्वं विशेषणत्वं पर्यवस्यति। तेन घटपदोप
स्थितिरेव रक्तरूपस्य घटपटयोरेकदर्शने क्रियान्वयित्वेऽपि अव्यावर्त्तकत्वान्न परस्परविशेषणत्वापत्ति
रिति भावः। ननु कर्णशष्कुली नोपाधिः परिचायकत्वात्तथा चोपाधिलक्षणं निर्व्याप्तिरित्याशंक्याह।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वयमेवेति। नन्वेवमपि चेतनस्य जीवत्वान्वयित्वांतःकरणविशेषणत्वं न साक्षित्वान्वयस्तत्र किंविनिग
मकमित्याशंक्य। तस्य कर्तृत्वादिलक्षणजीवत्वान्वयित्वाद्विशेषणत्वं विषयभासकसाक्षित्वानन्वयि
त्वादुपाधित्वमित्यभिप्रेत्याह प्रकृते चेति। नन्वयुक्तं जीवसाक्षित्वलक्षणं प्रमातृप्रमाणतत्फलत्व
निरंकेण तस्यैवासिद्धेः नहि लक्षणेनैव तत्सिद्धिः सिद्ध एव लक्ष्ये तत्प्रणयनात् न च प्रत्यक्षमत्र क्रम
तेवादिविवादाभावप्रसंगात्। न च विषयाभावभासकाभावे जगदांध्यप्रसंगाद्भासकतया तस्य सि
द्धिरिति वाच्यं प्रमाणेन चेतनस्य विषयाभासकत्वात्प्रत्यक्षे एदेतत्कारणत्वास्य मानत्वं तदाश्रयत्वाद
तिरिक्तस्य विषयावभासकस्याभावात् अनपेक्षितत्वाच्च तत्साक्षिप्रमाणप्रयोजनयोरसंभवात्प्रमा
त्रतिरिक्तः साक्षी दुर्निरूप इत्याशंक्याह। स्वयं चेति। स्वयं चेति। अयमाशयः जीवसाक्षी तावदंगी
कर्तव्यः अन्यथा विषयानुसंधानानुपपत्तेः। न चान्यथोपपत्तिः चक्षुरादिकरणतज्जन्यज्ञानानां नाना
त्वेनाननुगततया सर्वविषयानुसंधातृत्वायोगात् प्रमातुश्चाननुगतत्वेपि त्वानुसंधानार्थमापेक्षत्वा
त्साक्षिणस्तु ब्रह्माभेदेन स्वप्रकाशतया निरपेक्षस्यैव स्वपरविषयानुसंधानोपपत्तेः ननु जीवसा
क्षिणः ब्रह्माभेदे न स्वप्रकाशत्वेन तद्देव सर्वविषयानुसंधातृत्वोपपत्तौ चेत्यावगतेनेमेतस्याप्यनुसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ३२

धातृत्वप्रसंग इति चेन्न किं चेत् साक्षिणो मेयावगतविषयानुसंधातृत्वस्य प्रकाशचैतन्याभेदादापाद्यते
सर्वविषयानुसंधानानामापादकत्वान्न द्वितीयः अंतःकरणोपहितस्य जीवसाक्षिणः परमेश्वरेण
मायात्वादिविशिष्टचैतन्याभेदाद्वा चैतन्योपहितचैतन्याभेदाद्वा न तावदाद्यः तस्य निर्विकारत्वेन तदभे
दस्य सर्वविषयानुसंधानानामापादकत्वान्न द्वितीयः अंतःकरणोपहितस्य जीवसाक्षिणः परमेश्व
रेण मायाविशिष्टेन तदुपहितेन वा तेन भेदाभ्युपगमात् न तृतीयः चैतन्ये भेदांतःकरणयोर्भिन्नदेशत्व
त्वेन तदुपहितचैतन्ययोरभेदशंकानवकाशात् ततश्चानुसंधानानुपपत्तिः साक्षिणि प्रमाणं
तथा साक्षी चेता केवलो निर्गुणश्चेत्यागमो ऽपि प्रमात्राद्यतिरेकिणि प्रमाणं। न चायमीश्वरविषयः मा
याविशिष्टे तस्मिन्केवले निर्गुण इति विशेषणानुपपत्तेः। तस्मात्तद्व्यतिरिक्तो जीवसाक्षी स प्रत्यगात्मनो
ऽनवद्यः। नन्वस्तु जीवस्य प्रमात्रादिभावातिरेकेणांतःकरणोपहितत्वेन रूपेण साक्षित्वं तथापीश्वर
साक्षित्वसिद्धिः धर्मिग्राहकमानेन लाघवानुगृहीतेन नित्यज्ञानाश्रयतयैव तत्सिद्धेः। मायाविशिष्टस्य ज
डतया ज्ञानत्वाभावाच्च ततश्च प्रत्यक्षज्ञानं जीवसाक्षिजन्यं चेत् सेव विभागो युक्त इत्याशंक्य न हि मायाविशि
ष्टचैतन्यमीश्वरसाक्षि किंतु मायोपहितं चैवं धर्मिग्राहकमानविरोधाद्धावितं तस्येश्वरसाक्षित्वं। अ राम० ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुमितेर्व्यापकतावच्छेदकमात्रप्रकारत्वेन लाघवोपहितत्वयोरपि कौतैकत्वज्ञाननियतत्वयो रनुमानाविषय-
त्वादित्यभिप्रेत्याह। ईश्वरसाक्षित्वेति। नन्वीश्वरसाक्ष्यपि नानासाक्षित्वाज्जीवसाक्षिवत् तत्तच्च तद्बुद्धे
वत्सकलविषयानुसंधानोपपत्तौ सोपि किंचिज्ज्ञः स्यादित्याशंक्य किमीश्वरसाक्षिणः स्वरूपेणानाना-
त्वमुपाधिरस्तु त्वेन वानाद्यः एकमेवाद्वितीयमित्यादिश्रुत्या चैतन्यरूपस्य तस्यैकत्वावगमान्न द्विती
य इत्याह। नचेति। नेत्यकेयं मायानामकयदुपहितं चैतन्यमीश्वरसाक्षि स्यात्। नानावच्छिन्नाज्ञानां तत्तत्सं-
स्कारकर्मीणां तेषां सादित्वेनानादीश्वरोपाधित्वाभावात् नानाविज्ञानप्रागभावः तस्यानादित्वेपि न
नात्वेन तदुपाधित्वायोगात् अन्यथाईश्वरतत्साक्षिणोरप्यनेकत्वापत्तेः। अनादिभावरूपं ज्ञानं माये
ति चेन्न लक्षणप्रमाणाभावेन तस्य दुर्निरूपत्वात् तथाहि किं तल्लक्षणं ज्ञाननिवर्त्यत्वं वा अनादि
त्वे सति तत्त्वं वा अनादिभावत्वविशेषितमेतद्द्वयं वा आद्यः प्रथमधारावाहिकबुद्धौ भ्रान्तिज्ञा
ने चातिव्याप्तेः न द्वितीयः प्रागभावेपि तस्य त्वान्न तृतीयः अविद्यासंबन्धादौ अतिव्याप्तेः। नान्त्यः तस्या
निर्वचनात् न च निखिलकार्योपादानत्वं तल्लक्षणमात्मनोपि मायावच्छिन्नस्य तत्त्वमनेन प्रपंचोपादान
त्वेन तत्र तस्य संगतत्वात् नाप्येवंविधाज्ञाने प्रमाणोपपत्तिः न च न जानामीत्यनुभवः तत्सम्मतद्रूपसंमत

वे० प०टी०
३३

ज्ञानाभावविषयत्वेनोपपत्तेः। न च ब्रह्मसाक्षात्कारः अज्ञाननिवर्तकः तस्य साक्षात्कारत्वात् शुक्तितत्त्वसा
क्षात्कारवदित्यनुमानं मूलाज्ञाने मानमिति वाच्यं विवेकाग्रहस्य मिथ्याज्ञानस्य वा शुक्तित्वापरोक्षज्ञाननि
वर्त्यत्वेन दृष्टान्तासंप्रतिपत्तेः। प्रागभावनिवृत्त्या अर्थान्तरत्वाच्च तस्माल्लक्षणप्रमाणयोरसंभवान्नास्त्या
तिरिक्तमज्ञानमिति। उच्यते अनाद्युपादानत्वे सति ज्ञाननिवर्त्यमज्ञानं न चासंभवः प्रागभाववद्ध्वंसस्या
पि अज्ञानस्य ज्ञाननिवर्त्यत्वे बाधकाभावान्नातिव्याप्तिः आत्मनोऽनाद्युपादानत्वेपि ज्ञानानिवर्त्य
त्वात्। तन्निवर्त्यस्य चाविद्यादेरनुपादानत्वात् घटाद्युपादानस्य मृत्पिंडादेरनादित्वाभावात्। अथवा
नादिभावत्वे सति ज्ञाननिवर्त्यत्वमज्ञानस्य लक्षणं न चाविद्यासंबंधादावतिव्याप्तिः। अज्ञानस्येव
ज्ञाननिवर्त्यतया तत्संबंधादेस्तन्निवर्त्यत्वेन निवृत्त्युपपत्तेः। नापि मिथ्याज्ञानेन तत्प्रसंगः। उत्पन्नत्व
मनिवृत्ते ज्ञानं विनापि भावात्सादित्वाच्च। न च प्रमाणाभावः न जानामीत्यनुभवस्य सत्त्वात्। न चा
यमनुविषयः मिथ्याज्ञानस्य च ज्ञानत्वाधिकरणत्वात्। ज्ञानाद्यन्याभावस्य चात्मन्यसंभवात् सं
स्कारातिरेकेण ज्ञानध्वंसाभावात् न स्यातीन्द्रियत्वात् नापि वृत्तिज्ञानप्रागभावः तद्विषयः प्रतियोगि
ज्ञानाभावं न तज्ज्ञानायोगात्। यद्विषयेपि कदापि ज्ञानं न भविष्यतीति तत्रापि न न जानामीत्यनुभवाज्ज्ञानदेवं एम०
३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नज्ञानामीत्यनुभवस्तथाविधाज्ज्ञाने प्रमाणं। अनुमानमपि संशयविपर्ययान्तरविषयविषयकं प्रत्यक्षज्ञान
स्यविषयावरणपूर्वकं स्वनिवर्त्यपूर्वकं वा अप्रकाशितार्थप्रकाशकत्वात् अंधकारे घटादिसंशयनिवर्त्तकप्र
दीपप्रभावत् धर्माधर्मादिगोचरशाब्दज्ञानस्य तत्त्वादिसाक्षात्कारस्य च पक्षबहिर्भावान्नांशतो बाधासि
द्धिः। न च वृत्तिज्ञानप्रागभावेनार्थान्तरं न स्यज्ञानस्य निवृत्तिस्वरूपत्वात् अभावत्वेन नानात्वेन च गौर
वादनुमानविषयत्वायोगात् अत एव समवायसाधकमीश्वरसाधकं चानुमाने लाघवादेकमेव समवा
यमीश्वरं साधयतीति प्रसिद्धांतः अत एव विषयगततया आत्मगतादृष्टेन भ्रान्तिज्ञानेन तत्संस्कारे
ण वा नार्थान्तरं लाघवसहकृतानुमानेन एकस्य भावरूपस्य तस्य सिद्धेः अत एवांधकारेण नार्थान्तर
त्वं घटाद्यावरकत्वेपि विषयं चैतन्यावरकत्वायोगात् तच्च न च द्वितीयसाध्ये ध्वंसप्रागभावेनार्थान्तर
तानत्वज्ञानस्य प्रकाशकत्वेनानिवर्त्तकत्वात्तत्वेन तन्निवर्त्त्यस्यैवेह साध्यस्याविवक्षितत्वात् संशयविपर्य
यानन्तरविषयविषयकत्वे सति तदनन्तरनिवृत्तौ निरपेक्षहेतुत्वं अप्रकाशितार्थप्रकाशकत्वेन विवक्षि
तं तत्त्वचद्रीमप्रभायामपि ध्वंजकाभावप्रयुक्तसंशयाद्युत्तरप्रत्यक्षजनिकायामस्तीति न साधनवैकल्यं न
च साप्रत्यक्षज्ञानसापेक्षेति तद्वैकल्यं तादवस्थ्यं। न ह्यसौ संशयादिनिवृत्तौ ज्ञानप्रकाशसापेक्षत्वेपि प्र
त्यक्षज्ञानसंशयादिनिवृत्तौ ज्ञानापनिरूपणसापेक्षत्वात् स्वरूपासिद्धो हेतुरिति। सजातीयबाह्यप्र

67

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
३४

काशानपेक्षत्वात् निरपेक्षपदेन सजातीयप्रकाशनिरपेक्षत्वस्य विवक्षितत्वात्। न चैवं घटादिप्रत्यक्षज्ञा
न संशयादिनिवृत्तौ + वा च्यसिद्धौ तेषामप्रयत्नज्ञानस्यैव प्रमात्वनिश्चयरूपत्वात्। न चैवं घटादि प्रत्य
नाप्यनैकान्तिको हेतुः विपर्यासादेस्तदन्यतरविषयविषयकत्वेपि तन्निवृत्तौ सजातीयबाधज्ञानसा
पेक्षत्वात्। सुखादिसाक्षात्कारस्य च निरपेक्षसंशयादिनिवर्त्तकत्वेपि तदन्यतरविषयत्वाभावात् न
च धारावाहिकद्वितीयादिबुद्धौ व्यभिचारः नैवैकज्ञानत्वाभ्युपगमात्। अत एव न द्वितीयादिप्रभा
दौ व्यभिचारः तत्रापि तन्न्यायेन स्वविरोधिप्रभापर्यन्तस्थायित्वाभ्युपगमात्। मन्दामन्दप्रभयोरपि वेल
क्षण्येपि मन्दप्रभानन्तरभाविप्रौढप्रभायाः स्वविषयके शरीरे वादिसूक्ष्मपदार्थावरणभञ्जकत्वात्
अतिप्रौढप्रभानन्तरभाविनाम्नमन्दप्रभायाः स्वविषयावरणध्वंसकत्वाभावेपि तन्निवृत्ति स्वरूपयो
ग्यत्वात् सूक्ष्मवस्तुसंशयादिनिवर्त्तकत्वाभावाच्च न व्यभिचारः। न चाप्रयोजकत्वं प्रदीपप्रभादे
र्लाघवेन प्रकाशकत्वेनैव स्वविषयावरणनिवर्त्तकत्वस्य ग्रहात् अत एव स्वत्वनुमाने घटादौ लाघवे
न कार्यत्वेनैव कर्तृजन्यत्वग्रहात्तत्राप्रयोजकत्वमिति परस्यापि सिद्धान्तः। तद्देवं लाघवसहकृतानुमानं
पक्षधर्मताबलाद्दन्याघेकभावरूपाज्ञानलक्षणावरणे प्रमाणं नत्वापि मिथ्यार्थे तत्ज्ञानलक्षण राम०
३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यासानुपपत्तिस्तत्र प्रमाणं तथाहि अस्ति तावच्छुक्तौ रजतज्ञानाद्रजतार्थिप्रवृत्तिः सामानाधिकरण्यप्रत्ये
श्चेति सर्वजनसिद्धं न तज्ज्ञानं तु तदवबोधेन नेदं रजतमिति बाधकज्ञानोदयान्मिथ्या तन्मिथ्यात्वं च तत्त्व
रूपेणाबाध्याभावान्मिथ्यात्वं। अर्थस्य प्रतिपन्नोपाधौ पारमार्थिकत्वावच्छिन्नतदभावात्प्रवृत्तिसेद्धस्फुटं न
चैवमपि मिथ्यार्थतदवभासयोरात्मतत्त्वज्ञानाभावाभ्यामेवोपादाननिमित्तकारणाभ्यामुपपत्तेस्तत्कारणतया
नाज्ञानसिद्धिरिति वाच्यं। दोषघटितभ्रान्तिज्ञानप्रयुक्तत्वकारणे सति आत्मतत्त्वज्ञानाभावविलम्बात तद्विलं
बाभावेन तस्य कारणत्वायोगात् हात्मनश्चापरिणामित्वेनानुपादानत्वात् अन्यथाध्यासस्यापि सत्त्वाप
त्तिः तस्मान्मिथ्यार्थज्ञानतदवभासानुपपत्तिस्तदुपादानमिथ्याज्ञाने प्रमाणं नन्वेतत्तज्जडावच्छिन्नचैत
न्यावरणात्तदुत्पन्नविक्षेपहेतुत्वान्न तदवच्छिन्नचैतन्यविषयं न शुक्त्यादिविषयं प्रमाणैकसाध्यत्वात्तस्यग्रह
णसिद्धौ तत्रावरणाभावात् तृतीयं प्रत्यक्षानुमानार्थापत्तयस्तत्र चैतन्यविषयाज्ञाने प्रमाणं शुद्धचैतन्य
विषयमूलाज्ञाने तु प्रयुक्तं ब्रह्मसाक्षात्कारः अनादिभावनिवर्तकः भ्रमोपादाननिवर्तको वात
त्वसाक्षात्कारत्वाच्छुक्त्यपरोक्षज्ञानवदिति। नन्वनुमानादिप्रमाणेन मूलाज्ञानावगमेपि न माया
सिद्धिः मायाविद्ययोर्लोके प्रसिद्धभेदत्वात् नहि मिथ्यारजतोपादानविद्याप्रपञ्चोषधादिना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
३५

मायामयहस्त्यश्वरथादिनिर्माणरीचमांपाविशदं त्रयुंजेतेनचमायाविनिर्मितानिर्वचनीयरथादिदृष्टांते
नचमाणांतरैरेवजगतो मायोपादानत्वसाध्यत्तरनिवार्यं कून्ताज्ञानोपादानस्य मायोपादानत्वायोगा
त् मायायाएवतदुपादानत्वेत्नोकसिद्धमायात्तस्याः स्वाश्रयायामोहकत्वतत्वतत्वत्ताज्ञानानिवर्त्यत्व
ज्ञानानिवर्त्यत्वापत्तेर्मायाप्रयुक्तोबंधः तत्त्वज्ञानान्नन्नी वृत्तिसिद्धांतव्याकोपप्रसंगात् ततश्च चमाया
भावान्नमायासिद्धिरितिमैवंलोकेपिमायाविद्ययोर्भेदासिद्धेः नथाहिनतावल्लक्षणतोलोकेमायाविद्य
योर्भेदः अनाद्यनिर्वचनीयत्वस्यविपर्ययोपादानत्वस्य चलक्षणस्य चमायाविद्ययोरविशेषात् न
तु मेर्वौषधादिसत्यवस्तुत्वं मायानाः निर्वचनीयेति चेन्नतत्रापि प्रसृतिहृप्याद्यध्यासोपादानवस्तुनाद्य
मतस्यानिर्वचनीयाज्ञानस्यैवलाघवेनोपादानत्वकल्पनात्। अन्यथामंत्राद्युपादानत्वेनमायाविनि
र्मितहस्त्यादेरपिसत्यत्वापत्तेः मंत्राद्यनुविधानस्य च काचाद्यनुविधानवन्निमित्तकारणविषयतयाप्यु
पपत्तेः नापिव्यवहारभेदाद्भेदः आवरणविक्षेपोभयशक्तिविशिष्टायामेकस्यामेवावरणशक्तिप्राधान्य
विवक्षयाऽविद्याविक्षेपशक्तिप्राधान्यविवक्षयामायेतिव्यवहारभेदोपपत्तेः। तदुक्तं विवरणावि
वरणाचार्यैः एकस्मिन्नपिवस्तुनिविक्षेपशक्तिप्राधान्येनमायाआच्छादनशक्तिप्राधान्येनाविद्येतिव

रा० न०
३५

70

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वहारभेद इति किंचित्तु मायापरमेश्वरनिष्ठाविद्यादिप्रपंचहेतुः अविद्याजीवनिष्ठा स्वप्नादिभ्रमहेतुः
अत एवं ज्ञो जीवः परमेश्वरस्तु मायावी नित्यमपरोक्ष इत्यनेनैव परीत्येनाब्रह्मसाक्षात्कारेण च जीवगता
ज्ञाने निवर्त्तते विभेदजनकैः ज्ञानैरित्यादिवचनात् न मायां मामेव ये प्रपद्यंते मायामेतां तरंति ते इत्यादि
वचनात्। मायायाः सेतुवर्त्तनमात्रमात्रप्रतिपादनात् अत एवैकमुक्तावप्यन्येषां प्रपंचोपलंभः। वि
यदादिप्रपंचोपादानमायाया अनिवृत्तेः न चैवं मुक्तस्यापि प्रपंचोपलंभापत्तिः प्रपंचदर्शने हेत्वविद्या
याः विच्छेदात् नहि चक्षुष्मतारूपं गृह्यत इत्यंधेनापि तदालोक्यते तस्मात् स्तिमायाविद्ययोर्भेद इति मं
न्मायायाः सत्यत्वमद्वैतहानात् मिथ्यात्वं च ज्ञाननिवर्त्यत्वमत्तानत्वात्। मायामेतां तरंति ते इत्या
दौ तरणं विनाश एव अन्नमयाभ्यसनयोगेन विश्वमायानिवृत्तिरित्यादिश्रुतिविरोधात्। तस्मात्तत्त्वाज्ञान
स्यैव मायात्वात्तदुक्तं मायोपहितचैतन्यमीश्वरसाक्षीति। नन्वात्मतत्त्वाज्ञानं माया न व्यापिन त्वे
कात्सिद्धेः इंद्रो मायाभिरिति बहुवचनश्रुतिविरोधेन लाघवानुगृहीतस्याप्यनुमानस्य मायैकत्व
प्रमाणत्वायोगादिति चेत् शैव मायागतशक्तिभेदविषयत्वात्। न हि तत्र गुणभेदविषयतया बहुवचनोपपत्तेर्न
विरोधः रसाहरं इन्द्रनिशक्तिविशेषेति। एकत्वेपि वह्नेर्दाहप्रकाशनादिशक्तिभेदवन्मायैकत्वेपि प्रपंचवै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० २६ चित्रदर्शनेन तदनुकूलनाशक्त्यभ्युपगमादिति भावः। ननु मायाभिरिति बहुवचनस्यासत्यपि मुख्यार्थे या
गकारणे गुणशक्तिविषयत्वाभिधानयुक्तमित्याशंक्य मायैकत्वश्रुतीनामनेकत्वेन तद्विरोधादेकाबहुव
चनश्रुतिरेवान्यपराकल्प्यत इत्याह। मायांत्विति साहित्येनाएकत्वं निश्चीयत इत्यंते न त्वत्र मायाभेदं वदन्तीवा
दीत्यर्थः। किं मायाभिरिति बहुवचनान्मायाया भेदाभिधानतः मायाविद्याभेदो वा नाद्य इत्याह। मायात्वि
ति न द्वितीय इत्याह। तरतीति व्युत्पत्तिरेवाचतरणं तरति ब्रह्महत्यामित्यादौ निवृत्तौ न तु बन्धयोगात न घाटे
रिवलंघनस्याभावात् मायामविद्यां तरतीति सामानाधिकरण्येन ज्ञाननिवर्त्यकत्वनिर्देशान्न मायाऽ
विद्यातो भिद्यत इति भावः। ननु मायाभिरिति बहुवचनश्रुतिर्मायाभेदविषयैव न तु तदुक्तगुणाभिप्राया
तत्र प्रमाणाभावात् एकवचनत्वग्रह संमार्जनवदुपपत्तेरित्यत आह। अजामिति। नासदासीन्नोस
दासीत्तमआसीदविद्यायामंतरेवर्त्तमानानस्वछ्योवेदयंतरसादिश्रुतयः आदिपदग्राह्याः। ननु
श्रुतिबहुत्वमात्रान्न मायैकत्वसिद्धिः एकेनापि बलवता बहूनां बाधदर्शनादित्याशंक्य लाघवात्य
हादेकत्वश्रुतीनामेव प्राबल्यमित्याह लाघवेति। प्रकृतमीश्वरसाक्ष्यैकत्वमुपसंहरति तेनेत्येति। उ
पाधिभेदेन मायाया एकत्वादित्यर्थः। न केवलमेकमीश्वरसाक्षि किं त्वनादि चेत्याह। तच्चेति। प्रकृतमीश्व राम० ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसाक्षिवशाः परमेश्वरादुद्दंदर्शयितुं तत्स्वरूपमाह। मायेति मायाविशिष्टं चैतन्यं परमेश्वर इत्यर्थः ननु मा
यायाएकत्वेन तद्विशिष्टपरमेश्वरस्यापि तथात्वादैक्येन ब्रह्मविष्णुमहेश्वरव्यपदेशानुपपत्तिरित्याशं
क्याकिंब्रह्मविष्णुमहेश्वराणां स्वरूपतोऽनुपपत्तिः परमार्थतो वा नाद्यः इष्टत्वात् नापर साहस चेति ई
श्वरचैतन्यमेवाद्दतेसत्वगुणमायावछिन्नं पालयितृ विष्णुरित्युपदिश्यते तदेव विमस्त रजोगुणमा
याक्रांतं स्रष्टृ ब्रह्मेति निगीयते। अतिरोहिततमोगुणमायावछिन्नं संहर्तृ चैतन्यं महेश्वरशब्दवाच्यता
भजते अथ यो ह खलु वावास्य राजसोंऽशोऽसौ स योऽयं ब्रह्मा अथ यो ह खलु वावास्य तामसोंऽशोऽसौ स
योऽयं रुद्रः अथ यो ह खलु वावास्य सात्विकोंऽशोऽसौ स योऽयं विष्णुरिति मैत्र्युपनिषदि तथैवावगतेः त
था च ब्रह्मादीनां मायावछिन्नत्वलक्षणपरमेश्वरत्वेनाभेदेपि तत्तद्गुणविशिष्टमायाभिन्नत्वाद्ब्रह्म
त्वादीनां परस्परं भेदोपपन्न इति भावः। ईश्वरसाक्षिणोऽनादित्वबाधकमाशंकते। नन्विति साक्षिणः
स्वरूपेणानादित्वेपि साहि मायावृत्तिविशिष्टतया सादित्वमुपपद्यत इत्याह। उच्यत इति। एवं साक्षिद्वैवि
ध्यनिरूपणं जीवेश्वरसाक्षिजन्यभेदेन प्रत्यक्षज्ञानस्य द्वैविध्यं सिद्धमित्याह। एवमिति। नन्वेवमपि प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
३७

क्तिरूप्यादिभ्रमेप्रत्यक्षलक्षणस्यातिव्याप्तिरितिचेन्न। तावद्विषयप्रत्यक्षलक्षणस्यतद्विषये ऽतिव्याप्तिः तस्यकेवल
साक्षिवेद्यत्वाभ्युपगमात् नापिज्ञप्तिप्रत्यक्षप्रमात्वलक्षणस्य तत्रातिप्रसंगः भ्रमस्यापितदंशेप्रत्यक्षप्रमात्वात्
या सामान्यलक्षणेलक्ष्यत्वादतो विशेषलक्षणस्यैववक्तव्यत्वात्सापि न संभवतीतिचेत्तत्राह परः सत्
माह। प्रत्यक्षत्वंचेति। किंतु तद्विषयांशेप्रत्यक्षत्वप्रयोजकस्यभ्रमे शुक्तिरूप्यादिभ्रमे ऽतिव्याप्तिरभिप्रेता उत तद्वि
षयांशेप्रत्यक्षत्वप्रमात्वप्रयोजकस्यतत्राद्यं निराकरोति। तस्यचेति। द्वितीयंनिरस्यति। यद्वात्विति। प्रत्यक्ष
प्रमाणनिरूपणप्रस्तावप्रमायाएवलक्षणीयत्वादितिभावः। ननु पारमार्थिकत्वस्यघटादावप्यभावेन तत्र त्रुटि
तलक्षणस्यतत्प्रमायामव्याप्तिः सत्वलक्षणस्याबाधितत्वस्य प्रातिभासिकेपि सत्वे नातिव्याप्तितादवस्थ्य
मित्याशंक्यसंसारकालीनबाधाविषयत्वस्यबाधितपदेनविवक्षितत्वान्नस्य चतत्रातिव्याप्तिरित्याह शुक्ति
रूप्यादिभ्रमस्येति। भ्रांतिज्ञानस्यानिर्वचनीयरजतादिविषयत्वमुपेक्ष्यतदसहमानोऽन्यथाख्यातिवादिनैया
यिकः प्रत्यवतिष्ठते नन्विति। ननु भ्रांतिज्ञानमेवासिद्धं सर्वज्ञानानां यथार्थत्वात् तथाहि विप्रतिपन्नाः सर्वेपिप्र
त्ययाः यथार्थाः प्रत्ययत्वात् घटादिप्रत्ययवत्। नचायथार्थज्ञानानभ्युपगमे विसंवादिप्रवृत्त्यनुपपत्तिः ननु
नभेदाग्रहमात्रात्प्रवृत्तिः चेतनव्यवहारस्यज्ञानपूर्वकत्वात् अन्यथा सुषुप्तावपितदापत्तेः। नाप्युपस्थि राम०
३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेपुरोवर्तिनि रिष्टानुपस्थितावपि तत्प्रसंगात् नचोपस्थितत्वेन समयविशेषणं पुरोवर्तीष्टज्ञानयोर्भेदग्रहेपि तत्र
तद्ग्रहसत्वात्तस्माद्भेदज्ञानमेव प्रवर्त्तकमिति सकामेनाप्यभ्युपेयमिति चेन्न। उपस्थितेन पुरोवर्त्तिनिष्ठपस्थि
तेष्टभेदाग्रहस्य ज्ञानभेदाग्रहस्य हि तस्य प्रवर्त्तकत्वात् नच भेदग्रहाभावापेक्षया लाघवेन भावस्यैवाभेदग्रहस्य
प्रवर्त्तकत्वमिति युक्तं। भेदग्रहादेः स्वरूपेणाभावस्यैव रूपान्तरेण भावत्वाभ्युपगमेनातिरिक्ताभावासिद्धेः।
यथाहुः भावांतरमभावो हि कयाचित्तु व्यपेक्षया इति। अस्तु वाऽतिरिक्ताभावः तथापि न लाघवं तुच्छेनोरेवतिन्मा
येन आवश्यकभेदाग्रहस्यैव प्रवृत्तिहेतुत्वेन क्लृप्तत्वात्। प्रत्युत प्रवृत्तसर्थमसत्तस्थले प्यतिरिक्तविशिष्टज्ञा
नेकल्पनीयमिति सभेदग्रहहेतुतायामेव गौरवं। यद्वा स्वरूपतो विषयतश्चागृहीतभेदग्रहणस्मरणात्मकंज्ञा
नद्वयमेव प्रवर्त्तकं न च ग्रहणस्मरणात्मकज्ञानद्वयाभ्युपगमे इदं साक्षात्करोमि रजतं स्मरामीति स्वा
र्थविवेचकानुव्यवसायोपपत्तिः। शुक्तित्वाग्रहदोषेण तस्य प्रतिबंधात् अत एव न ततो विलक्षणदोषेणैव नत्ता
याः प्रमुष्टत्वात् नचपीतः शंखः तिक्तो गुड इत्यादौ अनुभूयमानारोपस्थले इष्टानिष्टस्मरणाभावात् कथं प्रव
त्तिमरीनीलिमस्फारितनमाषमेदीभेदाग्रहात् अनुभूयमानारोपोऽसिद्ध एवेति। यद्वाऽगृहीतभेदज्ञानद्वयं
प्रवर्त्तकं इदं चानुभूयमानारोपस्थले इष्टपुरोवर्तिनोर्ग्रहणाभ्युपगमेप्यस्तीति न प्रवृत्त्यनुपपत्तिः यद्वाऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
३८

गृहीतिप्रभेदरूपेऽवर्त्तिविषयागृहीतिप्रज्ञानभेदज्ञानं प्रवर्त्तकं। अयं च भेदाग्रहः क्वचिद्विद्यमानेपि भेदे दोषवशेन तत
द्ग्रहात् क्वचित्तदभावात्। तथा च सत्यस्थले ज्ञानद्वयाभावेपि प्रवृत्त्यनुपपत्तिः ननु विवादाध्यासितं पुरोवर्ति
ज्ञानं रजतत्वप्रकारकं तत्त्वकारकप्रवृत्तिजनकत्वात् उभयसिद्धसमीचीनरजतज्ञानवत् तदस्तु मानात्
स्तु पुरोवर्त्तिनि रजतत्वसिद्धौ तस्य च बाधदर्शनेन मिथ्यात्वावगमात् तज्ज्ञानविषयस्य यथार्थत्वानुमानं बाधि
तमिति चेन्न। अनुकूलतर्काभावाद्धि पक्षे बाधकाभावाच्च। न च प्रवृत्त्यनुपपत्तिर्बाधिका अन्यथैव तस्या
उपपादितत्वात् किं च रजतज्ञानं न शुक्तिविषयं अन्याकारज्ञानस्यान्यविषयत्वेऽनुभवविरोधात् ननु रज
तज्ञानं शुक्तिविषयमेव तत्र हि प्रवृत्त्यवहारजनकत्वात् शुक्तिज्ञानवत् न चानुभवविरोधः इदं रजतत्वेन जा
नामीति रजतज्ञानविषयत्वस्यैवानुभवादिति चेन्न। आरोप्याविद्यारूपेणानतदभेदविषयपुरोवर्तिज्ञानस्यैवा
सिद्धेः। तथा हि शुक्तौ विषये इदमात्मनाऽवभासमाने रजतं किमसत् उत सत् नाद्यः अपरोक्षावभासानुप
पत्तेः न त्वसदिन्द्रियसन्निकृष्टं संविदाभिन्नेवा ननु विषयस्य समस्तसामर्थ्यविरहेपि सर्वविज्ञानसामर्थ्यादु
पजातं विज्ञानमेवासतः प्रकाशः तस्यैष स्वभावः यदसत्प्रकाशयतीति अत एवाहुः असत्प्रकाशनशक्ति
रेवास्याविद्येति। अत एव चानुभवः असदेवेदं रजतमभादिति अन्यथा सद्वादिमतेपि विभ्रमे पुरोवर्ति संस

रम०
३८

76

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गेस्य श्रूयमाणत्वात् नवभासापत्तेः। तस्मात् रजते बाध्यासत्त्वविषयमिति चेन्नाशतसामावे नशक्ते रेवानुपपत्तेः। असदे
वास्यप्रकाशमितिचेत् किमेतत्कार्यं उत ज्ञाप्यं न तावत्कार्यं असतः तत्त्वानुपपत्तेः। द्वितीयेपि किं ज्ञानांतर
द्वारा विज्ञानमसत्प्रकाशयति उत विज्ञानमेव तत्प्रकाशः नाद्यः ज्ञानांतरानुपलब्धेः अनवस्थापाताच्च नाद्वि
तीयः सदसतोः संबंधानिरूपणात् नह्यसंबद्धं वस्तु विज्ञानानि शतमपि प्रकाशयंतीति असदधीननिरूप
णत्वं सतो विज्ञानस्यासता विषयेण संबंध इति चेन्न। असतो निरूपकत्वायोगात्। नापि स्वभावः संबंधः सन्मा
त्रनिबस्य कार्यकारणभावस्याविनाभावस्य वा स्वभावस्य सदसतोरयोगात् तस्मान्नाध्यस्तमसत् सत्त्वपक्षेपि
तद्रजतं किमांतरमुत बाह्यं नाद्यः तस्य ज्ञानाभिन्नत्वे प्रमाणाभावात्। सुखादिवत्केवलसाक्षिवेद्यत्व
स्य चांतरत्वस्य विज्ञानवादिभिर्योगाचार्यैरनभ्युपगमात्। ननु रजतादिकं ज्ञानाभिन्नं इंद्रियसंप्रयोगमंतरे
णापरोक्षत्वात् संवेदनवत् न च विशेषणासिद्धिः इंद्रियेण सह संयोगस्याभावात्। ज्ञानस्य च प्रत्यासत्तेरभ्युप
गमादिति चेन्न तस्य ज्ञानाभिन्नत्वे रजतं जानामीति भेदानुभवविरोधात् प्रतिपत्तुः प्रत्ययाद्व्यतिरेकेणाहं रज
तमिति प्रतिभासापत्तेश्च। अनुभवः प्रमाणमिति चेन्न किमिदं रजतमिति प्रत्यययो रजतस्यांतरत्वे प्रमाणं बाधक
प्रत्यययोर्बाधोपपत्तिर्वा न तावदाद्यः तस्यांतरत्वे प्रमाणत्वात् इदं रजतमितीदंत्वरजतत्वसामानाधिकरण्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
३९

विषयत्वेनतत्रैवचमत्कारात्वाच्चा। अत एव न द्वितीयः नहि बाधकज्ञाने रजतस्य ज्ञानकारतामवगाहते किंतु पुरो
वर्तिद्रव्यरजतभेदं न तृतीयः बाधकस्य तस्य रजतभेदतद्धर्मासंतताभावविषयत्वे ऽप्यपत्तेनवकाशात्
इदंत्वप्रतिषेधेहि बाधिते बाह्यरजतमांतरएवज्ञाने प्रवर्तितघनरत्वपीपत्तिः स्यात् इदंत्वेन प्रतिषिद्धस्य
रजताकारत्वप्रसंगात्। न द्वितीयः विज्ञानमात्रवादात् किंचननावद्रजतमांतरं बाह्यशुक्तिशकलादव
ध्यस्यते+ रजतस्यदेशांतरसत्वेनाप्युपपत्तेश्च किंच ज्ञानस्य रजताकारत्वं स्वाभाविकं हेत्वंतराधीनं
वा नाद्यः सर्वज्ञानानां४+ विज्ञानवादिमते बाह्यस्यालीकत्वेन तत्राध्यासायोगात्। न द्वितीयः रजतेव
हिष्ठादेर्पः। अत एव बाधोपि तन्मात्रविषयः लाघवात्। ननु रजतविषयः तथा सति रजतस्य तद्धर्मस्य
चेदं नायाबाधप्रतिगोरवप्रसंगात् इति चेत् रजतस्यापि बाधितत्वेन तत्र बहिष्ठाध्यासायोगात् बाधस्य च
नेदं रजतमिति विशिष्टरजतविषयस्यानुभवसिद्धत्वेन तत्कल्पनाभावात्। अत एव नेदं रजतं किंतु शुक्ति
रिति बाह्याधिष्ठानावधिको बाधः अन्यथा रजतमिदं न किंत्वांतरमिति स्यात् तस्मादांतरं रजतमध्यासवि
षयस्त्वयुक्तं। बाह्यपक्षेपि तद्रजतं किं पुरोदेशवर्ति देशांतरवर्ति वा आद्येपि रजतं पुरोवर्तिद्रव्यस्य परिणामः
अविद्याया वा। नाद्यः शुक्त्यवयवोत्पन्नस्य रजतस्य शुक्तिवत्सारमार्थिकत्वेन बाधानुपपत्तेः। ननु दोषस दम०
३९

पक्षे तत्रत्वयोः सन्निकृष्टस्य दोषावगमात्रांशे न बाधोपपन्नेति चेत् दोषस्य निमित्तकारणमात्रत्वेन तदपगमस्य
रजतविनाशकत्वात् न हि दंडापगमे घटापायो दृष्टः ततश्च रजतं न पुरोवर्तिद्रव्यपरिणामः २ रजतावयवानां
कूप्तरजतोत्पादकानां अभावेन दोषादिसहकारिमात्रेण विधायास्तदुत्पादकत्वायोगात् २ अविद्यापरि
णामपक्षेपि न केवलमविद्यापरिणामः दोषरहितस्याप्युद्बुद्धरजतादिसंस्कारस्यापि तद्रूपस्य तत्र सं
त्त्वे नापि दोषादिसहकृताविद्यापरिणामः ३ तर्हि किंच रजतेनाविद्यापरिणामः सर्वज्ञानानां यथार्थत्वेन भ्रमा
नुपपत्तेः तत्त्वमाणस्य भ्रमोपादानत्वस्य च तत्त्वलक्षणस्यासंभवेनाविद्याया एव दुर्निरूपत्वात् तस्मात् पुरोदे
शवर्ति रजतमध्यासविषयः देशान्तरवर्तित्वपक्षेपि न तावत् केवलाच्चक्षुषस्तद्विषयज्ञानजन्म तस्यासन्निकर्षा
त् इंद्रियाणां समीचीनज्ञानजननसामर्थ्यनियमाच्च नापि दोषसहकृतात् दोषस्य प्रकृतकार्योपजननसा
मर्थ्यविघातमात्रहेतुत्वात् अन्यथा दुष्टादपि कुटजबीजाद्वटांकुरोत्पत्तिप्रसंगात् अतश्च न देशान्तरवर्तिर
जतारोपः न त्वाख्यातिवादिमते शुक्तिकादिपुरोवर्तिद्रव्यदर्शनानन्तरं तज्ज्ञाप्रमानरजततत्तानस्य प्रामाण्य
प्रसिद्धिं तद्विषयबाधप्रसिद्धिश्च प्रमाणज्ञानाभावाबाध्यविषयाभावाच्च न स्यादिति च न रजतव्यवहारस्येव
तेन बाधाज्ञानस्य च ताहशाविसंवादिव्यवहारहेतुत्वेनाप्रामाण्यव्यपदेशोपपत्तेः तस्माद्यथार्थमेव सर्वं पि प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
४०

त्यया इति उच्यते अस्ति तावत्पुरोवर्त्तिनीदंरजतमितिप्रामाणिकरणापरे प्रोरजतार्थिप्रवृत्तिरस्ति सर्वज
नीनं तदेतन्नभेदाग्रहमात्राद्भवितुमर्हति स्मृतौ तस्य संगतत्वात् नाप्युपस्थितेष्टभेदाग्रहात्तस्याभावतयाग्रह
त्वेनाभेदज्ञानस्येव सत्यस्थले हेतुत्वेन क्लृप्तत्वान्न च तद्धेतोरिति न्यायेन भेदाग्रह एव हेतुः क्लृप्त इति वाच्यं का
रणत्वस्याभावत्वव्याप्यतया भावमात्रस्यैवाहेतुत्वात् मरणादिसम्बधाने दाहादुत्पादस्य च वह्निगतश
क्त्याभिभव प्रयुक्तत्वेन प्रतिबंधकाभावस्य कारणत्वे प्रमाणाभावात् नाप्यगृहीतभेदपुरोवर्त्तिज्ञा
नं प्रवर्त्तकं उपस्थितेष्टभेदाग्रहवदगृहीतेष्टभेदपुरोवर्त्तिविषयत्वविशिष्टस्याग्रहीतेष्टज्ञानभेदज्ञा
नापेक्षया पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानत्वस्य लघुत्वेनाभेदग्रहस्यैव तत्सत्स्थले
प्रवृत्तिकारणताग्रहात् न चातिरिक्तविशिष्टज्ञानकल्पने दोषः कारणतया ग्रहकल्पनस्यानुपस्थितत्वा
त्। उपस्थितस्य च तर्कितगौरवस्य सफलप्रमाणप्रवृत्तस्य प्रतिबंधकत्वेन परिपंथित्वात् फलमुखगौरवस्य चो
पजीव्यकारणताप्रतिबंधकत्वशंकानवकाशात् न च विषयानिह्नवेनान्यथाज्ञानाभावः सत एव रज
तस्य देशान्तरवर्त्तिनः पुरोवर्त्तिज्ञाने विषयत्वात् नापि रजतज्ञानसामग्रीविरहः यथार्थमनस्यमात्रे सन्नि
कर्षस्य हेतुत्वेन विपरीतकार्याहेतुत्वात् तत्सहकृतत्वप्रदोषान मिथ्याज्ञानसंभवस्तत्र दावदग्धे ए म०
४०

80

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रबीजादौ कदलीकांडारंभकत्वस्य भस्मकदुष्टे चोदर्ये तेजसि बहुलपानपचनस्य च दर्शनात् अयस्कांतं विद्र

तिपन्नाः सर्वेपि प्रत्ययाः यथार्थाः प्रत्ययत्वात् संप्रतिपन्नवदिति निनतस्मा रजतकल्पापन खेरावर्तीति निवृत्तिप्रव

स्यनेदं रजतमिति तत्रैवाभावप्रतियोगित्वावगमो नानुमानस्य प्रत्यक्षबाधापत्तेर्निर्विषयत्वात्। तदेतस्मि

ह्व विवादाध्यासितं रजतज्ञानं पुरोवर्तिविशेष्यकं तद्विशेष्यकरजतार्थिप्रवृत्तिहेतुज्ञानत्वात्। यद्विशेष्य

कप्रवृत्तिहेतुज्ञानं तत्तद्विशेष्यकं यथोभयसिद्धसमीचीनज्ञानं तथाचेदं तस्मात्तथेति न चाप्रयोजकत्वं वि

शिष्टज्ञानकारणताया लाघवेनाक्तत्वात् प्रवृत्त्यनुपपत्तेश्च विपक्षे बाधकत्वात्। तस्माद्विसंवादिप्रवृत्ति

जनकं सर्वज्ञानं अन्यथाख्यातिमिति सिद्धं। तदेतदाह विसंवादिप्रवृत्त्यान्यथाज्ञानसिद्धिरिति। नन्विदं रजत

मिति स्वानुभव एव तत्कालोत्पन्नरजते प्रमाणं अन्यथा प्रत्ययस्य निर्विषयत्वापत्तेः अंतरस्यासन्न

श्चरजतमिति ज्ञस्य निराकरणात् व्यवहितविषयस्य च प्रत्यक्षविषयत्वादित्याशंक्याह नहीदं रजतमि

ति प्रत्ययः तस्य प्रातिभासिकत्वे प्रमाणं तेन तस्याविषयीकरणादित्याशयेनाह तस्येति। ननु विष

यांतराणुपपत्त्या तस्य प्रातिभासिकरजतं विषयत्वेन कल्प्यत इत्यत आह देशांतरीयरजतस्येति। तस्याविष

यत्वे विनिगमकमाह। कून्नस्येति। तथाच रजतं व्यवहितमपि दोषवशादेव चक्षुषा भासत इति भावः। ए

81

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
४१

विभ्रंशानित्वानं सर्वमन्यथा। व्यतिरिक्ताशंकिते सिद्धांती दूषयति। नेति किं देशांतरस्थितिरजतं सन्निकृष्टमपि त्व
मभासतं इति असंन्निकृष्टं वा नाद्यः सन्निकर्षाभावेन तद्घटितसामग्रीविरहात्। विशेषसन्निकर्षस्यापि
प्रत्यक्षहेतुत्वात्। अन्यथा सव्यवहितदंडे पुंसि दंडीति विशिष्टप्रत्यक्षापत्तेः। नचैतावता जन्यप्रत्यक्षवृत्त्यर्थ
प्रत्यक्षहेतुत्वात्। अन्यथासवहितदंडे पुंसि दंडीति विशिष्टप्रत्यक्षापत्तेः। नचैतावता जन्यप्रत्यक्षत्वावच्छिन्न एव तस्य हेतुत्वात्। अ
त्यक्ष एव विशेषणसन्निकर्षो हेतुरस्त्विति वाच्यं लाघवेन जन्यप्रत्यक्षत्वावच्छिन्नएव तस्य हेतुत्वात्। अ
न्यथा व्यभिचारेण निसारात् विषेणीभूततोऽभांशे ज्ञानप्रत्यासत्तिकल्पनं वह्निसन्निकर्षाभावेन स
न्निकृष्टेपि पर्वते तद्विशिष्टप्रत्यक्षाभाववर्णनं च तवमते विरुद्धेन द्वितीयेपि किमिंद्रियस्य रजतेन सं
केलौकिकः सन्निकर्षः अलौकिको वा नाद्यः इंद्रियस्य तेन संयुक्तसमवायादेरभावादिसाहान्त
स्येति। अलौकिकं किं सामान्यप्रत्यासत्तिरूपं ज्ञानं तत्रापि न तावत्प्रमेयत्वेन रजतग्रहः तस्य तत्त्वका
रकत्वापत्तेः नापि रजतत्वेन इंद्रियसंयुक्ते शरीरावर्तिनि तस्याभावेनासन्निकृष्टत्वात्। सन्निकृष्टसामान
स्यैव प्रत्यासत्तित्वाभ्युपगमात् किंच न तावत्सामान्यप्रत्यासत्तिः प्रमाणाभावात् व्याप्तिग्रहस्य सिद्धांते
सन्निकृष्टधूमादिव्यक्तिमात्रविधायकत्वेन सर्वधूमाविषयतयात स्य सामान्यप्रत्यासत्तिकल्पकत्वायो
गात् धूमो वह्निव्यभिचारी नवेति संशयस्य चतत्तद्धूमत्वेन वह्निसामानाधिकरण्यनिश्चयेपिप्र

रम०
४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धसमएवसंभवेनाप्रसिद्धसाविषयत्वात् समानप्रकारकनिश्चयस्यैवसंशयविरोधित्वात् अतएवघ
टत्वेनेतरभेदनिश्चयेपिपृथिवीत्वेनघटेतत्संशयइतितत्वापिरस्तात्। तस्मात्सामान्येप्रत्यासत्तिरितिसंक्षे
पः। द्वितीयंपक्षंदूषयति। नचेति। अयंभावः। नज्ञानंप्रत्यासत्तिः प्रमाणाभावात्। नचघटमहंजानामीत्यनु
व्यवसायोऽव्यवसायस्यप्रत्यासत्तित्वेप्रमाणं। तस्यस्वप्रकाशतयामनोजन्यज्ञानानपेक्षणात्। अतएवत्वचा
क्षुषज्ञानेपितन्नियमः प्रत्यभिज्ञानवत्संस्कारादिसहकारित्वात्सन्निकृष्टविषयचाक्षुषज्ञानोपपत्तेः
। नचतत्रापिचाक्षुषत्वात्सन्निकर्षजन्यत्वंकल्प्यतइतिप्रकंचक्षुर्जन्यस्यापिकस्यचित्परोक्षत्वेबाधका
भावात्। प्रमात्वाप्रमात्वयोरिवपरोक्षत्वापरोक्षत्वयोरेकज्ञानधर्मत्वोपपत्तेश्च। तस्मात्ज्ञानंप्रत्यासत्तिरिति
दिक्। नन्वलौकिकसामग्रीतोऽनुमितिसामग्र्याबलवत्त्वाद्धूमादेःकथंप्रत्यक्षत्वमितिचेत्समानविषये
प्रत्यक्षसामग्रीत्वेनैवलाघवेनबलवत्तयाऽनुमितिसामग्र्याएवदुर्बलत्वात् अन्यथासंशयोत्तरप्रत्यक्ष
भ्रमानुपपत्तेः। ननुरजतावयवस्यतदुपादानस्यप्रसिद्धस्यचतन्निमित्तस्याभावेकथंशुक्तौरजतंजायतेनच
भग्नावयवाः तदुपादानंनिरस्तत्वात् उत्पन्नस्यशुक्तित्वापत्तेश्च। अतएवनतज्ज्ञानमपिकुत्रकारणस्य
विषयेन्द्रियसन्निकर्षादेरभावादित्याक्षिपति। नन्विति। अस्तिशुक्ताविदंरजतमितिज्ञानंतत्रचास्ततोऽन्यथा

83

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ४२

सनादीतरस्यरजतस्यचनिराकृतत्वात्बाधस्यचस्वरूपावच्छिन्नस्यपारमार्थिकस्यबाधानुपपत्त्यादेशांतरीयस्यच
प्रधानेनविषयत्वायोगात् अतःपरिशेषात्प्रातिभासिकंतत्कालोत्पन्नमेवरजतंविषयःइत्यभिप्रेत्याह।उ
च्यतइति।किंलोकसिद्धरजतसामग्रीविरहात्प्रातिभासिकरजतानुत्पादःसामग्रीमात्रविरहाद्वा।नाद्यः
लौकिकपरमार्थस्यैवरजतस्यतद्रजतावयवाद्यपेक्षितत्वेनप्रातिभासिकस्यतदनपेक्षितत्वात् अ
तएवकॢप्तहेतुमंतरेणापिस्वप्नरथादेःस्वप्नेदर्शनाशयेनाह।नहीति।द्वितीयमनूद्यतिकिंत्विति।दो
षसंस्कारादिसहकृताविद्यैवप्रातिभासिकरजतोपादानिकेत्याह।विलक्षणैवेति।ननुरजततज्ज्ञान
योर्नतावदविद्योपादानेप्रमाणाभावात्तदुपादानेचवियदादिवित्सत्पत्त्यापत्तेः नचात्मातदुपादानंअप
रिणामित्वात् नापिदोषःगुणसादृश्यात्मनस्तस्यद्रव्योपादानत्वायोगात् अतएवनाविद्यानिमित्तकार
णंनापिसंस्कारःभ्रमस्यतज्जन्यत्वेस्मृतित्वापत्तेः भावनासंस्कारस्यार्थाहेतुत्वाच्च नचभेदाग्रहःतस्या
र्थहेतुत्वेप्रमाणाभावात्तदन्वयव्यतिरेकयोश्चज्ञानमात्रोपपत्तेः किंचरजतस्यप्रातिभासिकत्वेक
थंप्रत्यक्षत्वंनतावच्चाक्षुषत्वंप्रतिभासात्सर्वेनतस्येंद्रियसंप्रयोगाभावात्।नापिमानसत्वंइंद्रियसंप्रयोगं
विनामनसोबहिरस्वातंत्र्यात् ततश्चप्रातिभासिकंरजतंतज्ज्ञानंचानुपपन्नमित्यतआह तथाहीति। राम० ४२

84

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चविद्यारजतरूपार्थाकारेणरजतज्ञानाभासाकारेणचपरिणमतइतिसंबंधः।वियदाद्युपादानाविद्यावैल
क्षण्यंप्रदर्शयितुंविषयचैतन्यनिष्ठाशुक्तित्वप्रकारिकेतिविशेषणद्वयं।सहिमूलाविद्याचिन्मात्राश्रिताचि
न्मात्रविषयानिर्विकल्पकज्ञाननिवर्त्याच।इयंतुशुक्त्यवच्छिन्नचैतन्याश्रिताऽरजतभेदशुक्तित्वप्रकारि
कासविकल्पकनिवर्त्याचनचास्याविद्योपादानत्वेमानाभावः।रूप्याध्यासाक्षीद्रविद्योपादानः।अन्या
नुपादानत्वेसतिसोपादानत्वाद्दाकाशवत्।मायांतुप्रकृतिंविद्यादित्यादिश्रुत्यावियदादेरविद्योपादान
त्वावगमान्नसाधनवैकल्यं।नचातःकरणस्यतदुपादानत्वसंभवाद्दृष्टांतासिद्धिरितिवाच्यं।अंतःकर
णस्यसादित्वेनोपादानापेक्षायामज्ञानस्यतदुपादानत्वेनावश्यकत्वात्प्रातिभासिकरजताध्या
सेतस्योपादानत्वंनयाकृतत्वाच्चनचविपक्षेबाधकाभावः।मिथ्यार्थावभासानुपपत्तेरेवबाधकत्वादि
तिभावः।निमित्तकारणमाह।संस्कारेति।नन्वन्वयव्यतिरेकाभ्यांसादृश्यज्ञानमपिकारणस्यादित्याशंक्या
नस्यभ्रमजनकसंस्कारोद्बोधकत्वेनान्यथासिद्धत्वादित्याह।चाकचिक्यादीति।सादृश्यज्ञानस्यत्वोपाधि
काध्यासस्फाटिकजपाद्यध्यासेचव्यभिचारान्नहेतुत्वमितिसंप्रतिबोध्यं।नचसंस्कारोपिनहेतुः।उक्तदोषा
दितिवाच्यं।समानविषयसंस्कारजन्यत्वस्यसंस्कारत्वेनतज्जन्यत्वस्यचवास्तवत्वप्रयोजकत्वात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
४३

अन्यथात्वसाभिज्ञानुमितोः स्मृतित्वापत्तिरिति भावः। असाधारणकारणमाह दोषेति। न च दोषसं
स्कारयोरर्थाहेतुत्वमन्वयव्यतिरेकाभ्यां विनिगमकाभावेनोभयकारणताग्रहादिति भावः। प्रातिभा
सिकरजतस्य साक्षिभास्यत्वं दर्शयितुं प्रमातृचैतन्याभिन्नेति विषयचैतन्यविशेषणं। तथा च तदाकारवृत्त्युप
हितस्य रजतस्य प्रमातृचैतन्यनिष्ठाविद्याकार्यत्वेन प्रमातृचैतन्याध्यस्तत्वात्साक्षिभास्यत्वमुक्तमि
ति भावः। नन्वंतःकरणस्य बहिर्निर्गमनाभावात्कथं विषयचैतन्यस्य प्रमातृचैतन्याभिन्नत्वं तत
थात्वे वा रजतस्य प्रमातृचैतन्याध्यस्तस्य चक्षुरनपेक्षस्य कथं तदन्वयव्यतिरेकानुविधानं क
थं वा तस्य शुक्तित्वाज्ञानकार्यत्वे इदमाकारवृत्तिवत्पुरोवर्तिनि शुक्तित्वाकारवृत्त्यसंभवादित्या
शंक्याह काचादीत्यादिना। ननु बहिरिन्द्रियवैयर्थ्यं भ्रमजनकधर्मिज्ञानेनैतज्जनकसंस्कारोद्बोध
कत्वाद्दृश्यज्ञाने चोपयोगात्। नापि पुरोवर्तिनि शुक्तित्वग्रहः दोषेण तस्य प्रतिबंधात्। प्रमात्र
भेदस्य चांतःकरणबहिर्निर्गमने सति स्पष्टत्वादित्यर्थः। तेनेति पद्येत्यर्थः। वृत्त्यवच्छिन्नचैतन्य
मिति। इदमाकारवृत्त्यवच्छिन्नचैतन्यमित्यर्थः। तथा च धर्मिज्ञानस्य विषयचैतन्याभिन्नत्वेन प्र
त्यक्षतया तत्रापरोक्षाध्यासोपपन्न इति भावः। ननु यद्यविद्यापरिणामं रजतं नात्मपरिणामः

राम०
४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिंतद्विवर्त्तोपिनस्यात्परिणामविवर्त्तशब्दयोःपर्यायत्वादित्याशंक्यतयोर्भेदमाह।परिणामेनानेति।
ननुमृत्परिणामस्यघटस्यमृदाश्रितत्ववद्रजतस्यापिस्वोपादानाविद्याश्रितत्वापत्तिः नहिमृदुपादेय
घटोमृद्व्ययेवर्त्तते आत्मन्यविद्याधिष्ठानेरजतंवर्त्ततेत्याशंक्याचैतन्यावारकज्ञानेस्यतमोव
त्वाभ्युपगतविक्षेपहेतुत्वात्तत्परिणामत्वमपिरजतेतदधिष्ठानतयारजतस्यकथंचित्तदाश्रित
त्वेपितुरोवर्त्तिद्रव्यस्यतद्यात्वाभावात्कथंतदाश्रितत्वंततश्चरजतमितितादात्म्यव्यपदेशानुपप
त्तिरितिशंकते।नन्वितिचैतन्यमात्रस्येति।इदमवछिन्नचैतन्यस्यैवरजतोपादानाविद्याधिष्ठा
नतयातस्यैवाविद्याजनितविक्षेपाधिष्ठानत्वोचितत्वादितिभावः।नन्वेवमिदमवछिन्नचैतन्याध्यस्त
स्यरजतस्यांतःकरणावछिन्नचैतन्याध्यस्तत्वाभावेनकथंप्रमातृचैतन्याध्यस्तत्वरूपंप्रत्यक्षत्वमि
त्याशंक्यतस्यांतःकरणविशिष्टाश्रितत्वाभावेपितदुपहितचैतन्याध्यस्तत्वात्तस्यैवप्रमातृचैतन्या
भिन्नपदेनविवक्षितत्वादित्याशयेनाह।तस्यचेतिसाक्षिण्यध्यस्तमिति।ननुकिमिदमध्यस्तत्वं
नतावद्भ्रमविषयत्वंतत्रभ्रमत्वंपरिहृतदोषजन्यज्ञानत्वंतदासर्वस्यकार्यस्याविद्यादोषजन्यतयाब्रह्मसा
क्षात्कारेस्यापितज्जन्यत्वेनातिव्याप्तिः नापिदोषत्वेनतज्जन्यत्वंकाचादिसाधारणदोषत्वस्यनिर्व

87

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ४८

वनात् न च संस्कारजन्यानुभवत्वप्रत्यभिज्ञायामतिव्याप्तिः न चासद्विषयत्वं स्वसत्ताव्याप्यत्वानभ्युपगमा
त् नापि अधिकरणप्रकारकज्ञानत्वं घटे रूपं घटे घटत्वमित्यादिज्ञानेऽतिव्याप्तिः न च रजतस्याध्यस्त
त्वे प्रमाणमस्ति प्रत्यक्षेणानुभवात् न च दृश्यत्वादिना तदनुमाने दृष्टान्ताभावात् तस्माल्लक्षणप्रमा
णाभावात् कथं युक्तं रजतादेरध्यस्तत्वमिति। अत्राहुः स्मृतिरूपत्वे सति पूर्वदृष्टरूपज्ञातीयत्वमध्य
स्तत्वलक्षणं। स्मृतिरूपत्वं च स्मर्यमाणसदृशत्वं तच्च प्रमाणजन्यज्ञानविषयत्वं अज्ञातगोचरत्व
स्यानुपहितत्वं वा तेन स्मर्यमाणघटादौ नातिव्याप्तिः प्रतीतिनियतसत्ताका व्याप्तस्याव्यक्षत्वेन
स्वरूपादेरपि तथात्वान्नातिव्याप्तिः अभिनवोऽस्त्रवत्त्वान्नातिव्याप्तिर्वारणाय द्वितीयविशेषणं अ
ध्यासमात्रलक्षणं तु परत्र परावभासत्वं पारमार्थिकत्वावच्छिन्नस्वात्यन्ताभावाधिकरणे प्रतीयमा
नत्वमिति यावत् एतदभिप्रेत्यैवोक्तं भगवता भाष्यकारेण स्मृतिरूपः परत्र पूर्वदृष्टावभास इति न चा
त्र प्रमाणाभावः सदिदं रजतमिति स्वाधिकरणे पारमार्थिकत्वेन प्रतिपन्नस्य रजतस्य नेदं रजतमिति
प्रत्यक्षेण तदवच्छिन्नाभावप्रतियोगित्वावगमात् सदिति प्रतीयमानरजतत्वस्य समानाधिकरण पार
मार्थिकत्वावच्छिन्नात्यन्ताभावप्रतियोगि बाध्यत्वात् यन्नैवं तन्नैवं यथार्थं रङ्गे नेस अनुमानाच्च तत्राध्यस्तरजतम रा०म० ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४५

त्वमिति।। नन्विदमवच्छिन्नरजताधिष्ठानचैतन्यस्य साक्ष्यभेदे रजतस्य साक्ष्यभेदे दुष्टकरणानामिवादुष्ट
करणानामपि प्रत्यक्षाणां पुरोवर्तिनि शुक्तित्वादिग्रहसमये तदीयांतःकरणोपहितचैतन्याभिन्नवि
षयचैतन्याध्यस्ततया साक्षी संबंधाच्छुक्तित्वादिवत्तस्याभानापत्तिरित्याशंक्याह रूप्यत्वादिवदिति।। यदी
यदोषस्तुभिना।। विषयाद्याकारेण परिणमते तस्य तद्दोषवत्त्वरूपयायत्वनियमान्नातिप्रसंगः यथा
सिद्धांते शुद्धचैतन्याध्यस्तोऽपि स्वप्नरथादिः तज्जनकनिद्रादोषवतैव गृह्यते नान्येन।। यथा
वा देवदत्तयज्ञदत्तयोः पुरोवर्तिचक्षुःसंयोगजनितांतःकरणबहिर्निर्गमनयोरुभयांतःकरणोपहि
तसाक्षिचैतन्यैक्येऽपि नान्यांतःकरणप्रत्यक्षविषयत्वेनान्यांतःकरणगतसुखादेरन्यस्य विषयः
यथा च परमते द्वित्वादेः संयुक्तसमवायसंबंधस्य सर्वसाधारण्येऽपि यदपेक्षाबुद्धिजन्यं हि द्वित्वा
दि तत्तेनैव गृह्यते नान्येनेत्यदृष्टिनिभावः किमहमाकारप्रत्ययविषयत्वे केवलसाक्षिवेद्यत्वप्रयो
जकं प्रत साक्ष्यध्यस्तत्वं स्यादाहोस्विदविद्याविद्याकार्यत्वं नाद्यः शरीरेंद्रियादौ व्यभिचारात्तस्या
क्षेपेनाहमुत्पन्न इति।। द्वितीयमन्नीयो दूषयति नहीति ननु निर्विकल्पप्रत्ययाविषयत्वे प्रमाणव्यापारसापे
क्ष्य साक्षिवेद्यत्वं प्रयोजकं अहंप्रत्ययविषयत्वे च केवलसाक्षिवेद्यत्वं दृष्टं चांतःकरणधर्मो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
४५

णामेव शरीरेन्द्रियाणां दीनां तत्तज्जन्यदेवतत्त्वयोजकमिति शंकते किं त्विति। सर्वेष्वननुगते नियामके संभवति
नानुगतं नाप्यमित्याह। यस्येति यस्य यदाकारानुभवाहितसंस्कारजन्यत्वं तस्य तदाकारानुभवविषय
त्वमित्येव नियामकं न तु तत्सहकृताविद्याकार्यत्वं गौरवात्. अत एव वक्ष्यति सत्सद्वलीयदमाकारानु
भवाहितसंस्कारजन्यत्वं तस्य तदाकारानुभवसकलं एवं चाविद्यादित्यागन्य स्यादहमन्तरसाधहमा
कारानुभवसंस्कारजन्यत्वादहमाकार इति भावः। अननुगतत्वमेव नियामकस्योदाहरणं तत्र दर्शने
न दर्शयति तथा चेति अविद्याकार्यस्य घटादेरिदमाकारानुभवजन्यसंस्कारजन्यत्वादिदमाकारा
नुभवविषयत्वं तदनुभवस्येदमाकारानुभवसंस्कारजन्यत्वादिदमाकारत्वमिति वाऽर्थः एव
मुत्तरत्रापि व्याख्येयं। ननु प्रातिभासिकरजतादेर्ज्ञानस्य न तत्समाने विषये दमाकारानुभवसंस्का
रजन्यत्वं तस्यानुभूतविषयत्वात् न च घटानुभवस्य सजातीयघटादेरिदमाकारानुभवसंस्कार
जन्यत्ववद्रजतानुभवस्यापि तज्जातीयसत्यरूप्यमिदमाकाररजतानुभवसंस्कारजन्यत्वादु
क्तमिदमाकारत्वमिति वाच्यं तथा सति घटानुभववद्रजतानुभवस्यापि प्रमात्वापत्तेः न चेष्टा
पत्तिः नहि विषयरजतस्य सविकल्पकज्ञाननिरासाऽविद्याकार्यत्वानुपपत्तेरित्याशंक्य नहि प्रमाहि रा०म०
४५

90

न संस्कारजन्यत्वेन प्रमात्वं स्मृतेरपि तत्प्रसंगात् किंत्वनधिगताबाधितार्थविषयत्वेनेति प्रातिभासिक
स्य च प्रत्यक्षेण बाधितत्वात् तज्ज्ञाने त्विदमाकारप्रमा संस्कारजन्यत्वे इदमाकारत्वेऽपि न प्रमाणप्रमि
त्यभिप्रेत्याह प्रत्यक्षत्वेनेति ननु रजतस्येदमाकारानुभवविषयत्वेऽपि नेहाचराविद्यावृत्त्यभ्युपगमः
किमर्थः न तावत्साक्षिसंबंधाय रजतस्य साक्षात् साक्षिसंबंधतयैवोपपत्तेः नाप्यावरणाभंगाय रजत
स्य सर्वदा नावृतत्वात् साक्षिणो वसंबंधात् यथा घटादिवद्रजतमपि कदाचिदपि न ज्ञायेत न च व्यवहा
राय तस्यानावृतत्वात् तार्थप्रकाशनेनैवोपपत्तेरिति सिद्धांत्येकदेशी चोदयति नन्वेवमपीति अपरो
पक्षत्वसिद्धय इति नन्वनावृतत्वावच्छिन्नसंविन्नाद्यात्म्यमेव विषयस्यापरोक्षत्वं तेन च घटाकारवृत्ति
दृश्यायाः परिमाणाकारवृत्ति प्रसंगः नत्वाघटाद्यवच्छिन्नचैतन्यस्यानावृतत्वेऽपि त्वावच्छिन्नस्याव
तत्वात्तथा च रजतावच्छिन्नचैतन्यस्यानावृतत्वात् तादात्म्येनैव तस्य प्रत्यक्षत्वोपपत्तेः न तदर्थमपि न
ष्टे चरणवृत्तिरभ्युपगंतव्येति चेत् नानावृतत्वोपहितानावृतत्वे चैतन्याध्यस्तत्वं प्रत्यक्षत्वं परिमाणविशिष्ट
चैतन्यस्यावृतत्वेऽपि त्वोपहितघटावच्छिन्नचैतन्यस्यानावृतत्वात् नापि त्वविशिष्टानावृतत्वे चैत
न्याध्यस्तत्वं घटादीनामपि शुद्धचैतन्याध्यासेनात्माश्रयापसाचविशिष्टाधिष्ठानत्वायोगात्तस्मा

91

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ४६

त्साधकेरजतस्यापरोक्षत्वसिद्धयेनहृत्सभ्युपगमइति। इदं चोपलक्षणं संस्कारसिद्धये च वृत्तिरूपेयाः वि
नाशिनः साक्षित्वलक्षणानुभवस्य संस्काराभावात् न चेदमाकारवृत्तिविशिष्टसाक्षिणो विनाशसं
भवात्संस्कारोपपत्तिः तथा सति दुःखादिविशिष्टसाक्षिणो विनाशादेव तत्रापि संस्कारोपपत्तौ तदा
कारवृत्तिवैयर्थ्यात् इदमाकारवृत्तिविशिष्टसाक्षिविनाशेप्यस्य संस्कारोपगमे घटाकारवृत्तिविशिष्ट
साक्षिनाशेन परिमाणसंस्कारोपपत्तेः। त्वं च तत्राहंकारस्यापि विशिष्टसाक्षिनाशेनैव स्मरणोपप
त्तौ अहंवृत्त्यभ्युपगमैवैयर्थ्यापत्तेश्च सा तत्रैव विस्तरः नन्विदं वृत्तिमात्राभ्युपगमे तदवच्छिन्नसा
क्षिणः पुरोवर्तिभिन्नतया रजतभासकत्वे एकत्वेपि वृत्तिद्वयवादिमते तत्तद्वृत्तिविशिष्टसाक्षिण
स्तत्तद्विषयमात्रग्राहकत्वे भिन्नत्वात् कुतो विसंवादिप्रवृत्तिजनकविशिष्टज्ञानसिद्धिः तदभावे
पि वृत्त्यभ्युपगते भ्रमाकारपरिणतोयं वेदांतीति सख्यपुनः परिचोदयति नन्विति। यत्किंचि
त्साम्येन गृहसिद्धांतानापादने सर्वेषि सिद्धांतसंकरापत्तेः इदं रजतं वृत्तिद्वयोपहितस्य तदभिव्यक्तस्य
इदं रजतताहात्म्याभिव्यंजकस्य साक्षिज्ञानस्यैकत्वाभ्युपगमेन सर्वसाम्याभ्युपगमाभावात्। अत एव
महद्भिश्चेदनमितसाहेपरोक्षापरोक्षवृत्तिभेदेपि तदुभयवृत्तिविषयतस्य गुणागुणिनादात्म्यावगा रामः

४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि साक्षिज्ञाने ऐक्यकल्पात्सामानाधिकरण्यव्यपदेश इत्याशयवानाह वृत्तिद्वयेत्यादिना सत्येति। अनेन सत्
मिथ्यावस्तुतादात्म्यावगाहित्वलक्षणं सत्यानृतमिथुनीकरणत्वं सिद्धमिति मतम व्याप्तलक्षणायु
क्तमित्यपृथेयं ननु प्रत्युक्ते घटादिज्ञानसाधारणमव्याप्तलक्षणं न च स्वाधिकरणभूततत्त्वाद्यवच्छेदेन भेद
स्याप्रतीतेः तदुक्तं घटादेः सत्त्वाच्च न च सन्घट इति सद्रूपब्रह्मतादात्म्येन मिथ्याभूतघटस्या
नवभासनाद् व्याप्तलक्षणे घटादिज्ञानमपि लक्ष्यमिति वाच्यं शुक्तिरूप्यघटसाधारणमिथ्यात्वस्ये
वानिरुक्तेः तत्र प्रमाणाभावाच्चेति चेन्न तावन्निर्वचनं स्वाश्रयेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियो
गित्वे मिथ्यात्वं स्यादनुमानपरिच्छेदे ग्रन्थकृतैव वक्ष्यमाणत्वात् ॥ २ तद्देवत्तत्रिष्ठत्रैकालिकाभावः प्र
प्रमाणं च घटादिमिथ्यात्वे तत्रैव वक्ष्यति शुक्तिरजतस्थमिथ्यात्वे तु नेदं रजतमिति बाधप्रत्यक्षंमा
नं तत्रेदंशान्तरीयस्यैव पुरोवर्तिन्यसत्त्वात् ॥ प्रतियोगितया बाधकज्ञानेन विषयीक्रियते रजतस्य
सन्निकृष्टपुरोवर्तिन्यप्रसक्तत्वात् प्रसक्तस्यैव प्रतिषेध्यत्वात् अनुमानं चाव्याप्यवृत्तित्वं ना
भावप्रतियोगि शुक्तिरजतं स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् दृश्यत्वात् संयोगवत् प्रातिभासिक
रजतस्यापारमार्थिकत्वात्त्वाश्रयासिद्धिः न चानुमाने संयोगवदव्याप्यवृत्तित्वेनाभावप्रतियोगित्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
४७

नार्थांतरं संयोगतदत्यंताभाववद्रजततदत्यंताभावयोरवच्छेदकभेदेनाप्रतीतेः नचाव्याप्यवृत्त्यत्यंताभाव
प्रतियोगित्वमुपाधिः शरीरत्वावच्छिन्नाभावप्रतियोगिनि संयोगे साध्याव्यापकत्वात् नचविपक्षे बाधका
भावः रजतस्य पारमार्थिकत्वे कालत्रयेप्यत्र रजतं नासीतिबाधानुपपत्तेर्वा बाधकत्वात् ततश्चानुमा
नेरजतमिथ्यात्वप्रमाणं नचारजतज्ञानमिथ्यात्वप्रसिद्ध्यनुपपत्तिः सदसत्त्वयोरंतरीयदेशांतरी
यत्वयोरजतत्वनिराकृतत्वेन तज्ज्ञानमिथ्यात्वप्रसिद्धेः एवकारांतरेणापि पादप्रतिज्ञमशक्यत्वात् एवं
शुक्तिरूप्यघटादीनां मिथ्यात्वं सिद्धं तत्र घटादिज्ञानस्याप्यध्याससत्तानस्ताधारणसत्त्वमिथ्या
वस्तुतादात्म्यावगाहिज्ञानत्वमध्यासलक्षणं युक्तमितिचेत् तिष्ठेयेन प्रसेकमग्रहीतमपि सत्त्वमिथ्या
वस्तुतादात्म्यं वृत्तिद्वयप्रतिबिंबितसाक्षिज्ञानं गृह्णातीत्यस्यां प्रत्यायिकत्वमिति माहश्चतएवेति
नुशुक्तिरजतवत्त्वसिद्धरजतस्य घटादेश्चाविद्याकार्यत्वेन मिथ्यात्वस्याध्यस्तत्वस्य वाभ्युपगमेक
थंतस्यघटादिवैलक्षण्यं तत्रच्छलोके शुक्तिरूप्यज्ञानगतानामप्रसिद्धिस्तज्जन्यप्रवृत्तौ विसंवादि
त्वप्रसिद्धिश्च नस्यादितिशंकते। नन्विति। कथमितिसाक्षेपो नचेत् शुक्तिरूप्यप्रातिभासिकघटादिभ्योवैल
क्षण्यमितियुक्तं घटादिशुक्तिरूप्ययोरविद्याकार्यत्वेन तस्यैवप्रातिभासिकत्वमिसत्वप्रमाणाभावात्

रम०
४७

95

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयोजकाभावाद्वेतिभावः। परिहरति नत्वन्मतेपीति। अयमर्थः किं शुक्तिरूप्यस्य घटादिवदविद्या
कार्यत्वेन व्यावहारिकत्वसाधनात् प्रातिभासिकत्वाभावः प्रयोजकाभावाद्वानाद्यः अविद्याकार्यत्वस्य
हेतोरप्रयोजकत्वात् शुक्तिरूप्यस्य व्यावहारिकत्वे संसारदशायां बाधानुपपत्तेश्च। अन्यथान्यायम
तेपि शब्दज्ञानेच्छादीनां घटादिवत्सत्त्वेन स्थायित्वापत्तेः। यदि च घटादीनां प्रत्यभिज्ञानादिबलात्स्था
यित्वं शब्दादेश्च तदभावात्क्षणिकत्वमिति मन्तव्यं तदा शुक्तिरूप्यस्य संसारदशायां बाधितस्य घटादिवद
र्थक्रियाकारित्वाभावान्न व्यावहारिकत्वमिति तुल्यं न च घटस्येव शुक्तिरूप्यस्यापि संसारदशायाम
बाधोर्थक्रियाकारित्वं च कुतो न स्यादित्यपि युक्तं वाचोयुक्तिः स्वभावविशेषस्यैव तन्नियामकत्वा
त्तस्य चापर्यनुयोज्यत्वादिति। न द्वितीयः आगन्तुकदोषजन्यत्वस्य च प्रातिभासिकत्वप्रयोजकत्वा
दित्याह। यद्वेति। न त्वागन्तुकदोषजन्यत्वं प्रातिभासिकत्वप्रयोजकं काचादिध्वंसतन्त्संयोगादेरत
त्साक्षात्कारे चातिव्याप्तिः न च दोषत्वेन तज्जन्यत्वमिह विवक्षितं तथा सत्यागन्तुकविशेषणवै
यर्थ्यप्रसंगात् न च घटादावतिव्याप्तिवारणाय प्रसिद्धदोषस्य काचादेर्घटादावहेतुत्वात्
मूलाविद्यायाश्च दोषत्वे न हेतुत्वमानाभावादित्यत आह। घटादयश्चासदिति। अयं भावः दो

95

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
४८

षत्वेन तज्जन्यत्वमेव विवक्षितं तेन चागंतुकविशेषणवैयर्थ्यं घटादावतिव्याप्तिवारकत्वात् न च घटादे
र्दोषजन्यत्वे प्रमाणाभावः घटादिर्दोषजन्यः स्वाध्यस्तत्वाच्छुक्तिरूप्यवदित्यनुमानस्य प्रमाणत्वा
त् न चाप्रयोजकत्वं अन्वयव्यतिरेकाभ्यां लाघवेन दोषत्वेनैव काचादीनामध्यासं प्रति हेतुत्व
स्य शुक्तिरूप्यादौ प्रसिद्धभ्रमस्थले निश्चितत्वात् नैवं ममतः करणादिकमेव घटादौ दोषत्वेन हे
तुः कल्प्यतामित्यर्थान्तरमिति वाच्यं प्रकृतित्वेन क्लृप्तमायाया एव लाघवेन दोषत्वमात्रकल्पना
त् अन्यथा अंतःकरणादेर्घटाद्यध्यासं प्रति हेतुत्वं दोषत्वं च कल्पनीयमिति गौरवप्रसंगात्।
केचित्तु सविकल्पकज्ञानबाध्यत्वं ब्रह्मज्ञानेतरबाध्यत्वं वा प्रातिभासिकत्वप्रयोजकमिति त
न्मते भगजादेर्निर्विकल्पकब्रह्मज्ञानबाध्यत्वेन प्रातिभासिकत्वाभावप्रसंगात् आगंतु
कदोषजन्यमपि न प्रातिभासिकप्रयोजकं स्वप्नादेः प्रातिभाससमयत्वाभ्युपगमेन तत्राव्याप्तेः।
न च मूलाविद्याकार्यस्यैव प्रातिभासिकस्यात्र लक्ष्यत्वात् स्वप्नादेश्च मूलाविद्याकार्यत्वान्नाव्या
प्तिदोष इति वाच्यं तथा सति स्वाप्नगजादेरपि वक्ष्यमाणरीत्या मूलाविद्याकार्यतया तत्राव्याप्त्यापत्तेरि
ति चेत् लौकिकपारमार्थिकविलक्षणस्य प्रातिभासिकत्वे एवास्य प्रयोजकत्वात् स्वप्नादेश्च प्रातिभासिकस्य रा० म०

४८

96

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लौकिकपरमार्थविलक्षणस्य प्रातिभासिकत्वएवास्य प्रयोजकत्वात्तथात्वेऽस्य प्रातिभासिकस्य लौकि
कपरमार्थत्वान्नाव्याप्तिः। स्वप्नोपलब्धगजादेर्लौकिकपरमार्थविलक्षणत्वात्प्रातिभासिकत्वान्नातिव्याप्तिः तस्मादा
गंतुकदोषजन्यत्वं लौकिकपरमार्थविलक्षणस्य प्रातिभासिकत्वे प्रयोजकं प्रमाणं च विमतं रजतं
प्रातिभाससमयमात्रवृत्ति समयांतरे तत्सत्त्वे प्रमाणाभावात् स्वप्नादिवदागंतुकदोषजन्यत्वाद्वा स्वा
प्नगजादिवत् न च द्वितीयानुमाने निद्रादोषजन्यत्वमुपाधिः लौकिकपरमार्थविलक्षणत्वावच्छिन्न
साध्यव्यापकत्वात्पक्षधर्मावच्छिन्नसाध्याव्यापकत्वमिति वाच्यं। लाघवेनागंतुकत्वस्यागंतुकदोषज
न्यत्वस्यैव प्रयोजकत्वात्तदनिरूपणे वृत्तेः। अस्य प्रयोजकत्वादेव सिद्धेः। ननु स्वाप्नरथादेः प्रातिभासिकत्वं
नाप्यागंतुकदोषजन्यत्वं तन्नहान्तस्यानुभूतेः न चापरोक्षज्ञानव्यवहितत्वात् तस्याविषयत्वात्तन्निषेधो वा रथादेरु
त्पत्तिरूपेयेति युक्तं बहिरिंद्रियाणामुपरतत्वेन मनसो बहिरस्वातंत्र्येण चापरोक्षरथादिज्ञानस्यैवासिद्धेः। न
च वीथ्यादेर्रथादिव्यवहारानुपपत्त्या सृष्टिः कल्प्यत इति वाच्यं गौरवप्रसंगाद्व्यवहारस्य स्मर्यमाणरथाद्यवि
वेकादुपपत्तेः तन्न स्वाप्नरथादेः प्रातिभासिकमित्यादिवादि श्रीभाकरः प्रष्टव्यः इति नन्वेति। स्वप्ने तावद्
द्रष्ट्यादिरथादिगोचरं विशिष्टज्ञानमेव न तु प्रत्येकगोचरं ज्ञानद्वयं अन्यथा विशिष्टव्यवहारानुपपत्तेः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
५९

भेदाग्रहतत्स्यनतत्संहितज्ञानद्वयस्यहेविशिष्टव्यवहारहेतुत्वनिरासात् तच्चविशिष्टज्ञानेनस्मृतेः पूर्वं तत्र रथादे
रननुभूतत्वात्तत्स्वाघेरथरथंगजइत्यादिज्ञानमपरोक्षज्ञानमेवसाशयेनपरिहरति। नेति। रथाद्यवभा
दिज्ञानस्यस्मृतित्वबाधकमाह। रथादेरिति। नन्विंद्रियग्राह्यत्वंचतदास्मर्यतस्यतत्राह स्वप्नइति। र
थाद्यवभासानंतरंप्रतिबुद्धस्यस्वप्नेरथमद्राक्षमन्वभूवमितिचानुभवोनस्यात्तन्मतेतस्यचक्षुषान
नुभूतत्वादितिभावः। नन्वव्यवहितस्यविषयत्वात्सृष्टिकल्पनेगौरवात्रथादौनरथादिविशिष्टानुभव
इत्युक्त्वातुल्यानुभवविरोधइत्याशंक्यस्वारंभरथादिसृष्टेःश्रुतिसिद्धत्वान्नगौरवंदोषइत्याह। रथा
नितिजाग्रद्भोगप्रदकर्मोपरमेसतिस्वाप्नभोगप्रदकर्माभिव्यक्तौ अनंतरं रथान्रथयुक्ताश्वपथः सृजत
इत्यर्थः। एतेनरथादेरपरोक्षज्ञानविशिष्टानुभवमात्रेणनख्यातिर्भासकत्वसिद्धिः अव्यवहितस्यापितस्य
रथादेर्दोषवशेनारोपसंभवात् अतएवनानुभवविरोधः। नवासृष्टिकल्पनगौरवं तत्रस्वप्नेयं र
थइत्यादिविशिष्टज्ञानमसख्यातिरेवेतिनिरस्तं। स्मर्यमाणारोपमात्राभ्युपगमे रथादिसृष्टिप्रतिपादक रा०म०
श्रुतिविरोधापत्तेः। किंचनानुभूयमानपुरोवर्तिनिगजादेरध्यासः अननुभूतत्वादिंद्रियासंप्रयुक्तत्वात्। नापि
स्मर्यमाणेनरथाध्यासः धर्मिप्रत्यक्षाभावात्तस्यैवापरोक्षाध्यासहेतुत्वात्। किंचतत्रगजाद्यनुभवेपिन ५९

९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहिरिंद्रियगोचरो ज्ञोऽसन्निकृष्टत्वात्। ज्ञानप्रत्यासत्तेश्च निराकृतत्वात्। न च संस्कारोद्बोधो वा प्रत्यासत्तिः
स्वप्रसिद्धांतात्। प्रत्यासत्तित्वे च तत एव वन्ह्यादेश्च प्रत्यक्षत्वापत्तेः। अनुमानोच्छेदापत्तेः। नापि म
नसो बहिरिंद्रियासंप्रयुक्तस्य तस्मिन्मनसोऽसामर्थ्यात्। न चानुमानात्तत्प्रतीतिः स्वप्नरथमग्न
क्षमित्यनुभवविरोधात्। लिंगाद्यप्रतिसंधानेपि गजानुभवस्य जायमानत्वाच्च। तस्मात्स्वाप्नगजादि
ज्ञानमन्यथाख्यातिनिरासेऽलं विस्तरेण। तदेतदन्यथाख्यातिनिराकरणं मनसि निधायोपसंहरति। तस्मादि
ति। प्रातिभासिकरजतार्थमेवाहयावदिति। प्रतिभासनियतसत्ताकरजतमिति यावत्। ननु त्वन्मतेपि कुत्र
याध्यासः। न तावच्छुक्तिरजताधिष्ठानत्वाहि देशविशेषस्योपलभ्यमानत्वेन प्रत्युद्धृत्यांतःकरणाव
च्छिन्नस्य चैतन्यस्याधिष्ठानत्वायोगात्। नहि देशविशेषः स हि पारमार्थिकः प्रातिभासिको वा नाद्यः विंध्या
दिदेशविशेषस्य पारमार्थिकस्यासन्निकृष्टत्वात्तदवच्छिन्नचैतन्ये रजताध्यासायोगात्। न द्वितीयः त
स्यापि प्रातिभासिकत्वे रजतादिपूर्वकालीनत्वाभावेनाधिष्ठानत्वावच्छेदकत्वानुपपत्तेः तस्माद्रजतादेरध्या
सनिवादयति नन्विति। शुद्धचैतन्यस्यैवाधिष्ठानत्वान्न रजताध्यासानुपपत्तिरिति परिहरति। नचैतन्य
स्येति। ननु चेतनसमयिनाज्ञानमधिष्ठानं ज्ञानविषय एव संप्रयुक्तशुक्तिकाद्यावध्यासदर्शनादित्यत आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ५० हा स्वयंप्रकाशस्येति। ज्ञायमानत्वमेवाधिष्ठानत्वे प्रयोजकं लाघवात् नन्वत्र प्रकाशपरप्रकाशसाधारणो
न नु चक्षुरवच्छिन्नज्ञानविषयत्वं संप्रयोगजन्यज्ञानविषयत्वं वा गौरवादिति भावः। ननु स्वयंप्रकाशरू
पमपि चैतन्यं नाधिष्ठानं चिन्नादिनाऽज्ञायमानेन तत्र जडाध्यासायोगात् इत्यत आह। तद्रूपेणेति। चै
तन्यस्य तत्वेन प्रकाशमानमेवाधिष्ठानं ननु सच्चिदानन्दलक्षणापरिमितस्वरूपेण न तद्रूपस्य तस्य प्रकाशा
स्त्वविषयस्य प्रत्यगविद्यायाः आवरणत्वादित्यर्थः। नहि तद्रूपेणावाचैतन्यं कथं प्रकाशनेत्यत आह प्र
तयोंद्यद्वर्त्तिवत्तस्य जः सन्नरथ इत्यादौ सत्वेन प्रतीयमानत्वात्तस्य च सत्वस्याधिष्ठानरूपत्वा
दतिरिक्तसत्तायाः अनभ्युपगमाच्चैतन्यमपि तद्रूपेण प्रथत इत्यभिप्रेत्याह। प्रतीयमानो हीति। नन्वेवम
ध्यासे गजरन्निर्देशविशेषाधिष्ठानकतया गजाद्युपलंभो न स्यादित्यत आह। देशविशेषापीति। ननु रथा
देश्चैतन्याध्यस्तत्वेन चैतन्यं न इन्द्रियग्राह्यत्वयोरनवभासप्रसंगः नहि शुक्तिरूप्यादाविव इन्द्रियसंप्रयोगः स
वच्छिन्नचैतन्यमधिष्ठानं येन न तदैन्द्रियकत्वावभासे हेतुः स्यादित्यत आह। रथादावितिः अपि रथमनन्त
न सच्चैवेदं त्वमपीत्यर्थः। नन्विन्द्रियग्राह्यत्वस्यापि प्रातिभासिकत्वकल्पने गौरवमित्यत आह। न
हीति। ननु देशविशेषस्याप्यध्यस्तत्वेन नाधिष्ठानमतः करणावच्छिन्नचैतन्यं न तस्यैव तत्वमेव प्रतिभासा र राम० ५०

101

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सधीः स्वप्नोभूत्वा इमं लोकमनुसंचरतीति श्रुतेः श्रुतिचैतन्ये तावत्प्रातिभासिकं तदंतःकरणावच्छिन्नाधिष्ठानत्वस्वप्नादिवच्छुद्धचैतन्यमाश्रित्यापि तद्विशिष्टप्रतिभासोपपत्तेः सधीरित्यादिश्रुतेस्तु हृदयभिः स हृदयचैतन्यमारोहति गर्दभीत्यत्र च वाणीभारानन्वयवत् स्वप्नायियत्तीवास्रज्जरदैवेन लक्ष्यासोमेपिबस्वाहेत्यत्र त्वस्तुः सहत्वप्रतियोगिनः पात्रत्वानन्वयवत्सुधियासह वर्तमानमात्मास्वप्नोभूत्वेत्यनन्वयलक्षणाबाधास्येष्वप्युपपत्तेः। तस्माच्छुद्धमेव चैतन्यं स्वप्नगजाद्यधिष्ठानमिति। नन्वंतःकरणस्य स्वप्नाध्यासाधिष्ठानतावच्छेदकत्वाभावेपि तदधिष्ठानत्ववत्तेतोंतःकरणावच्छिन्नतया पुरस्खादिवदहं गज इति प्रतीत्यापत्तिरित्याशंक्य शुक्तिरूप्यवदनुभवस्येदमाकारानुभवाहि नसंस्कारजन्यत्वान्नाहमाकारत्वमित्याह। अहं गज इति। ननु स्वप्नगजादिज्ञानस्य तत्कालोत्पन्नत्वन विषयत्वे उपादानाभावात्। तथाहि न तावच्चैतन्यमुपादानापरिणामित्वेन दूषितत्वात्। नाप्यविद्या सा हि न मूलाविद्या तदुत्पादकगजाद्यवयवाभावेन तस्याः साक्षात्तदुपादकत्वायोगात्। घटादेरपि मृत्पिंडादिस्वावयवद्वारैव मूलाविद्याकार्यत्वाभ्युपगमात्। नापि मूलाविद्या सापि न बाह्यदेशावच्छिन्नचैतन्याश्रिता गजादिहेतुः अंतःकरणावच्छिन्नाश्रितागजादिहेतुः अंतःकरणावच्छिन्नचेतनाश्रिता देशविशेषस्यापि प्रातिभासिकत्वात्।

KKSU Library RAMTEK 441 106 Dist. Nagpur M-1635

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणस्य रजताद्युपादानाविद्याधिष्ठानतावच्छेदकत्वेन प्रमाणाभावः तस्माद्रजतादेः प्रातिभासिकत्वमि
टी० त्याशंक्य मूलाविद्यैव साक्षात्त्वमरजताद्युपादानं रजतादेश्च शुक्तिरूप्यवत्प्रातिभासिकत्वात् नतत्
वयवापेक्षा लौकिकपरमार्थरजतादेरेव तदपेक्षत्वादित्यभिप्रेत्याह स्वाप्नरजतादय इति। अंतःकर
५१ णाद्युपहितेन चात्र प्रमाणाभावः स्वप्नरजताद्युत्पत्त्यनुपपत्तेरेव प्रमाणत्वात्। अन्यथा साक्षादविद्याप
रिणामत्वे तद्वत्तावपि केवलाविद्यायाः सत्वेन तत्प्रातिभासापत्तेरिति भावः। एतद्व्यापानतः कूटाज्ञा
नोपादानादेवस्वप्राग्ध्यासोपपत्तेः नच सुषुप्तौ तत्प्रातिभासापत्तेरिति भावः। एतद्व्यापा ततः
कूटाज्ञानोपादानादेवस्वप्राग्ध्यासोपपत्तेः नच सुषुप्तौ तत्प्रातिभासापत्तिः अंतःकरणभावा
त्तस्य च रागद्वेषादिवत्तत्र निमित्तकारणत्वात् किंचातःकरणाद्युपहितेन रजताद्युत्पत्तिः कूटरजतावय
वादेरभावात्। यदि च प्रातिभासिकत्वान्न तदवयवापेक्षा नहि हि मूलाविद्यैव साक्षात्प्रा तिभासिक
त्वदुत्पत्तिसंभवे किं पतंगतेनांतःकरणोपाधानानिविष्टेन ननु स्वाप्नरजतादेर्मायापरिणामस्य श्रुत
त्वेन तत्पाध्यासेऽदानीं तदधिष्ठानब्रह्मसाक्षात्काराभावेन घटादिवद्बाधो न स्यात् तात्तज्ज्ञस्य जाग
रणेपि अनिवृत्तत्वात् प्रातिभासापत्तिरिति शंकते। नन्विति बाधानुपपत्तिमंगीकरोति उच्यत इति न राम०
५१

102

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिं स्वाप्नगजादिर्जागरणेप्यनुवर्त्तेतेत्याशंक्य बाधाभावेपि निवृत्तत्वान्नानुवृत्तिरिति वक्तुं चरमं
भेदेन निवृत्तिबाधौ निरूपयति कार्यविनाशो हीति। उपादानेनेति। अज्ञानेन सहेतिशेषः। तेन मृ
त्पिंडेन सह घटध्वंसेपि न बाधः ध्वंसेपि न बाधः तदुपादानभूताया अविद्याया अनिवृत्ति
त्वादिति ध्येयं। ननु केवलं स्वरूपतो निवृत्तिबाधयोर्भेदः किं तु कारणभेदादपीत्याह आद्यस्ये
ति बाधस्येत्यर्थः। ततः किमित्यत आह। तदिहेति। तस्माद्बाधनिवृत्त्योर्भेदादिह जागरणेपि
माबाधितत्वं अविद्याया न निवर्त्तेतेत्यर्थः। न हि स्वविद्याविनाशाभावाद्गजादिनिवृत्तिरपि न स्यादि
त्याशंक्य नन्वनुपादानविनाशादेव सर्वत्र कार्यविनाशः किं तु कारणांतरेणापि गजादेश्च घट
देरुत्तरसंचारेणैव विरोधिवृत्त्यंतरेणापि निवृत्त्युपपत्तेर्न विरोध इत्याह। उत्तरसंचारेणेति।
ननु स्वप्न एव गजप्रतिभासानंतरं अश्वप्रतिभासस्य मध्येपि तज्ज्ञानकनिष्ठः संस्कारादिसत्वे
न तदापि गजोनुवर्तेतेत्याशंक्य फलबलात्तत्राश्वादिपरिणाम एव विरोधीति तेनैव तन्निवृ
त्तिरित्यभिप्रेत्याह। विरोधीति। ननु स्वप्नेस पदार्थस्य विनाशानंतरं नंतरं स्वप्नो विरोधिपदार्थो
नानुदयादित्याशंक्य तत्र निद्रानाशो निवर्त्तकस्तादृश एवेत्याह। स्वप्नजनकीभूतेनेति। न चानग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० मः फलबलेनानुगतस्यैव निवर्त्तकत्वाभ्युपगमात् । नन्विदानीमबाधितस्यापि स्वप्नप्रपंचस्य प्रातिभा
५२ सिकत्वाभ्युपगमे शुक्तिरूप्यस्य शुक्तितत्त्वज्ञानेपि बाधो न स्यात् तदभावेप्यागंतुकजन्यत्वेन प्राति
भासिकत्वोपपत्तेरिति चेत् किं शुक्तिरजतस्य मूलाविद्यापरिणामत्वपक्षे वा तच्च नाधरसाहाये
वैचेति । कार्यविनाशस्य हेतुविध्वंसे सिद्धे सतीत्यर्थः । शुक्तिरितिज्ञानेनेति नेदं रजतमिति ज्ञानेन स
पि दृष्टत्वं । भेदग्रहाच्च ज्ञानकार्यस्य रजतस्य समानविषयभेदसाक्षात्कारेणैव बाध्यत्वात् । न
चैवं शुक्तितत्त्वज्ञानमेव बाधकं नेदं रजतमित्यत्र तु वाद इति पंचपादिकाविवरणविरोध इति वाच्यं
। भिन्नविषयभेदज्ञानस्य शुक्त्यज्ञानकार्यरजताबाधकत्वेन तत्परतया टीकावाक्योपपत्तेः । न च
रजतस्य मूलाविद्याकार्यत्वे प्रमाणाभावः अनुमानादेस्तत्प्रमाणस्योक्तत्वात् । ननु मूलाज्ञाना
नंगीकारेणानाज्ञानाप्रवृत्तौ मायामिसादिश्रुतिविरोध इति चेन्न मूलाज्ञानस्यैवावस्थाभेदान्मूला
ज्ञानपदवाच्यत्वस्याभ्युपगमात् तत्र मूलाज्ञानस्यैव मूलाज्ञानरूपत्वेन स्य शुक्तितत्त्वज्ञानान्निवृ
त्त्यापत्तिः तच्च ज्ञानात्तत्तद्विषयावरणभेदेकैकैकविनाशात्तन्नैवं समानविषयसर्वावरणशक्तीनां यु
गपदेव शुक्त्यादिज्ञानान्निवृत्तिप्रसंग इति प्रकृते समानविषयत्वेप्येकैकावरणशक्तेरेव कार्यबलात् एम०

५२

105

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वज्ञानेन नचाविलयकल्पनानास्मन्मथानापमतेपि एकज्ञानेनैव सर्वज्ञानप्रागभावानांप्रतियोगि
ज्ञानत्वस्वरूपयोग्यत्वविशेषेपि फलबलकल्प्यस्वभावविशेषादेक एव ज्ञानियोगिनां निवर्त्तते एवं
ममंतरा एकमानविषयकमूलाज्ञानानामावरकत्वेप्यात्मनि उनरज्ञानानुभवाद्नुमानेनप्रत्या
ज्ञुनस्त्वज्ञानादेकस्मादेकैकावरणशक्तिनिवर्त्तत इति तुल्यं। ननु तत्त्वज्ञानादावरणशक्तेरे
व विनाशाभ्युपगमे मुक्तावप्यज्ञानं स्यात् न च ब्रह्मसाक्षात्कारात्प्रागेव सर्वावस्थाविनश्यं
तीति प्रमाणमस्तीति चेत् न किं मुक्तावापाद्यमानमज्ञानमनावरकमुतावरकं नाद्यः अनावर
काज्ञाने प्रमाणाभावात्। द्वितीयेपि न तावद्ब्रह्मावरकं ब्रह्मणः साक्षात्कृतत्वेन तदावरणशंका
नवकाशात् नापि प्रपंचावरकं मूलाज्ञानं निवर्त्तकेन ब्रह्मसाक्षात्कारेण तन्मूलनिखिलप्र
पंचस्य निवर्त्तकत्वात् अविषयाविद्यावस्थायामभावात् भावे वा तस्यापि निखिलनि
वर्त्तकब्रह्मज्ञानेन निवर्त्तितत्वात् तस्मान्मूलाज्ञानस्यानाद्यवस्थाभेदेन मूलाज्ञानं तत्परि
णामभ्रमशुक्तिरजतमिति नैव सहाध्यासस्य तत्त्वज्ञानान्निवृत्तिरिति उक्तो बाधः। तदुक्तं विव
रणाचार्यैः मूलाज्ञानस्यैवावस्थाभेदाद्रजताद्युपादानानि शुक्तिकाज्ञानैः सहाध्यासेन निवर्त्तन्त इति भ्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लाविद्याकार्यत्वपक्षे रजतस्य बाधाभावमनुमोदते मूलाविद्येति। निवृत्तिमात्रमिति। नन्वस्मिन्
पक्षे शुक्तिरजतज्ञानस्य प्रमात्वापत्तिः संसारदशायामबाधितत्वेन उक्तलक्षणसत्त्वात् नचा
टी० ५३ र्थक्रियाकारित्वमबाधितत्वं शुक्तिरजतं च नार्थक्रियाकारीति नोक्तदोष इति वाच्यं। स्वप्नोपलब्ध
गजादेः प्रसिद्धगजवदर्थक्रियाकारित्वादबाधितत्वस्याप्यर्थक्रियाविशेषणत्वे स्वात्माश्रयापादन
वस्यापातात्। स्वप्नस्त्रीदर्शनस्य सत्यसमृद्धित्वदर्शनात्। नच प्रातिभासिकभिन्नविषयत्वमबा
धितपदेन विवक्षितमिति परं स्वप्नादेरपि प्रातिभाससमयमात्रवृत्तित्वेन न तज्ज्ञानस्याप्रमात्वा
पत्तिरिति चेन्न आगन्तुकदोषाजन्यत्वस्य तद्रजतमात्रार्थविषयकत्वस्य वा बाधितपदेनात्र विवक्षि
तत्वात् प्रातिभासिकरजतस्य चागन्तुककाचादिदोषजन्यत्वान्न तज्ज्ञानेऽतिव्याप्तिः न साधु
तं रजतस्य मूलाविद्याकार्यत्वं। ननु रजतस्य तत्त्वज्ञानाच्छुक्तौ विनाशस्वीकारमङ्गीकृते तस्य तत्रा
नुत्पत्तेः दोषसहकृतमायामूलाविद्यया वा प्रातिभाससमये तत्र तदुत्पत्त्यभ्युपगमेन रजतं का
लत्रयेऽप्यरजतं नास्तीति त्रैकालिकाभावप्रतीतिविरोधात् नच स्वप्नप्रपंचवत् प्रातिभासिकत्वा
पपत्तिः तस्य तत्राप्यसत्त्वनिवृत्तेरित्याशयेन शंकते नन्विति। किं व्यवहितविषयत्वे स्वनिषेधधर्मित्वप एम० ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल संभवात् अन्यथाख्यातिः सिषाधयिषिता रजतप्रातिभासिकरजतेनेदन्तु ... इति न । आद्यः स्वविहित
रजतस्य पुरोवर्तिन्यप्रसक्तत्वात् । द्वितीयेपि किमधिकरणे कदाचित्त्वनियोगितावच्छेदकावच्छि
न्नप्रतियोगिनो रजतस्य तदवच्छिन्नप्रतियोगिकत्रैकालिकाभावप्रतीतिविषयत्वानुपपत्तिः
प्रतीयमानाभावप्रतियोगितावच्छेदकानाश्रयत्वाद्वा न चाद्यः रजतापत्तिरिसाह । न हीति । द्वितीय
मनुवर्त्तिकिंस्विति । रजतस्य लौकिकपरमार्थसत्त्वलक्षणप्रतियोगितावच्छेदकानाश्रयत्वेपि सदि
दं रजतमिति तद्वृत्तया ज्ञायमानत्वान्न निषेधधीविषयत्वानुपपत्तिरिसाह । लौकिकेति । लौकिक
परमार्थत्वावच्छिन्नप्रतियोगिताकप्रातिभासिकरजताभावे निषेधधीविषयस्तथैः । ननु लौ
किकपरमार्थत्वं न प्रतियोगितावच्छेदकं प्रतियोग्यवृत्तित्वादिति चेन्माभावज्ञानेयेनरू
पेणानिपमेन प्रतियोगिनं विषयीकरोति तस्यैव प्रतियोगितावच्छेदकत्वात् तथापि कथम
भावज्ञानमिति चेत् किं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिधर्मिकसभावाद्भावज्ञानानु
पपत्तिः उतव्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे पत्तिर्वा नः । नाद्यः लाघवेन तदवच्छिन्नप्र
तियोगिज्ञानत्वेनैव प्रतियोगिज्ञानस्याभावधीहेतुत्वात् द्वितीये पदसाह व्यधिकरणेनिरुक्तिगते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंतापाद्यवच्छिन्नलौकिकपरमार्थतापादवरजते चेतीत्यभ्युपगमेन तदवच्छिन्नचैतन्ययोगिनस्तत्रास
टी० त्त्वान् न तदवच्छिन्नचैतन्ययोगिकाभावानुपपत्तिरिति परिहरन्ति। न पारमार्थिकस्येति। न हि सर्वज्ञान
५४ थारवास्यापत्तिरविशेषादित्यत आह। यद्वेति। नन्वारोप्यासन्निकर्षस्थल एवानिर्वचनीयवत्त्व
भ्युपगमे स्फटिकेऽपि सन्निहितजपाकुसुमगतलौहित्यस्यावभानापत्तौऽनिर्वचनीयलौहित्या
भ्युपगमेऽविरुद्धैवेसा शंका कुसुमासन्निकर्षस्थल एव तत्रानिर्वचनीयलौहित्याभ्युपगमादन्य
त्र तदनुपपत्तावपि न विरोध इत्याह। अत एवेति। नन्वेवं यत्र स्फटिकमात्रे सन्निकृष्टे तदुपरंजके ज
पाकुसुमं हस्तादिनापिहितं तत्रानिर्वचनीयलौहित्यापत्तिरिति शंकते। नन्वेवमिति। इष्टत्वा
दिति। न च कुसुमासन्निकर्षेऽपि तत्सहचरितप्रभायाः सन्निकृष्टत्वात्तद्गतलौहित्यमेव स्फटि
के भासतामिति वाच्यं जपाकुसुमप्रभाया एवासिद्धेः तदुक्तं पंचपादिकाचार्यैः यथा पद्मरागादिप्र
भा नितरामप्रयासमुखोपलभ्यते न तथा जपाकुसुमादेरिति। नन्वेवं मतः कारणगतकृत्स्नत्वादेः नि
त्वं सन्निहितत्वेन तस्यैवात्मनि भानसम्भवे कथमनिर्वचनीयकत्वाभ्युपगम इति चेत्तत्र किं कार्त्स्न्य
त्वादेरन्यनिष्ठमथाख्यातिः सिषाधयिषिता पारमार्थिकता वा नाद्यः इष्टत्वात्। न द्वितीयः अहंका राम० ५४

108

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस्यात्मनिष्ठत्वमसत्त्वेनानिर्वचनीयत्वं यत् तद्धर्मस्य कर्तृत्वादेः स्वतएवानिर्वचनीयत्वात् नहि मेहंद्रजाल
किनिर्मितस्य गजस्य तदुपकरणं परमार्थसद्दृष्टमिति। यद्वा आत्मनः कर्तृत्वादिग्राहकशास्त्रप्रामा
ण्यायैवं विषयादिव्यावहारिकं तदभ्युपेयते। न च कर्तृत्वादृष्टव्यवहारापत्तिः धर्मिण एतस्मात्तः करणो
ऽन्याध्यासेन धर्मिभेदानवभासनात् ननु कुसुमसन्निकर्षस्थले स्फटिके लौहित्यवृत्तौ नैर्पयान्य
थाख्यातिरूपत्वात् तत्र च तत्स्वरूपसामान्यलक्षणस्याव्याप्तिः लौहित्यसत्ताकारत्वसौ भिन्नदेशत्वेन त
दुपहितचैतन्ययोर्भेदात्। न चांशस्वपीतत्वभ्रमेऽव्याप्तिः पीतत्वादेर्गोलकादिदेशस्थितपीतद्रव्यादि
निष्ठत्वेन तदुपहितचैतन्यस्य तदाकारवृत्त्यवच्छिन्नचैतन्यस्य च परस्परभेदात्। किं चान्यथाख्यात्य
भ्युपगमेऽत्र हि षयस्य लौहित्यादेः संसारदशायामबाधितत्वेन भ्रमत्वापत्तेरित्यत आह एवमिति।
ऽध्यासमाशयः नतावत्स्फटिके लौहित्यभ्रमे सक्त लक्षणस्याव्याप्तिः स्वयाहरनीति वन्स्यारत्नभ्र
पमानारोपत्वेन लौहित्ये न हि रूपगकुसुममाहात्म्यविषयत्वात् न च लौहितभेदग्रहादारोपानुप
पत्तिः विवेकाग्रहस्य सोपाधिकाध्यासे व्यनिर्वाचकत्वान्नापि पीतत्वादिभ्रमे लक्षणाव्याप्तिः शंखे
व्यक्तिस्फालितानां नयनरश्मीनां पीतद्रव्यमाध्यपत्तामेव दोषवशान्न शंखे तदुरूपपीतत्वादिग्राहकत्वे

109

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
५५

पीतत्वतदाकारत्वयोर्भिन्नदेशत्वाभावात् यत्तु स्फटिकलोहित्यादिभ्रमे प्रमालक्षणस्यातिव्याप्तिरिति तन्न
न तावत्संसर्गांशेऽतिव्याप्तिः तस्य पुरोवर्तिनि निर्बाधितत्वात् । नापि लोहित्यांशे तस्याबाधितत्वेऽपि अ
नधिगतत्वाभावात् । एवं योग्यत्वाकारत्वरूपहितविषयावच्छिन्नचैतन्याभिन्नत्वं शुक्तिरूप्यंशस्यापी
तत्वादि प्रत्यक्षभ्रमव्यापकत्वात् प्रमाणचैतन्यस्य तद्विषयांशे प्रत्यक्षत्वप्रयोजकमित्युक्तं सं प्रतितदेव
प्रत्यक्षज्ञानं न पुनर्विभजते उक्तं प्रत्यक्षमिति । इन्द्रियाणि न चाच प्रमाणाभावः रूपाद्युपलब्धयः कार
णसाध्याः कार्यत्वात् छिदावत् इत्यनुमानस्य तत्रोक्तत्वात् । ते सर्वे प्राणा अन्नरूपा मे इति सागमस्य इन्द्रियसद्भावे
प्रमाणत्वात् तानि गोलकमात्राणीति सौगताः न छिद्रेषु निमीलने सत्यकाः न तावद्गोलकमात्रमिन्द्रियं तद्वि
रहितानामपि सर्पादीनां वृक्षादीनां च शब्दाद्युपलब्धेः अत एव न तन्निष्ठा शक्तिः तानि गोलकाश्रितश
क्तानि शक्तिमद्द्रव्यांतराणि सर्वगतानीति योगाचार्याः प्रतिपरिहरेत्तदप्यपेशलं प्रमाणाभावात् नन्विन्द्रि
याणि सर्वगतानि सर्वं च दृष्टकार्यत्वात् आकाशवदित्यनुमानमिति चेन्न हेतोरसिद्धत्वात् । यत्र नरा
दौ हि तत्र सर्वत्र दृष्टकार्यत्वस्य च शरीरेऽपि गतत्वात् नचेन्द्रियाणि सर्वगतानि परोपाधिगमनत्वा
त् आकाशवदिति वाच्यं शरीरोपाधिगमनस्य शरीरावयवेन प्रत्यभिचारणात् । सर्वगतत्वे युगपत्सर्ववि राम
५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षयोपलब्धिप्रसंगाच्चातान्यणुपरिमाणानीत्यन्येन तद्युक्तं विषयावभासस्याणुमात्रदेशतापत्तेः सर्व
शरीरव्यापिशीतस्पर्शोपलंभानुपपत्तेः युगपच्चक्षुषः सर्वशरीरसंबंधाभावेन समूहालंबनाभावप्रसं
गाच्च चक्षुःश्रोत्रयोर्ध्रुवभेर्यादिदेशपर्यंतगमने सद्यः एवं चाघ्राणापत्तेश्च तानि मध्यमपरिमाणाय
हंकारोपादानानीति सांख्याः तदपि मानहीनं प्रणयवचनमानमिति चेन्न महत्तत्वविकारत्वप्रसक्त्य
श्रुतिविरोधेन तस्य स्वार्थेऽप्रमाणत्वात् ततश्च परिशेषाद्भौतिकत्वसिद्धिः इंद्रियाणि प्रत्येकं भू
तारब्धानीति वैशेषिकादयः तदप्ययुक्तं प्रमाणाभावात्। चक्षुस्तैजसं रूपादिषु पंचसु मध्ये रूपस्यै
वाभिव्यंजकत्वात् प्रदीपवत् इत्यनुमानस्य च विपक्षे बाधकाभावेनाप्रयोजकत्वात् ततश्चेंद्रि
याणां सिद्धं पांचभौतिकत्वमिति तान्निषेधंति नैयायिकादयः तन्निराचष्टे पंचेति। इंद्रियाण्यप्राप्यका
रीणीति सुगताः कल्पयंति तान् प्रत्याह सर्वाणि चेति। अयं भावः तन्नावत्स्पर्शनरसनघ्राणेंद्रिया
णामसंयुक्तार्थग्राहकत्वं दूरत एव स्पर्शरसगंधोपलब्धिप्रसंगात्। अत एव चक्षुःश्रोत्रयोर
प्राप्यकारित्वे रसनादिवत्तयोरपि संयुक्तार्थग्राहकत्वानुमानात्। ननु सर्वेंद्रियाणां संयुक्तार्थग्रा
हकत्वाविशेषे किंचित्स्थानविषयग्राहकत्वं कस्यचिद्दूर इति विभागः कथमित्याशं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ५६ वधफलवत्कल्पस्वभावविशेषादित्याह। नत्वेति। चक्षुःश्रोत्रे इति। न च चक्षुःश्रोत्रयोर्विषयदेशप्राप्त
योरेव स्वस्वविषयग्राहकत्वेन त्विह स्यादित्य ध्रुवादिमण्डलानुभवो न स्यादिति वाच्यं चक्षुरादेरतिस्वच्छ
द्रव्यत्वेन संवित्तकिरणवच्छीघ्रगतिसंभवात्। ननु चक्षुरिन्द्रियं भवतु परिच्छिन्नत्वाद्दूरदेशं गत्वा
विषयग्राहकं सर्वगतेन तु गगनेन कर्णशष्कुल्युपाधिना श्रोत्रपदवाच्येन कथं भेर्यादिदेशं गत्वा शब्द
ग्राहयेदित्याशंक्याह। श्रोत्रस्यापीति। न तु भेरीदण्डसंयोगादाकाशसमवाये भेरीदेशे कश्चिच्छब्दः
संजायते तत्तत्समवायिकारणतया शब्दान्तरमारंभते एवं सोऽपीति परंपरया श्रोत्रप्रदेशमवतीर्णस्य
शब्दस्य तेनोपलंभः भेरीशब्दो मया श्रुत इति धीरत्र भ्रान्तैवेति तार्किकप्रक्रियामाशंक्य निरस्यति।
वीचीतरंगादिन्यायेनेति। कदंबकुसुमन्याय आदिशब्दार्थः। भ्रमत्वकल्पनेति। नेदं रजतमितिवन्ना
यं भेरीशब्द इति बाधकप्रत्ययाभावेन तस्य भ्रमत्वेन युक्तमिति भावः। परमतमुपसंहरति। तदेवमिति।
प्रत्यक्षप्रमानिरूपणात्तत्करणत्वेन प्रत्यक्षप्रमाणं निरूपितमिति भावः॥ ॥इति परिभाषायां प्रत्यक्ष
परिच्छेदः॥ ॥एवं सर्वप्रमाणज्येष्ठतया प्रथमं प्रत्यक्षं प्रमाणं निरूपितमिदानीं शिष्यावधानार्थं प्र प्र० ५६
नुमाननिरूपणं क्रियत इति प्रतिजानीते अथेति। प्रत्यक्षानन्तरमित्यर्थः। सर्वमतसाधारणलक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णमाह अनुमितीति। ननु नानुमितिकरणं लक्षणं तदुष्टकानुमितेर्लक्षणाभावेन दुर्निरूपणत्वात्
। न च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं लक्षणं तत्त्वेन तज्जन्यत्वमिह विवक्षितमित्यनुव्य
वसायादौ विषयत्वादिना तज्जन्यत्वेनातिव्याप्तिः तत्त्वं च व्यभिचारज्ञानप्रतिबंधकज्ञानविषय
प्रकारकव्याप्तिविषयकपक्षधर्मताज्ञानत्वं तच्च विशकलितस्थलीयलिंगपरामर्शसाधारण
मिति नासंभव इति वाच्यं तथापि न्यायमते धूमो वह्निव्याप्य इत्यपि चालोकवानिति समूहालंबना
दप्यनुमित्यापत्तेः न च पक्षवृत्तित्वहेतुतावच्छेदकव्यभिचारज्ञानविरोधिवैशिष्ट्यविषयत्वं विवक्षि
तमिति युक्तं साध्यगोचरपक्षधर्मव्यापकताज्ञानकारणतावादिमते अनुमितेर्निरुक्तलक्षणा
भावात् न्यायमते व्यतिरेकिलिंगपरामर्शस्य साध्याभावेशिएवसाधनाभावनिरूपितव्याप्तिवैशि
ष्ट्यविषयत्वेन ततोनुमित्यभावात् तत्स्यानुमितिकरणत्वेनानुमानस्य लक्षणमित्याशंक्याह अ
नुमितिश्चेति। व्याप्तिज्ञानत्वेनेति। व्याप्तिप्रकारकज्ञानत्वेनेत्यर्थः व्याप्तिपदं च व्यभिचारिज्ञानवि
रोधिपरं नतु येयत्कदभिमतव्याप्तिपरं तेन तज्ज्ञानक अन्योन्याभावादिगर्भे व्याप्तिज्ञानादनुमित्य
भावापत्तिः अन्योन्याभावगर्भाया असत्ताभावगर्भायाश्च व्याप्तेरभावघटितत्वेन तज्ज्ञानस्य

113

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
५८

हविषयत्वेनानुमित्यहेतुत्वादिति चेन्न शेषसाधनाप्रयुक्तसाध्यसामानाधिकरण्यलक्षणव्याप्तिज्ञानेपि
शब्दादिनासंततभावादिगर्भव्याप्तिज्ञानादप्यनुमितिदर्शनेन गृहविषयत्वेपि तज्ज्ञानस्यापि अनुमितिहेतु
त्वात् न चैवं परस्परव्यभिचारात् किमपि व्याप्तिज्ञानं न हेतुः स्यादिति वाच्यं व्यभिचारविरोधिज्ञानविषयत्वेन
सर्वव्याप्त्यनुगमस्योक्तत्वात् अवच्छेदकविवक्षायाः प्रयोजनमाह। अनुव्यवसायादिरिति तज्ज्ञानव्यवस्
तिशाब्दज्ञानादिरादिशब्दार्थः। अनुव्यवसायविषयत्वेन स्मृतौ समानविषयानुभवत्वेन वा कार्यार्थज्ञानप
दार्थज्ञानत्वेन च हेतुतायाः कल्पनान्न व्याप्त्यापत्तेः। किंचैवं स्मृतेरतत्कालावच्छेदेनयास्याभावज्ञानाप्र
तिबंधकत्वेपि तत्कालविषयस्याभावज्ञानप्रतिबंधकत्वेन तदभावस्य प्रतिबंधकाभावत्वेन प्रागभा
वादिसाधारणस्य यास्याभावानुभवहेतुतया तस्यापि स्मृतित्वापत्तिः अपि च स्मृतिप्रागभावजन्यत्वेन प्रयो
जकत्वं स्मृतित्वज्ञानाधीननिश्चयत्वात्। अन्यथानुमित्यादिप्रागभावजन्यत्वस्यैवानुमितिप्रयोजक
त्वापत्तेः न तत्र प्रयोजकांतरमनुसरणीयं इत्यादि स्मृहेराह। संस्कारमात्रजन्यत्वस्येति। संस्कारत्वावच्छिन्नकार
णताप्रतियोगिककार्यताश्रयत्वस्येत्यर्थः। ननु ध्वंसवारणेन संस्कारजन्यज्ञानत्वमेव स्मृतित्वप्रयोजकं अ
स्य संस्कारत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वापेक्षया लघुत्वात्। ततश्चानुमितेः स्मृतित्वं रा म०
५८

119

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्वारमिति चेन्न। न्यायमतेऽपि लिंगकारणतापक्षे तत्संस्कारलिंगकानुमितेरपि तत्संसर्गाग्रहाय दृढसंस्कारमात्रजन्य
त्वेन समानविषयसंस्कारजन्यत्वं विवक्षितं अनुमितेश्चाभिन्नविषयव्याप्तिसंस्कारजन्यत्वात्तत्स्मृतित्वेन
चलिंगोपहितलौकिकभानपक्षे तद्देशे स्मृतित्वापत्तिः तत्सक्षस्याप्रामाणिकत्वेनानुपादेयत्वात्तैवं प
त्यभिज्ञायाः सिद्धांतेन तत्संस्कारजन्यतया तदंशे स्मृतित्वापत्तिरिति वाच्यं। इष्टत्वात् परोक्षत्वापरोक्षत्व
वत्स्मृतित्वानुभवत्वयोरेकत्रावच्छेदकभेदेन वृत्तौ विरोधाभावात्। कथमिति व्याप्तिसंस्कारेणानुमितिहेतुः न
दाव्याप्तिस्मरणात् तन्नाशे सति स्मृतिजन्यानुमितेर्व्यभिचारादिति भावः। संस्कारस्य यत्र पक्षधर्मताज्ञानादु
त्तोधः तत्र किं व्यभिचार उतान्यत्र। नाद्यः पक्षधर्मताज्ञाने व्याप्तिसंस्कारोद्बोधवत्सत्त्वेऽनुमितेरवश्यसत्त्वेः।
न द्वितीयः व्याप्त्यनुभवस्थले तत्संस्कारस्यानुमितिहेतुतया कॢप्तत्वेन स्मृतिस्थलेऽपि तस्य हेतुत्वकल्पना
दित्याह व्याप्तिस्थल इति। नहीति। ननु स्मरणानंतरं संस्कारस्य नाशनियमवदवस्थाननियमस्याभावेन यत्र
कदाचिद्व्याप्तिस्मरणात् तद्विनाशस्तत्र कथं संस्कारो न हेतुरिति चेन्नानुमितौ करणांतरस्य दुर्निरूपत्वेन व्याप्ति
ज्ञानकरणत्वस्यावश्यं वाच्यतया तत्संस्कारस्य व्यापारत्वेनानन्यगत्या अनुमितिहेतुत्वकल्पनात्। सहकारि
त्वादीति कारणतावच्छेदकत्वादिसर्थः। अन्यथा व्याप्तिसंस्कारोद्बोधस्यापि प्रकारत्वेन तद्द्वारा व्याप्तिसंस्का

115

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
५८

एवकरणं स्यात्तद्व्याप्तिज्ञानं तत्संस्कारतदुद्बोधपक्षधर्मताज्ञानैरेवानुमितिसंभवे व्याप्तिज्ञानस्यापि कारण
त्वकल्पने गौरवान्मानाभावाच्च न यासर्वत्रापि स्मृतौ संस्कार एव करणं न पूर्वानुभव इति बहुव्याकुलितं
स्यात्। नन्वेवमपि व्याप्तिस्मृतिरेवानुमितिहेतुर्नोद्बुद्धसंस्कारः न च पक्षधर्मताज्ञानेन तत्संस्कारोद्बोधे
सति यत्रानुमितिस्तत्र व्यभिचार इति वाच्यं। व्याप्तिस्मरणस्थले तस्यानुमितिहेतुत्वेन क्लृप्ततया ऽन्यत्रापि त
त्कल्पनाहेतुत्वात् न चैवमपि संशयविपर्ययोत्तरं पक्षे व्याप्तिः विरोधिदर्शने त्वेन तत्र हेतुतया
उक्तरूपेण व्याप्तिज्ञानस्याजनकत्वान्नातिव्याप्तिरिति भावः। न च परामृश्यमानलिंगं करणमिति जरन्नैया
यिकः मनः करणमिति सन्नैतान्प्रत्याह। अनुमितिकरणं चेति। अयं भावः। न तावदनुमितौ लिंगं करणमि
ति जरन्नैयायिकः मनः करणमिति सन्नैतान्प्रत्याह। अनुमितिकरणं चेति। अयं भावः। न तावदनुमितौ
लिंगं करणं अतीतलिंगकानुमितौ व्यभिचारात् न च त्वभिमतपरामर्शस्य व्यापारत्वासंभवेन तस्य तत्राका
रणत्वात् अतीतानागतलिंगकानुमितौ व्यभिचाराच्च नाप्यनुमितौ मनः करणं प्रमाणाभावात् अनुमितौ कर
णतयानुपपत्त्या मनः कारणं कल्प्यत इति चेन्न व्याप्तिज्ञानस्य सत्त्वात् किं चानुमितेः मनः करणत्वे मानसत्वा
पत्तिः करणं तत्सहकृतमनोजन्यत्वस्य मानसत्वप्रयोजकत्वात्। न चानुमितेर्मनस्त्वेन मनोजन्यत्व

रा०म०
५८

116

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽइन्द्रियत्वेन तज्जन्यत्वाभावात् न मानसत्वमिति युक्तं करणान्तरासहकृततज्जन्यतया तस्याप्यायान्मनस इ-
न्द्रियत्वस्य निराकृतत्वाच्च व्याप्तिज्ञानमिति। ननु व्याप्तिज्ञानमपि न करणं स्मृत्यनुव्यवसायादिष्वपि हेतु-
त्वेनासाधारणत्वाभावादिति चेन्न व्याप्तिज्ञानत्वेन रूपेणान्यत्राहेतुत्वात्। नन्वेवमपि व्याप्तिज्ञानं नक-
रणं व्यापाराभावात् न च तृतीयलिङ्गपरामर्शो व्यापारः तत्कारणत्वस्य त्वयानभ्युपगमात् इत्यत आह।
संस्कार इति। व्याप्तिसंस्कार इत्यर्थः। तृतीयलिङ्गपरामर्शोऽनुमितौ करणं तत्संस्कारोऽवान्तरव्यापारः इति न्यायै-
कदेशिनः कल्पयन्ति तान्प्रत्याह। नत्विति। अयमाशयः यत्प्रकारकं व्याप्तिज्ञानं तत्प्रकारकत्वेनैव पक्ष-
धर्मताज्ञानस्यानुमितिहेतुत्वे अस्य च रूपत्वेपि व्याप्यत्वप्रकारकापेक्षया सामान्यधर्मेणावच्छेदकत्वा-
विशेषात् किंच पक्षधर्मताज्ञाने उक्तरूपेणैवानुमितिहेतुः सर्वत्राव्यभिचारात् ननु त्वदुक्तरूपेणास्य वह्नि-
न धूमादित्वे व्यभिचारात् न च तत्र तृतीयलिङ्गपरामर्शः संभवति विशेषसन्निकर्षाभावात्। तत्रानुमित्या-
त्मकपरामर्शोऽनुमितिरित्यभ्युपगच्छताऽ नवस्थापातात् धूमत्वेन व्याप्तिज्ञप्त्या ज्ञानेपि च वह्नि न ध्व-
मस्मरणेऽनुमितिदर्शनाच्च ज्ञानं च मनसा तस्य परामर्शत्वस्यासहायस्य बहिरर्थत्वाते ज्ञानं च ज्ञाने च-
व्याप्तिः निराकृतत्वात्तस्मात् व्याप्यत्वप्रकारकत्वेन पक्षधर्मताज्ञानमनुमितिहेतुरिति। यत्तु पक्षध-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
५९

मेनाज्ञानकरणं तत्संस्कारोऽवान्तरव्यापार इति चेन्न तन्नेतुदुष्टव्याप्तिसंस्कारस्य पर्वतादौ पक्षधर्मतादिदर्श
नानन्तरं अनुमितेः पक्षधर्मतासंस्कारानन्तरं अनुमितेः पक्षधर्मतासंस्कारस्यानुमितिहेतुत्वात्
ननु स्मृतिप्रागभावजन्यत्वं न स्मृतित्वप्रयोजकं तत्राचरमसाक्षात्कारस्यापि हि इत्यत आह। एवं चे
ति। व्याप्त्यनुभवतत्संस्कारयोर्व्यापारव्यापारिभावे सिद्धे सतीत्यर्थः। तथा चायमर्थः। किं व्याप्तिस्मृतेरवा
न्तरव्यापारत्वसभिमतं करणमिति वा। नाद्यः संस्कारोद्बोधानन्तरं एवं च त्वानुमितित्वव्यभिचारस्योक्तत्वा
न्न च तत्रापि व्यापारतया तत्कल्पनं संस्कारस्य सत्त्वेन तृतीयलिंगपरामर्शस्य व्याप्तिस्मृतेरपि व्यापार
त्वायोगात्। अत एव न द्वितीयः। निर्व्यापारत्वात्। न च तृतीयलिंगपरामर्शो व्यापारः तत्करणस्य निरा
कृतत्वात् न चानुमितौ करणान्तरानुपपत्त्या व्याप्तिस्मृतिः करणं लिंगपरामर्शश्च तद्व्यापार इति कल्प्यतां
इति वाच्यं। व्याप्त्यनुभवस्य संस्कारव्यापकस्य करणान्तरस्य सत्त्वादिति। नन्वेवमपि व्याप्तिज्ञानजन्यत्वं ना
नुमितिलक्षणं संनिकृष्टपक्षकानुमितेस्तव मते संनिकृष्टविषयांशेऽनुमितित्वाभावेन तदंशेऽतिव्या
प्तिरित्यत आह। नेष्वेति। नन्वनुमितेः संनिकृष्टविषयांशे व्याप्तिज्ञानजन्यत्वाभावाच्चानुमितित्वं तत्र
भावात्वं न तज्जन्यत्वमिति समो माध्यमः स्यादित्याशंक्य पर्वतं पश्यामि वह्निमनुमिनोमि इत्यनुभववलादेव तत्रा

राम०
५९

18

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नस्याशभेदे न परोक्षत्वापरोक्षत्वयोः साबाधितत्वादिसाहानर्हं शङ्ग्नि। ननु का व्याप्तिः यद्विषयज्ञानमनुमि
तिहेतुः स्याद्यता वन्नौपाधिकत्वं तद्धि यत्किंचित्साध्याव्यापकं यत्किंचित्साधनाव्यापकमन्यत्वं तस्य सद्धे
तुत्वाभावात्। न च यत्केनेति साध्यसाधनयोर्विशेषणं तस्यासिद्धासिद्धिभ्यां निषद्धुमशक्यत्वात् नापि कार्यकार
णभावो व्याप्तिः हेतुघटयोरपि तत्वसंगात्। पृथिवीत्वस्य द्रव्यत्वव्याप्यभावापत्तेश्च ननु तस्य दुर्निरूपा व्याप्ति
रित्यत आह व्याप्तिश्चेति। यावत्साधनाश्रयाश्रितेयत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्या
प्तिरित्यर्थः। न च साध्यतावच्छेदकस्य वह्नित्वादेः साधनाश्रयमहानसाद्यनाश्रितत्वादिदमपि लक्षणं
न युक्तमिति वाच्यं स्वाश्रयघटितपरंपरासंबंधेन तस्य तद्वृत्तित्वात्। नन्वस्तु निरुक्ता व्याप्तिः तथापि न तज्ज्ञा
नसंभवः तद्ग्राहकाभावात्। न तावत्तर्कस्तद्ग्राहकः तस्य व्याप्तिमूलकत्वेन चापि तर्कापेक्षायामनवस्थानात्
व्याप्तिमूलत्वे च तस्य शिथिलमूलत्वेन तर्काभासतया व्याप्तिग्राहकत्वायोगात् नापि सहचारज्ञानं व्याप्तिग्राह
कं तद्धि न सकृद्दर्शनेन सत्यपि तस्मिन् व्यभिचारज्ञाने व्यासस्यहानात् न च भूयः सहचारज्ञानं तयोः सहचारज्ञानेऽबा
हुल्येपि पार्थिवत्वादौ लोहलेख्यत्वा[illegible]द्वि व्याससयहानात् न च भूयः सहोचारज्ञानं तयोः सहचारज्ञानबाहुल्येपि
पार्थिवत्वादौ लोहलेख्यत्वादिव्याससयहानात् न तद्ग्राहकाभावात् दुर्ज्ञेया व्याप्तिरिति शंकामाह स्यादेतदिति। व्यभिरा

119

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

= स्येति॥ न चास्य सहचारज्ञानत्वेन ज्ञाना

टी० ज्ञानद्रूपलक्षणं व्याप्यत्वादिविरहज्ञानाभावादित्यपि दुष्टत्वं न चैवं व्यभिचारिणो व्यभिचारे भावदशायां सहचारज्ञानाद्व्या
६० प्तिग्रहः स्यादिति वाच्यं। इष्टत्वात् सहचारदर्शनज्ञानत्वे कारणत्वे प्रमाणाभावः अगृहीतसहचारस्य व्याप्तिज्ञानायूह
भावादन्वयव्यतिरेकाभ्यां तस्य हेतुत्वावधारणात् न [redacted] चेतो विशेषणज्ञानत्वेन हेतुः स्यादिति वा व ता ३
च्यं सहचारविषयकप्रत्यक्षत्वेन रूपेण भावात् सिद्धान्ते विशेषणज्ञानस्य कारणत्वाभावाच्च। अनुमानं त्रिविधं केवलान्व
यि केवलव्यतिरेकि अन्वयव्यतिरेकि भेदादिति नैयायिकादयः तन्निराकरोति। न चेति। अनुमानविषयीभूतं
लिंगमित्यर्थः। सर्वस्येति। सर्वस्य प्रपंचस्य नेह नानास्ति किंचनेत्यादिना ब्रह्मणि निषेधावगमादिति भावः। असिद्धे
ति। अप्रसिद्धेरित्यर्थः। अत्र क्रमः स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वं साध्यस्य केवलान्वयित्वं त
त्साध्यकत्वं केवलान्वयिलिंगलक्षणं प्रमेयत्वादेश्च स्वसमानाधिकरणपारमार्थिकत्वावच्छिन्नप्रतियोगिताभा
वपरत्वात्। न तूक्तं अष्टमविवरणे विवरणाचार्यैः। आगमेन चैतस्य तन्निराशबाधादिति न च लक्षणे स्व
वृत्तिविरोधीति व्यर्थं तस्याव्याप्यवृत्तिकपिसंयोगात्यन्ताभावादिसंग्रहार्थत्वात्। न च ब्रह्मणः स्वप्रकाशत्वेन तत्र
स्वरूपेणापि प्रमेयत्वस्याभावात् कथं केवलान्वयित्वमिति वाच्यं। ब्रह्मणोऽपि वृत्तिलक्षणप्रमाविषयत्वात्। न चैवं
वत्तावस्वप्रकाशत्वविरोधः अनुपहितस्यैव तथात्वात्। तथा चाहुर्वार्तिकवाचस्पतिमिश्राः सर्वोपाधिविहीनं रा म०

120

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि स्वयंज्योतिरितीर्यते। न तत्प्रहितमपीति। अत एवाहुः नन्वावश्यमेकं तेन नाविषयीकृतं न चैवमपि नाभिधेयत्वं के-
वलान्वयि ब्रह्मणो नाभिधेयत्वादिति वाच्यं। ब्रह्मणो लक्ष्यतया वाच्यत्वाभावेपि पदजन्यज्ञानविषयत्वात्। वा-
च्यत्वस्यापि ग्रंथकृता वक्ष्यमाणत्वाच्च न चैवं प्रमेयत्वादिविरोधिवृत्तेरप्रसिद्धत्वात्तल्लक्षणाव्याप्तिः स्ववृत्ति-
विरोधिवृत्तितदसंताभावप्रतियोगिनो घटादयः प्रसिद्धाः तदन्यत्वस्य प्रमेयत्वादावपि सत्वात् न चायमभिधेय-
वानन्यत्वादित्यत्र केवलान्वयिलिंगकलक्षणस्याव्याप्तिरिति वाच्यं तादृशासंताभावप्रतियोगितानवच्छेदक-
साध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्येह विवक्षितत्वात्। न साधुकं द्व्यत्वादेः केवलान्वयित्वमिति संक्षेपः
। व्यतिरेकिरूपत्वमिति व्यतिरेकिव्याप्तिधीजन्यानुमितिकरणत्वं व्यतिरेकित्वमित्यर्थः। अत्रानुपयोगादिति। अन्वय-
न्य नव्याप्तिज्ञानस्यापूर्वेलिंगकानुमितिहेतुत्वे हेतुजनकत्वात्तत्त्वव्याप्तिज्ञानेन धूमादेरपि साध्यसिद्धेरिति भावः न-
नु व्यतिरेकव्याप्तिज्ञानमप्यनुमितिकरणं धूमादावन्वयव्याप्तिदशायां व्यतिरेकिव्याप्तिज्ञाने पक्षधर्मताज्ञाने च स-
ति व्याप्तिस्मरणे पर्वतो वह्निमानित्यनुभवसिद्धत्वात् न चातिप्रसंगः स्वगतव्याप्तिज्ञानवत्स्वभावनिरूपितसाध्या-
भावनिष्ठव्याप्तिज्ञानस्यापि फलबलेनानुमितिहेतुत्वकल्पनादित्याशयेनाक्षिपति। कथं तर्हीति। सत्यं व्य-
तिरेकिव्याप्तिज्ञानाद्वह्निज्ञानमिति। तथापि न सोनुमितिः नु जनककारणत्वाभावात् किंत्वर्थापत्तिप्रमाणजन्यत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वर्थापत्तिरिति साहा। अर्थापत्तीति। वयं तु ब्रूमः धूमादावन्वयव्याप्तिमविदुषोपि ततो वह्निज्ञानमिति सविवादं तत्

टी० स्वानुमितिरेव वह्निमनुमिनोमीत्यनुव्यवसायात् न च कूटकारणस्य व्याप्तिज्ञानस्याभावात् कथमनुमितिरि

६१ त्युक्तमिति वाच्यं व्यतिरेकिव्याप्तिज्ञानस्य सत्त्वात् नन्व त्वव्यतिरेकिव्याप्तिज्ञानं न तथापि नानुमितिः

तस्यानुमितिहेतुत्वात्। न तथा हि तस्य न व्याप्तिज्ञानत्वेन हेतुत्वं मतिप्रसंगात् नापि साध्याभावनिरूपितत्वसाध्या

भावनिष्ठव्याप्तिज्ञानत्वेनान्वयव्याप्तिज्ञानस्यानुमितिहेतुतापत्तेः नापि स्वव्याप्तिज्ञानत्वेन स्वव्यतिरेकि

व्याप्तिज्ञाने तदभावात् न चानन्तरत्वेकारणतावच्छेदकं तथा च सत्येकप्रमाणपरिशेषापत्तेः न च तृ

णारणिमणिन्यायेनानुमितिविशेषे तत्कारणमिति वाच्यं। व्यतिरेकिसाध्यज्ञाने अनुमितित्वस्यैवासिद्धेः कॢ

प्तत्कारणस्य व्याप्तिज्ञानस्याभावादिति चेन्न स्वव्यभिचारधीविरोधीधीविषयव्याप्तिज्ञानत्वेन व्याप्तिज्ञा

सा० ४ नस्यानुमितिहेतुत्वात् अस्य च व्यतिरेकिव्याप्तिज्ञानसाधारणत्वात् न हि ध्वंसाभावो यावद्भावाधिकर

णवृत्तिरिति ज्ञाने धूमो वह्न्यभाववन्न समानाधिकरण इति ज्ञानं संभवति न चातिप्रसंगः [illegible]मो वह्निव्या ४८

प्यइति ज्ञानस्य वृत्तिकत्वव्यभिचारज्ञानाविरोधित्वेनानिसेत्वादनुमितिहेतुत्वाभावात्। ने न्वनुमानस्य

व्यतिरेकितयापि प्रामाण्याभ्युपगमेनैवार्थापत्तेरन्तर्भावापत्तौ पृथक् प्रमाणमिति चेत्तर्ह्यनुमानस्य प्रामा राम०

६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोपसंशयाद्युत्तरप्रत्यक्षस्थले चक्षुरादेः प्रामाण्यं न स्यात् तत्रानुमितिसामग्रीसत्त्वेनानुमितेरेवोत्पत्तेः तथा
शाब्दज्ञानस्थलेपि शब्देन प्रमाणं स्यात् एते पदार्था तात्पर्यविषयमिथःसंसर्गवन्तः आकांक्षादिमत्पदकदं
वत्त्वादित्यनुमानेनैव कृत्नप्रमाणाभावेन तात्पर्यविषयसंसर्गप्रतीतिसंभवात्। यदि च प्रत्यक्षस्थले साक्षा
त्करोमि शब्दादमुमर्थं प्रत्येमीत्यनुभवबलात् प्रत्यक्षशाब्दयोः पृथक् प्रामाण्यं तथा व्यतिरेकिव्याप्तिज्ञा
नादिघटितानुमितिसामग्र्यां सत्यामपि वह्निज्ञानानन्तरं धूमेन वह्निं कल्पयामीति यदाऽनुव्यवसायस्तदा
धूमस्यार्थापत्तिविधया प्रामाण्यमिति तुल्यं। यद्यपि निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इति व्य
तिरेकिण्यन्वयव्याप्तिज्ञानमेवानुमितिहेतुः न चान्वयसहचारज्ञानादन्वयव्याप्तिग्रहेप्यतिप्रसंगः स्वाधिक
रणनिश्चयव्यभिचारज्ञानविरोधिसहचारज्ञानत्वेन तस्य व्याप्तिज्ञानहेतुत्वाभ्युपगमात् नैवं सत्यन्वयव्यति
रेकिणोर्भेदो न स्यादिति वाच्यं व्यतिरेकसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीर्यत्रानुमितिहेतुः स व्यति
रेकी यत्रान्वयसहचारमात्रज्ञानजन्यानुमितिहेतुः सोन्वयी। यत्रोभयसहचारमात्रज्ञानजन्यः सोन्व
यव्यतिरेकीति विभागोपपत्तेः। अस्मिंश्च पक्षे यदाऽन्वयसहचारेणान्वयव्याप्तिस्फुरणं तदा धूमस्यान्वयितया
गमकत्वं यदाऽन्वयव्यतिरेकसहचारेण तदान्वयव्यतिरेकितया यदा तु व्यतिरेकसहचारेण व्यतिरेकव्याप्तेरव

123

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
६२

ज्ञानं तदाऽर्थापत्तिविषयाध्यक्षस्य प्रामाण्यं न च व्यतिरेकानुमानस्य पृथक्प्रमाणत्वेऽपसिद्धान्तः मूलस्यैवं येनुप
त्तिरूपमिथ्यालापो तत्र तत्र व्यतिरेकानुमानस्यापि प्रमाणत्वेनोपमानात्तस्मात्त्रिविधमेवानुमानमिति युक्त
मिति ग्रन्थः। शाब्दार्थमाह। व्यतिरेकीति। अवयवसमुदाय इति। नन्वेवं न्यायजन्यवाक्यार्थज्ञानजनकवाक्य
मवयवः तत्समुदायश्च न्यायः स च माध्यमिकसाध्येति चेन्न अनुमितिचरमकारणपक्षधर्मताज्ञानप्र
योजकशाब्दज्ञानजनकवाक्यत्वस्यैवावयवलक्षणत्वादिति भावः। तदीयवयवत्वेनीय पक्षे प्रतिज्ञोदा
हरणनिगमनरूपाः हेतूदाहरणप्रतिज्ञारूपाश्च किमवयवाः किं तत्समुदायोऽपि न्याय इतीत्यत आह। प्र
तिज्ञेति। उक्तरूपाणामुक्तक्रमाणामेव कथकसंप्रदायसिद्धत्वात् नान्येभिन्नक्रमाश्च न तेऽप्यवयवा इति
भावः। उदाहरणेति। अत्रेदं प्रतिभाति न्यायक्रमवयवत्रयस्योदाहरणादित्वं विप्रतिपन्नं न तरं शब्दानि
त्यत्वे प्रमाणं कृदन्तित्तदस्य स्ववादिनो वाद्याकांक्षायां प्रथमं साध्यनिर्देशस्यैव कर्तुमुचितत्वात्
अयोपनय एव प्रथमं किं न स्यात् अनुमित्युपयोगिज्ञानजनकत्वेनाविशेषात् यदि च पक्षधर्मतायाः प्रथ
ममनाकांक्षितत्वेन हेतुनेत्तदभिधानेऽप्राप्तकालत्वापत्तेर्न तदर्शकोपनयस्य प्राथम्यं तदा व्याप्तेरपि साध्य
निर्देशात् प्रागनाकांक्षितत्वान्नोदाहरणस्यापि प्राथम्यमिति तुल्यं। एतेनोदाहरणोपनयात्मकमवयवद्वयमेव युक्तं अत्र

६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिसोपयिकव्याप्तिपक्षधर्मताज्ञानयोरवयवद्वयेनैव सिद्धेरिति सौगतमतमपास्तं। उद्यमं साध्यनिर्देशाभावेव्या
प्त्यभिधानस्यानाकांक्षत्वादिति। अक्षपादीयानां मतं निरस्यति। ननु पंचावयवा इति। अत्र च पक्षताव
च्छेदकसाध्यसामानाधिकरण्यपरत्वे सति न्यायावयवत्वमुदाहरणप्रयोजकत्वं साऽजनकशाब्दज्ञानजनक
वाक्यत्वं व्याप्तिपरन्यायावयवत्वं। पक्षधर्मतोपदर्शकत्वे सति हेतुभिन्नन्यायावयवत्वं उपनयत्वं वाकांक्षी
जन्यसाध्याकांक्षानिवर्तकप्रतिज्ञाहेतूदाहरणोपनयनिगमनानां क्रमेण लक्षणं बोध्यं किमुपन
यस्य व्याप्तेः प्रदर्शनप्रयोजकं उत पक्षधर्मताया आहोस्वित् व्याप्तिविशिष्टपक्षधर्मताज्ञानेनासः लिंग
परामर्शकारणत्वस्य निराकृतत्वेन व्याप्तिविशिष्टपक्षधर्मतापादनस्य व्यर्थत्वात् आद्यद्वितीययोरुभय
त्रि अवयवत्रयेणेति। यद्युदाहरणहेतुभ्यामेव व्याप्तिपक्षधर्मतयोः प्रदर्शनं तथापि प्रतिज्ञाया
अप्याकांक्षाहारणायाः स्वपदर्शनतया तदभिप्रायेणोक्तं। नन्वेवमपि अबाधितत्वात् सत्प्रतिपक्षित
त्वयोः प्रतिज्ञयाऽनुपदर्शितत्वात् तत्प्रदर्शनाय निगमनमिति चेन्न तादृशनिगमनमनुमितिप्रतिबंध
कबाधसत्प्रतिपक्षज्ञानविघटनेनाप्यनुमित्युपयोगिज्ञानस्यैवावयवप्रयोजकत्वात्। अन्यथा तत्तत्प्रतिबंधककामिनी
जिज्ञासादिनिरासायावयवान्तराभ्युपगमापत्तेः। नापि तदुपयोगिज्ञानाय बाधाभावजन्यस्यानुमितिकारणत्वे

125

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
६३

मानाभावात्बाधज्ञानप्रतिबंधकत्वस्यतदभावकारणत्वेनैवोपपत्तेः॥ किंचनिगमनमनुमितिउपयोगिज्ञानजन
कं साध्याभावप्रमाबाध इतिपक्षेतदभावस्यपदवाक्यार्थभिन्नतयानिगमनाप्रतिपाद्यत्वात्। साध्याभावोबाधइ
तिपक्षेचतदभावस्यसाध्यरूपतयाततज्ञानस्यसाध्यनिश्चयपर्यवसन्नत्वेनानुमितिसहेतुत्वात्। अन्यम
था॰ नुमितिर्विषयस्यात्। किंचनिगमनस्यसाध्यनिर्देशकतयासाध्यलक्षणबाधाभावज्ञापकत्वे
प्रतिज्ञाया अपिसाध्यप्रतिपादकत्वेननिगमनवैयर्थ्यात्। सिद्धत्वेनसाध्यप्रतिपादकत्वाभावात् नै
तयाबाधविरह॰ ननुमितेस्तन्निगमनेपितुल्यंलक्षणयासिद्धवह्निबोधकत्वेप्रतिज्ञायामपिसमानं किं
चानिगमनस्यसिद्धत्वेनरूपेणय॰ ह्निबोधकत्वेतस्मादित्यनिहेत्वन्वयानुपपत्तिः हेत्वन्वयानेतरं साध्ये
सिद्धत्वान्वयबोधकत्वेवह्निमत्सदस्माद्वसापत्तिः नचेष्टापत्तिः तस्मादित्यंशाभावेनतस्यवाक्यांतरत
२ या॰ वयवांतरत्वापत्तेः तस्मात्राबाधितत्वज्ञानेनिगमनप्रयोजनं अत एवनासत्प्रतिपक्षबोधन
मपितत्प्रयोजनंनेनत्यासंतनमपदार्थत्वादितिदिक्। एवंसत्पंचमनुमानप्रामाण्यंपनिरूपितं सत्प्रतिनिरू
पणस्यप्रयोजनमाह। एवमिति। मिथ्यात्वसिद्धेरितिशास्त्रीयविषयप्रयोजनसिद्धेहेतुत्वात्प्रपंचमि
थ्यात्वसिद्धिरनुमाननिरूपणस्यप्रयोजनमितिभावः नतुप्रपंचोमिथ्याहरणत्वात् शुक्तिरूप्यवदित्य

राम०
६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुमानान्नमिथ्यात्वसिद्धिः तन्नहि न तावत्प्रपंच इति पक्षनिर्देशः प्रपंचशब्देन ब्रह्मणोऽप्यभिधानेन तस्या
पि पक्षत्वापत्तेर्बाधापत्तेः न च सर्वविकार इति निर्देशः परमते वियदादेः सिद्धान्ते चाविद्यासंबंधादेरवि
कारतया पक्षबहिर्भावापत्तेः शुक्तिरूप्यत्वादेरपि पक्षत्वेनांशतः सिद्धसाधनाच्च किंच मिथ्यात्वेन तावत्त्व
संसत्त्वसमानाधिकरणनिवर्त्यत्वं नाभावप्रतियोगित्वं तथात्वस्य संयोगादौ सर्वैरभ्युपगमान्न चाविद्याकार्य र
त्वं तच्चाविद्याद्यव्याप्तेः नापि ज्ञाननिवर्त्यत्वं सत्यस्यापि प्रपंचस्य परैरपीश्वरज्ञाननिवर्त्यत्वांगीकारात्।
अनिर्वचनीयत्वमिति चेत्तद्विकल्पासहत्वात्। तथाहि न तावत्सद्विलक्षणत्वमनिर्वचनीयत्वं तच्चेतेऽपि
शशविषाणादेरपि मिथ्यात्वान्नाप्यसद्विलक्षणत्वं ब्रह्मण्यतिव्याप्तेः अन्यस्य सत्त्वाविरोधाच्च। न च सद
सद्भिन्नत्वं सद्रूपप्रतियोग्यप्रसिद्धेः वस्तुनः सदसदन्यतरनियमेन उभयभिन्नत्वासंभवाच्च अत एव न सत्त्वा
नधिकरणत्वे सत्यसत्त्वानधिकरणत्वमनिर्वचनीयत्वं निर्धर्मके ब्रह्मण्यतिव्याप्तेः किंच दृश्यत्वं नाम न
तावज्ज्ञानलक्षणफलव्याप्यत्वं अतीन्द्रियेषु तदभावेन भागासिद्धेः नापि वृत्तिविषयत्वं स्वप्रकाशस्यापि ब्र
ह्मणो वृत्तिविषयत्वाभ्युपगमेन व्यभिचारात् एतेन कार्यत्वविभक्तत्वादयो हेतवो निरस्ताः तस्मान्नानुमा
नात्प्रपंचमिथ्यात्वसिद्धिरित्याशंक्याह। तथाहीति। ब्रह्मभिन्नमिति। अत्र च ब्रह्मणः पक्षत्ववारणाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्व

टी० ६४ कं ब्रह्मभिन्नमिति। सिद्धसाधनवारणाय सर्वपदं तेन यावच्छुक्तिरूप्यादौ ब्रह्मभिन्नत्वेन साध्यसिद्धावपि सर्वस्यापि ब्रह्म-
भिन्नत्वेन तदसिद्धेर्न सिद्धसाधनं अत एव घटादौ पृथिवीत्वेनेतरभेदनिश्चयेपि सर्वस्यापि ब्रह्मभिन्नत्वेन पृ-
थिवीत्वेन तदसिद्धेः न सिद्धसाधनमिति राद्धांतः। न चैवमंशतः सिद्धसाधनं दुर्वारमिति वाच्यं। क्वचित्स्थ-
ले शुक्तिरूप्यादौ मिथ्यात्वनिश्चयेपि पक्षतावच्छेदकनानात्वाभावात् पक्षतावच्छेदकनानात्व एव तद-
भ्युपगमात्। अत एव निरंशेवाच्ये नसीरस्य चांशतः सिद्धसाधनमिति परस्यापि राद्धांतः अतः शुक्तिरूप्यमिति नूने
च शुक्तिरूप्यस्यापि पक्षत्वेन कथं दृष्टांतता इति सांप्रतं निरस्तं प्रत्येकत्वेन तत्वनिपक्षत्वाविरोधात्तस्य
बलाघवत्वेन दृष्टांतत्वप्रयोजकतया पक्षभिन्नत्वस्य व्यर्थत्वात् अत एवाभेदानुमाने पक्ष एव दृष्टांतः
ननु शुक्तिरूप्यं न दृष्टांतः प्रमाणाभावेन तस्य मिथ्यात्वस्यानिश्चयात् न च तत्रानुमानात्तन्निश्चयः दृष्टांतेप्य-
नुमानात् तन्मिथ्यात्वनिश्चये तस्यानवस्थापादनात् न चात्र शुक्तिरूप्यादन्यदृष्टांतः संभवति तन्नष्टव्याप्ति-
ग्रहाभावात्कथं प्रपंचमिथ्यात्वसिद्धिः इत्याशंक्य शुक्तिरूप्यस्य नाहं रजतमिति त्रैकालिकाभानप्रतीतिविषयत्वप्र- ति
तिपादकतामयाप्रत्यक्षप्रमाणेन मिथ्यात्वस्य प्रत्यक्षपरिच्छेद्यसाधितत्वात्तदेव दृष्टांत इत्याह। न चेति। साधि-
तत्वादिति॥ इदं चोपलक्षणं शुक्तिरूप्यमिथ्यात्वस्यार्थापत्तिप्रमाणेनापि साधयिष्यमाणत्वात्तेनापि बोध्य रा म० ६४

\128

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्धेः। ननु शुक्तिरूप्ये साध्यनिश्चयानुकूलतर्काभावेन व्याप्यत्वासिद्धो हेतुः न च हेतोर्निरूपाधिकत्वमंगाख्य
एव तर्को व्याप्तिग्राहक इति वाच्यं अविद्यातिरिक्तदोषजन्यत्वस्योपाधित्वात्। तद्व्यावृत्तस्य ब्रह्मणो विप
क्षस्य सत्वाच्च पक्षेतरत्वमित्याशंक्य ब्रह्मभिन्नत्वस्य सामानधर्मस्याविद्यातिरिक्तदोषजन्यत्वापेक्षया ल
घुशरीरस्य लाघवाख्यतर्केण मिथ्यात्वघटितव्याप्यत्वनिश्चयात्तस्योपाधिकत्वमत एव न व्याप्यत्वासिद्धि
रित्याह न चेति। ननु बाध्यत्वं मिथ्यात्वं तत्त्वज्ञानत्वेन ज्ञान[illegible]वर्त्स्यत्वं तत्तु विनानुमानेन शुक्तिरूप्यत्वातं
शकं बाधप्रत्यक्षेणाविषयीकरणात्तत्र दृष्टान्तासिद्धिस्तदवस्थैवेत्याशंक्य मायसिद्धबाधचसक्षयो
ग्यमिथ्यात्वमिह विवक्षितमित्याह। मिथ्यात्वं चेति। न चानाश्रिताकाशादिषु लक्षणस्याव्याप्तिः विपद
धिकरणे लभ्यायेन तस्यापि कार्पितयाकारणाश्रितत्वस्यावश्यमभ्युपगन्तव्यत्वात्। अत्र संभववारणाये
ति। न च स्वाश्रये स्वरूपेण तदसंताभावाभावेपि पारमार्थिकत्वावच्छिन्नतदसंताभावसत्वान्न बाधस
त्वादिसभिमतपदं व्यर्थमिति वाच्यं। अस्मिन्पक्षे स्वरूपेणैव बलक्षणेन पंचाभावाभ्युपगमात्त्रिन्त्वाचा
र्यसंमतिमाह तदुक्तमिति। यदि कश्चित्सक्षभिन्नत्वमपि सपक्षत्वे प्रयोजकं अभेदानुमाने चासिद्धमि
तिनिश्चयात्तदा पक्षान्तरमाह यद्वेति। परत्वादिति अवयवित्वादिसपि द्युक्तं मिथ्यात्वे प्रमाणमेतत्सर्वमिथ्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ९५

त्वे प्रमाणमिति स्वर्थः। गुणाकर्मविदो चैतन्यस्य तद्रूपमेतत्सदनिष्ठात्यंताभावप्रतियोगिरूपत्वाद्रूपांतरस्यादित्येवमादिप्र
योगो दृष्टव्यः। अत्रापि तत्त्वंसमतिमाह तदुक्तमिति। दिङ्मात्रं गः। निर्गुणस्येति साक्षी चेता केवलो निर्गुणश्चे
ति इत्यादिवचनेन ब्रह्मणो निर्गुणत्वावगमादिति भावः। नापीति ब्रह्मणो अपरिणामित्वादिति भावः। ननु ब्र
ह्मणोपि समवायिकारणत्वं केवलस्यापरिणामित्वेपि मायाविशिष्टस्य प्रपंचोपादानत्वात् अन्यथा अभिन्न
निमित्तोपादानवादभंगापत्तेः तत्र अब्रह्मणो न द्रव्यत्वासिद्धिरिति परितोषादाह अस्तु वेति। यद्वा अभ्युपेत्या
ह। अस्तु वेति। कालइंद्रियेषु घटादिमतेन दृष्टांतमाह कालस्येति। वस्तुतस्तु अन्यथासिद्धिप्रतीतिबले
न ब्रह्मव्यतिरिक्तद्रव्यचाक्षुषतायामेव महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकं बोध्यं न तूक्तानुमानेन प्रपंचमि
थ्यात्वसाधकं घटः सन्निति प्रत्यक्षप्रत्ययबाधितत्वाच्च असावविद्यानसत्त्वविषयत्वाद्भ्रमः बाधकाभा
वात्। न चाङ्गुल्यादिवाक्येन प्रत्यक्षबाधः तर्हि तेनैव प्रपंचमिथ्यात्वसिद्धौ अनुमानवैयर्थ्यात् प्रपंच
तत्वांशबाधपरत्वेनैव वक्ष्यमाणत्वात् अनुमानेनैव तद्बाधकं प्रत्यक्षस्य सर्वप्रमाणज्येष्ठतया अ नु
मानेन बाधायोगात् अन्यथा वह्नेरनुष्णत्वानुमानेन तद्दोषप्रत्यक्षबाधापत्तेः। किंच प्रपंचस्यस्वरूपेण सत्वेत
तज्ज्ञानस्याबाधितार्थविषयत्वेनाप्रामाण्यापत्तेः घटादिज्ञाने प्रमा शुक्तिरूप्यादिज्ञानम प्रमेति विभागाभावो
सत्ख्यातिवादिमतप्रवेशश्च प्रसज्येत किंचैवं कर्मकांडमात्रस्याप्रामाण्यापत्तेः तत्सामान्यं द्वैतं द्वेष्टि वेदा राम० ९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याप्रामाण्यापत्तेः अपि च घटादेरसत्त्वेन रूपभावेन निरूप्येत तद्धर्मिवाधिकरणप्रतियोगिमात्राभावनिरूपणा
त्। अन्यथा शशविषाणस्यापि अभावप्रतियोगित्वापत्तेः अत एवाहुः सद्धर्मभावेन निरूप्यत इति तत्र अबाध्य
सत्त्वं बाधितं तत्र पंचमिथ्यात्वानुमाने सत्त्वं च गृह्यते इति। त्रिविधमिति पारमार्थिकसत्त्वं व्यावहारिकसत्त्वं प्रा
तिभासिकसत्त्वं चेति त्रिविधमित्यर्थः तत्र कालत्रयाबाध्यत्वं पारमार्थिकत्वं संसारदशायामबाध्यत्वं व्यावहा
रिकत्वं प्रतिभासकालाबाध्यत्वं प्रातिभासिकसत्त्वं एतानि क्रमेणोदाहरति। पारमार्थिकेति। नन्वेवमप्यु
क्तमिथ्यात्वस्याप्रसिद्धिः सर्वेषामपि स्वाश्रये तदत्यन्ताभावायोगात् न चाभिमतपक्षान्तर्निरसनं उक्तमिति वाच्यं
स्वाश्रयतयाज्ञानस्याप्युक्तरीत्याव्यक्ततः स्वाश्रयत्वेन तत्र तदत्यन्ताभावासंभवात् तद्वत्स्यात् किंच मिथ्यात्व
लक्षणस्य ज्ञानगर्भे तेषु स्वल्पादेः स्वाश्रयत्वाभिमानाभावदशायां घटादेर्मिथ्यात्वाभावप्रसंगः अभिमानो
पलक्षितविवक्षादशायां तत्कालोत्पन्नविनष्टस्य पर्वतगुहावर्तिनो मिथ्यात्वानापत्तेः अपि च निरुक्तमि
थ्यात्वं न सत्त्वविरोधि परमाणुव्याप्यवृत्तिकपिसंयोगादौ तद्भावप्रसंगादित्यत आह। अस्मिन्पक्षे इति। त
था च पारमार्थिकत्वावच्छिन्नप्रतियोगिताकस्वात्यन्ताभावसामानाधिकरण्यं मिथ्यात्वमित्यर्थः एतच्चोपलक्षणं
पारमार्थिकभिन्नत्वं पारमार्थिकत्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं बोध्यं। अनुमाननिरूपणप्रयोजनमुपसंहरति। त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राम

टी०
६६

स्मादिति॥ ॥इति वेदांतपरिभाषायामनुमानपरिच्छेदः॥ ॥शिष्याववोधाय प्रतिजानीते अथेति। अनु
माननिरूपणानंतरमिति। स्वीकटाहन्यायेन शब्दनिरूपणस्यार्केतु मानानिरूपणमिति ध्येयं। ननु स्वीक
टाहन्यायादरे उपमानस्य प्रत्यक्षादपि प्राथम्यादिति चेन्न। प्रत्यक्षानुमानोत्तभावानंतभावयोरुपमाने वि
चारणीययोः प्रत्यक्षादिनिरूपणसापेक्षत्वेन तयोरेव प्रथमनिरूपणीयत्वात्। तच्चेति उपमानेन निरूपणीय
इत्यर्थः। सादृश्येति। अत्रोपमितिकरणत्वं लक्ष्यं तत्करणत्वं चासाधारणत्वमितो हि विवक्षितं न तु व्यापार
वत्त्वघटितमिह विवक्षितं। गवयनिष्ठसादृश्यज्ञानस्य उपमितौ जनयितव्यायां व्यापाराभावात्। ननूपमिति
करणत्वलक्षणे तस्या एव दुर्वचत्वात्। तथाहि न तावत्सादृश्यप्रमात्वमुपमितित्वं प्रमोपमितित्वव्या
प्तेः न चोपमानप्रमालक्षणाय प्रमोपमितेरेव लक्ष्यत्वात् सा न संग्राह्येति वाच्यं। तथापि सामान्यलक्षणा
करणे विशेषलक्षणप्रणयनायोगात् न च सादृश्यज्ञानमुपमितिसामान्यलक्षणमिति युक्तं सादृश्यप्र
त्यक्षे अतिव्याप्तेः न चासन्निकृष्टविषयत्वं विशेषणं तथापि शब्दादिना सादृश्यज्ञाने ऽतिव्याप्तिः न चैवमा
नजन्यसादृश्यज्ञानत्वमात्माश्रयापत्तेः न च सादृश्यज्ञानजन्यज्ञानत्वं सादृश्यलिंगकानुमितौ तत्र तु व्यव
सायादौ चातिव्याप्तेः न च सादृश्यप्रतियोगिस्मरणसहकृतसादृश्यज्ञानसहकृतं सादृश्यज्ञानजन्यत्वमुप

सि० व राम०
६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितित्वं तत्प्रतियोगिस्मरणस्य गोसादृश्यज्ञानोपक्षीणत्वेन फलीभूतसादृश्यज्ञानाहेतुत्वात् तदुभयगोच
रसमूहालंबने ऽतिव्याप्तेश्च अत एव न तदुपमानलक्षणमिति उच्यते। उपमितिकरणत्वमेवोपमा
नलक्षणं। उपमितिश्च सादृश्यज्ञानत्वेन सादृश्यज्ञानजन्मा उपमितेः कारणांतरानुपपत्त्या तत्वत
त्वेन करणत्वकल्पनान्नाऽसंभवः तदनुव्यवसायादिश्च तत्तेन तज्जन्यत्वाभावान्नातिव्याप्तिः नच गोसदृ
शस्तु पूः अनेन विसदृशी भवती यो गोरिति वैधर्म्यज्ञानजन्योपमितावव्याप्तिः तत्रोपमानप्रामाण्यान
भ्युपगमात् नहि कश्चिदनुव्यवस्यति करभेण गामुपमिनोमीति। किंचित्तु सत्त्वनियोगिकपदार्थज्ञानानंतरं
परस्मिन सत्त्वनियोगिकपदार्थज्ञानमुपमितिः एवं चवैधर्म्यपुरस्कारेणाप्युपमिति संग्रहः तत्त्वेन न त
ज्जन्यत्वस्य विवक्षितत्वान्नातिप्रसंग इत्याहुः। न तु गवयनिष्ठगोसादृश्यज्ञानेन चक्षुःसंयोगाद्गोगवयो
रसन्निकर्षात् तदुभयसन्निकर्षे च तत एव सादृश्यप्रतीतावुपमानान्तरत्वानुपपत्तेरिति शंका गवयेन्द्रिय
सन्निकर्षे सति जायमानो गोसादृश्यप्रतीतिः व्यवहितदृष्टे गोपिंडांशे परोक्षा गवयांशे तु परोक्षेसाहा। तथाहीति
गोसदृश इति गोभिन्नत्वे सति तद्गतभूयस्सामान्यवानित्यर्थः। अयं चानदसाधारणधर्मे भूयस्त्वे सति तद्गत
धर्मवत्त्वं सादृश्यं न च हस्तिमशकयोः सादृश्यापत्तिः प्राणित्वादिनेष्टत्वात् अत एव उष्ट्रमात्रसाधर्म्येण

133

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
६९

णामहिषएवायंघटइतिलोकव्यवहारः अन्येतुसादृश्यंपदार्थान्तरं क्लृप्तपदार्थेष्वनन्तर्भावात् तथाहि नजाव
त्सादृश्यंद्रव्यंगुणवृत्तित्वात् अतएवनगुणः कर्मेत्यादौ नचगुणेसादृश्यंनास्त्येवतत्रतद्व्यवहारस्याभ्रमस
दृश्यादेवोपपत्तेः तथाचहेतुरसिद्धइतिवाच्यं गेहद्वयंसदृशमितिप्रतीतेर्बोधकंविनाभ्रमात्वात्तन्नचप
रंपरासंबंधेनभ्रमात्वोपपत्तिः साक्षात्संबंधेबाधकाभावात् आश्रयएवसादृश्यमपित द्गुणयोः सादृश्या
नुभवाच्च। नापिसामान्यंसामान्यवृत्तित्वान्निषेधरूपतयाप्रतीतेश्च नाभावांतर्भावः तस्मात्सादृश्यंपदार्थां
तरमिति तन्न सादृश्यस्यसामान्येंतर्भावात्तद्साधारणधर्मश्च तत्वसतितद्भिन्नधर्मवत्त्वस्यसादृश्योपाधि
रूपत्वेन प्रमेयत्वादिवत्सामान्यवृत्तित्वेपिविरोधाभावात् नचसादृश्यंसप्रतियोगिकंसामान्यंतु निष्प्र
तियोगिकमिति कथमस्यसामान्यरूपत्वंइतरनिरूप्यं हि सप्रतियोगिकंतद्भिन्नधर्मवत्त्वलक्षणं तथा। किंच
सादृश्यंनपदार्थान्तरंतथासतिमुखचन्द्रयोः सामीप्यत्सादृश्यमित्युत्कर्षापकर्षाभावप्रसंगात् सिद्धांते तु सामान्या
स्प त्मरूपत्वाभ्यां तत्तदुपपत्तेस्तदुक्तं तर्कपादे शास्त्रदीपिकायां येनतुसामान्ययोगातिरिक्तमस्येष्यते तत्त्वं सादृ
श्यमन्यं तेनेषामुत्कर्षापकर्षभेदः किंनिबंधनइतिचिंतनीयमिति अनंतरमित्यनेनान्वयोदर्शितः चकोरेण
वकारेणेत्यर्थ नव्यतिरेकः तन्वस्त्वन्वयव्यतिरेकावधारणे ततः किमित्यत आह तत्त्वेति। तत्त्वगावयनिष्ठगोसादृश्यज्ञा

दिनकरी
राम०
६९

134

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्व्यतिरेकाभ्यां गोनिष्ठगवयसादृश्यज्ञानं प्रतिकरणत्वावगमः तयोः कारणतामात्रनिश्चायकत्वात् नच
त कारणं तत्र एनुपपत्तात तस्य करणत्वं कुत्र प्रमाणाभावस्य प्रसक्ष्यादेः सत्वादिति चेत् किं प्रत्यक्षं तत्कार
णमनुमानं वा आद्ये पि किं तत्कारणं चक्षुरादि अंतःकरणं वा आद्यं दूषयति नचेति इंद्रियसन्निक
र्षादिति इंद्रियेण कैमाकं गोपिंडविशेष्यस्य संयोगादेरभावात् ज्ञानप्रसात् तेष्वनिरूपकत्वादित्यर्थः अं
तःकरणं द्वितीयः इंद्रियासन्निकृष्टबाह्यविषयकप्रत्यक्षज्ञाने मनसोऽसामर्थ्यात् साधारणकारणत्वाच्च
न नु प्रत्यक्षेण गवयगो सादृश्ये गत्वप्रमाणेण अपि गवयसादृश्यं प्रमानसंवित्ते वेघ तया गृहीत मेवेति चेत्
। विशेषणविशेष्यभेदेन समानसंविद्वेद्यत्वासिद्धेः अनुमानपक्षे पि किं गोनिष्ठगवयसादृश्येन गवयनिष्ठगो
सादृश्यं लिंगं गवयनिष्ठगोसादृश्यप्रतियोगित्वं वा नाद्यः गवयनिष्ठसादृश्यस्य भेदगर्भतया गोवृत्तित्वाभा
वेन तन्निष्ठसादृश्यानुमापकत्वादित्याह नाप्यनुमानेनेति द्वितीयमाशंक्य निरस्यति नापीति न तत्संभ
वति गवि गवयसादृश्यानुभवसंभवो संभवस्तथाहि । परिहरति एवं विधेति इदमवाक्तं किमत्र प्रमाण
मभ्रिमित्तं विशेषव्याप्तिर्वा नाद्यः यत्र द्रव्यमनुगतत्वं तत्सामान्यवान् तत्र नुमानात् गत्वात् न द्वितीयः योगव
यनिष्ठसादृश्यप्रतियोगी स गवयसदृश इति विशेषव्याप्तेः प्रागज्ञानात् किंच नानुमानात् तत्संभवः गवयनि

135

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
६८

रूपितसादृश्यरूपसाध्यस्याप्रसिद्धेः किंच न हेतुः पक्षधर्मतया ज्ञातुं शक्यः गवयनिष्ठसादृश्यप्रतियोगिक
त्वस्यासन्निकृष्टे गवि प्रत्यक्षेणाज्ञानात् न च विशिष्टघटकपदार्थभेदेन गवि गवयसादृश्यग्रहणात्ता
नेपि गवये गोसादृश्ये गृह्यमाणे समानसंवित्तिवेद्यतया तत्प्रतियोगित्वभानमेवेति वाच्यं तथापि गोः सन्निक
र्षं मदीया गौरेतद्गवयनिष्ठसादृश्यप्रतियोगिनीति गोविशेष्यकपक्षधर्मताज्ञानस्यासिद्धेः न च ज्ञानोपनी
तेन तस्मिन् मानसः परामर्शः इति प्रत्यक्षज्ञानप्रत्यासत्तेर्निराकृतत्वात् न च गवयसादृश्यमुपमितिविषयः क
थं चिन्ताध्येहेतुप्रसिद्धावपि गवि गवयसादृश्यानुभवसमर्थनियमेन वा निज्ञानाभावात् तस्मात्तु मितिसा
मग्रीविरहान्न गवि गवयसादृश्यानुमितिरिति। नन्वनुमानानन्तरं तत्र गवयसादृश्यानुभवो सिद्ध एव ला
घवेन तु प्रमाणाभावस्य व्याप्तिज्ञानस्यैव तच्च करणत्वकल्पनादित्यत आह उपमिनोमीति। नैयायिकास्तु
कीदृशो गवय इति प्रश्नानन्तरं यथा गौस्तथा गवय इत्याप्तवाक्याल्लब्धोपदेशकस्य वनं गतस्य तद्वाक्यार्थं
स्मरतो नागरिकस्य सत्पायं गोसदृश इति प्रत्यक्षे भवति प्रतीतिः असौ गवयशब्दवाच्य इति सैवोपमिति
स्तत्करणं च नातिदेशवाक्यं तस्य शाब्दपिण्डप्रत्यक्षादपि भावात्। नापि प्रत्यक्षे सत्यपि तस्मिन् वाक्याश्रवणेना
ज्ञाताप्रतीत्यनुपपत्तेः। नापि मिलिताभ्यां वाक्यप्रत्यक्षाभ्यां तादृशज्ञानमिति वाच्यं तयोर्भिन्नकालतया मेल

राम०
६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्तिद्धेः प्रत्यक्षसमये तद्ग्रहाभावानुस्मृतिसंभवेऽपि शाब्दत्वापत्तेरक्षत्वयोः सांकर्यापत्त्यात्ताभ्यां विजातीयप्रमाणाभ्यां
तादृशप्रमानुत्पत्तेः न च वा सार्थ्यानुसंधानसहकृतप्रत्यक्षं तत्करणमिति युक्तं प्रत्यक्षानंतरं वाक्यसंसर्गादिना वा
च्यत्वप्रतीत्यभावेऽपि उत्तरकालं सादृश्यविशिष्टपिंडस्मरणे सति समयपरिच्छेददर्शनात् नाप्यनुमानेन ल
रणं न तदनेवनारेष्टकं प्रतीतेरनुभवसिद्धत्वात् तस्मात्सादृश्यज्ञानमेवोपमितिकरणं तदुक्तमुदयनाचार्यैः सं
बंधस्य परिच्छेदः संज्ञायाः संज्ञिना सह। प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुरिति ननु स्वपृथक्प्रमाणं
तदिति साहुः तर्हि स्वीयं कुत्र प्रमाणेनेवृततत्संभवाह तन्नाह किं गवयपदवाच्यताज्ञानं फलं गवयपदं गवयत्वप्र
वृत्तिनिमित्तकमिति ज्ञानं फलं आद्ये यंपिंडो गवयपदवाच्यः गोसदृशत्वादतिदेशवाक्यगतपिंडवदित्य
नुमानेन तत्र वाच्यत्वग्रहसंभवात् अत एव गवयत्वविशिष्टं गवयपदवाच्यमिति ज्ञानमुपमानफलं गवयस्य
दर्शनमनुपस्थितत्वात् तस्य शब्दादिनान्यथासिद्धिरित्यपास्तं गवयत्वविशिष्टो गवयपदवाच्यः गोसदृशत्वा
दतिदेशवाक्यावगतपिंडवदित्यनुमानेनैव तत्संभवात् न द्वितीयः गवयपदं सप्रवृत्तिनिमित्तं पदत्वात् पटवदि
त्यनुमानेन गवयपदं गवयत्वं तदन्यान्यतरप्रवृत्तिनिमित्तकं पदत्वादिति सामान्यतो दृष्टेन लाघवसहकृते
न गवयपदं गवयत्वप्रवृत्तिनिमित्तकं तदप्रवृत्तिनिमित्तकत्वे सति स्वप्रवृत्तिनिमित्तत्वादिति व्यतिरेकिणा वा ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० वयत्वप्रवृत्तिनिमित्तकत्वपरिच्छेदसंभवात्। न चैतादृशानुमानावतारदशायामुपमानप्रवृत्तिरिति वाच्यं उपमाना
६९ नुमानयोरन्यतरकल्पनाप्रसक्तावनुमानस्यैव क्लृप्तप्रमाणभावतया कल्पनौचित्यात् न चास्मन्मते गवयेन लप्य
गामुपमिनोमीत्यनुव्यवसायबलादेव विजातीयज्ञानसिद्धिः तत्तश्चतत्करणमानान्तरं कल्प्यं इति वाच्यं
नुव्यवसायस्यास्मदभिमतसादृश्यबुद्धिविषयत्वात् नहि गवयेन गामुपमिनोमीति लोकव्यवहारः। अन्यथा
समपरिच्छेदस्य तत्राभावेन तथाव्यवहाराभावप्रसंगः तस्मात्संज्ञासंज्ञिसंबंधबुद्धिरुपमानफलं तत्रत्य
पमिनोमीत्यनुव्यवसायबलात् सादृश्यबुद्धिरेवोपमितिः तत्करणं च तन्निरूपितसादृश्यज्ञानमिति उपमा
नं मानान्तरमिति तदेतत्सर्वमभिप्रेत्योपसंहरति। तस्मादिति॥ ॥इति उपमानपरिच्छेदः॥ ॥उपमानान
न्तरं शब्दस्य बहुवादिसंमतत्वात् तदर्थोपपत्तेः प्राक् शब्दं निरूप्यतरत्याह। अत्र युक्ति। केचित्तु स्वसमानविषय
वाक्यार्थयथार्थज्ञानजनकत्वमिति कारणाहारकं प्रमाणशब्दलक्षणमाचक्षते तेन तत्संशुकवाक्यादि
द्वा कयः आप्तेः न चेश्वरज्ञानं तत्र यथार्थवाक्यार्थविषयं तत्रास्तीति वाच्यं ईश्वरानंगीकर्तृमते तत्प्राप्यत्वात्तेः किंच
नेदं प्रमाणशब्दस्य लक्षणं शुकादिप्रयोगरूपस्य क्लृप्तपदावलीज्ञानादेव अन्ये तु शब्दरचनोपपत्ते गौरवे राम०
ण क्लृप्तस्य वाक्यार्थज्ञानस्याहेतुत्वात् किंच इदमसंभवि सिद्धान्ते वियदादिवन्नित्यशब्दस्य पौनःपुन्यप्रयोगंभिन्नभिन्न ६९

138

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुपूर्वीघटितपदवाक्यभेदेपि स्वरूपेणानन्वयज्ञानाभावात्तत्प्रकारणाहार्यकं प्रमाणशब्दलक्षणं न युक्तमित्य
भिसंधाय प्रकारांतरेण लक्षणमाहेयस्येति। मानांतराबाधिततात्पर्यविषयीभूतपदार्थसंसर्गबोधकत्वं
यस्य वाक्यस्य तद्वाक्यं प्रमाणं शब्द इत्यर्थः। शब्दस्य मानांतरे प्रमाणांतर प्रमाणलक्षणं माप्रसाक्षीदि
ति वाक्यस्यैतत्कं पदार्थसंसर्गबोधकवाक्यानि नास्मिंश्चेदिति अयोग्यवाक्येपि गतत्वात् बाधिते संस ति
र्गविशेषरां ब्रह्मपरवाक्यातिरिक्तसकलवाक्येषु स्वार्थसंसर्गस्य नेह नानास्तीत्यादिना बाधितत्वा
दव्याप्तिरित्यत उक्तं मानांतरेति। सजातीयमानांतरेत्यर्थः। तथा च पारमार्थिकत्वावच्छेदकैर्वेदांतैर्घट
न यन्नादि संसर्गस्य यागस्वर्गादि साध्यसाधनभावस्य च बाधेपि सजातीयैर्व्यावहारिकत्वावच्छेदकैः प्रमा
णांतरैर्बाधाभावान्नाव्याप्तिः अर्थवादवाक्ये प्रजापतिरात्मनो वपामुदखिददित्यादौ अप्रमाणपदा
र्थसंसर्गस्य व्यवहारदशायामपि बाधात्तात्पर्यविषये तूक्तं। यद्वा योग्यशब्दत्वमिह प्रमाणलक्षणमिह
योग्यत्वं च तात्पर्यविषयसंसर्गाबाधः प्रमा स्वरूपयोग्यशब्दमात्रस्य लक्षणत्वादेनासंभवादोनाति
प्रसंगः अथवा तात्पर्यविषयाबाधितसंसर्गगोचरशाब्दज्ञानजनकत्वं लक्षणं शाब्दज्ञानं च पदज्ञा
नत्वेन पदज्ञानजन्यं तात्पर्यज्ञानत्वेन तात्पर्यज्ञानजन्यं वा। तात्पर्यज्ञानकारणत्वं चाकारएवमप्युद्येशिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२+त्यादीनि तात्पर्यविषयपदार्थसंसर्गप्रमापकाणि योग्यतासत्तिमत्पदकदंबत्वात् पदमानवेत्+२

व

स्तःशब्दो न पृथक्प्रमाणं अनुमानेनैवार्थसिद्धेः तथाहि लौकिकानि गामानयेत्यादीनि वैदिकानि च अ

टी० ग्निष्टोमेन स्वर्गकामो यजेतेत्यादीनि वाक्यवत् एते पदार्थास्तात्पर्यविषयमिथःसंसर्गवंतः योग्यपदस्मारित

७० त्वात् संप्रतिपन्नवत् न च शब्द एव संसर्गप्रतीतिजनकः पितु अविशेषादिति वाच्यं अनुमानस्यैव तत्प्रमा

णभावत्वात् तस्य स्वकरणत्वौचित्यात् तस्मात् अनुमानविधया प्रमाणं न त्वातंत्र्येणेति तदेतन्निराकरोति

आकांक्षेति वाक्यार्थज्ञाने आकांक्षतायोग्यतासत्तयः कारणानीति अतो वाक्यं पृथक्प्रमाणमित्य

र्थः तथा च याद्दृशज्ञाने योग्यत्वादेः सहकारित्वं भजते नेति भावः ननु तस्य वाक्याकांक्षादिघटितलिंग

जन्यसंसर्गानुमितौ आकांक्षादेरुपयोगः लिंगांतरजन्यानुमितौ जिज्ञासालक्षणाकांक्षायाः सिषा तु

धयिषयाविरहसहकृतसिद्ध्यभावरूपपक्षतासंपादनद्वारा अन्वयबोधाभावलक्षणायाश्च पक्षतात्वेन त

क्यार्थपर्यवसन्नयोग्यताज्ञानस्य बाधितत्वज्ञानत्वेन परार्थस्थितिरूपाया आसत्तेर्विशेषणज्ञानत्वेन प

क्षताज्ञानत्वेन चवा उपयोगः तत्तस्य न विजानीयज्ञानसंनिकृष्टस परिनौषासहंतानुपयज्ञानमिति न हिता

त्पर्यज्ञानस्यापि क्वचिदनुमितावुपयोगः अनुमितौ वैच्छेदे वा हेतुत्वात् न च तात्पर्यविशेषितसाध्यास

त्त्वपि व्याप्तिज्ञाने सत्त्वाकांक्षादिषु चतुर्षु कारणेषु संसर्गज्ञानस्यानुभवसिद्धत्वान्न शब्दस्यानु ह म०

७०

ल्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानेंतर्भावः। अपि च यदि शब्दप्रमाणेप्यवश्यं हेतुः तत्सेतु मानमपि प्रत्यक्षप्रमाणं न स्यात्तानव्यापिक्लृ
प्तप्रमाणाभावस्य मनआदेः प्रत्यक्षस्य प्रमाणत्वविसात यदि च तत्र साक्षात्कारेस्मीत्यनुव्यवसाया
भावात्तत्रमिनोमीत्यनुव्यवसायाच्च प्रत्यक्षप्रमाणमनुमानमिति मतं तदा शब्दादनुमर्थं शृणोमीत्य
नुव्यवसायात्तेपि पृथगिति तुल्यं तस्मात्सर्वेपि लौकिका वैदिकाः शब्दाः स्वार्थेनुमानमिति सं
क्षेपः। आकांक्षादिकं शाब्दज्ञाने साधारणं कारणमित्युक्तं न तत्प्रथमनिर्दिष्टत्वेन प्रथमाशिष्यजि
ज्ञासाकांक्षां निरूपयति नन्वेवमिति। ननु कदाचिज्जिज्ञासाविषयत्वेहि तद्धुलेन योग्यत्वं कल्प्यत इत्येवकु
तश्रुतासाकांक्षक्रियावाक्ये तावदुपपादयति। क्रियाश्रवणाभावेनेति कर्तृव्यक्तायासंति अंगस्ये
त्यर्थः। ननु जिज्ञासाविषयत्वमेवाकांक्षास्तु लाघवाद्दाव्यपकत्वाच्चेत् । अजिज्ञासोरिति। न नआह ५
नजिज्ञासाविषयत्वयोग्यत्वमवच्छेदकापरिचयेहेडये हमिसत आह। तदवच्छेदकमिति। नन्वत्ताकां
क्षाला कवेस्योः क्रियापदे घटमानये सादिषु सन्निधोपजनितद्रे श्रोतुमातत्र्यां स्वर्गकामो य
जेतेत्यादिषु चाग प्रधानवाक्येषु तत्र क्रियाकर्मकरणेनिकर्तृव्यक्तत्वानां जिज्ञासाविषयत्वयोग्यत्वा
वच्छेदकानां सत्वात्तथापि तद्धहिते तु नीलो घटो नीलोत्पलत्वमस्पहं बहुासि त्रयमात्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ब्रह्मेत्यादिषु सिद्धार्थवाक्येषु कथमाकांक्षा इत्यत आह अभेदान्वये चेति। अभेदान्वयप्रतियोगिनि
७१ तत्त्वे पदार्थाविशेष्यः नचैवमननुगमः अवच्छेदकाननुगमेपि वह्निजन्यत्वादिवत्तदवच्छेदकत्वयो
ग्यत्वलक्षणाकांक्षाया अनुगतत्वात्। अनन्वयबोधाभाव एवाकांक्षा तस्याः प्रागभावरूप
त्वया शाब्दज्ञानकारणत्वेन क्लृप्तत्वादित्यत आह। नादृशेति। बलाबलाधिकरणेति। तृतीये ते स्थि
समाख्या श्रुतिलिंगवाक्यप्रकरणस्थानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्। अत्र श्रुत्यादीनामे
कविषयत्वसमवाये न विरोधे सति बलाबलं विचार्यते। तत्र श्रुतिवाक्यविरोधोदाहरणं। त
प्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति। तत्र संदेहः। किं वाजिनस्य वैश्व
देवशेषत्वमुत वाजिनामकदेवतातच्छेषत्वमिति किं तावत्प्राप्तं विश्वेदेवशेषत्वमिति कुतः वा
जिभ्यो वाजिनमिति वाक्यात्। वाजिनस्य विश्वेदेवांगत्वावगमात् न च वाजिभ्य इति देवतांतरश्रवणाल्ल
घ्रमस्य विश्वेदेवसंबंध इति वाच्यं वाजमन्नमामिक्षा तदेषामस्तीति व्युत्पत्त्या वाजिपदस्य तत्संब
धिविश्वेदेवप्रतिपादकत्वात् न चामिक्षाया एव श्रुत्या देवतासंबंधो न वाजिनस्य तस्य दौर्बल्यप्रमा
णवाक्यगम्यत्वादिति वाच्यं वैश्वदेवीपदस्यामिक्षापदसापेक्षत्वेन तस्यापि वाक्यगम्यत्वात् रा०म०
७१

142

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्तु वा आमिक्षासंबंधस्य श्रौतत्वं तथा [illegible] श्रुतिवाक्ययोः शब्दत्वाविशेषेण तुल्यबलत्
त् तस्मात्तामिक्षया वाजिनबाधः किंतु तया सह विकल्पसमुच्चयो वेति एवं चोक्तरीत्यातः विश्वेषां देवा
नामामिक्षयैव संबंधः युक्तः तस्याः वैश्वदेवीति तद्धितश्रुत्यवगम्यत्वात् न चामिक्षापदसोप
स्थत्वाद्वाक्यगम्यत्वं तद्धितस्यास्येति सर्वनामार्थस्मरणेन तस्यामिक्षावाचकत्वात्तन्नैवमामिक्षा
पदं वैयर्थ्यं सन्निहितावलंबिनो स्येति सर्वनाम्नः कोर्थः इत्याकांक्षायां विशेषसमर्पकत्वात् अत
एवायं घटः स्य चायमिति पदस्य विशेषसमर्पकघटभेदापेक्षायामपि न श्रुतिविहानिः। न च वाजिन
पदं विशेषसमर्पकं येनामिक्षावाजिनयोस्तुल्यो देवतासंबंधः किंच न वाजिपदाद्विश्वेदेवोपस्थितिः
तस्याश्वेष्वेव रूढत्वादपि न वाजिनस्य विश्वेदेवैः संबंधः तत्तस्यामिक्षापानिरपेक्षसाधनत्वान्न समुच्चयः
नापि विकल्पः तस्याष्टदोषदुष्टत्वात्तेन श्रुत्व विश्वेषां देवानां श्रुत्यवगतामिक्षावरुद्धत्वेन नैकां
क्ष्यान्नवाक्येन वाजिनसंबंधः तदुक्तं भट्टपादैः श्रुत्यामिक्षैव शेषा हि नेषा वाक्येन वाजिनं तदुर्बलप्र २
माणत्वात्तयाक्रान्तानिराकृतमिति यदेयद्यप्यलं यागनिरूपिनजिज्ञासाविषयत्वेयोग्यतावच्छेदकं तत्त्वा
मिक्षावद्वाजिनेप्यविशिष्टमिति कथं नैराकांक्ष्यमिति चोदयन्ति तन्निरस्तं न हि वेद्यपूर्वत्वं तदवच्छेदकं जनितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
७२

न्वयबोधादपि वाक्यात्तु नान्वयबोधापत्तेः किंतु समभिव्याहृतपदस्मारितपदार्थान्वयबोधविरहसहकृतपदे
यत्वं तत्त्वामिक्षायामेवेति परिहरंति। नन्वस्तु समानजातीयेति। नन्वस्तु वैश्वदेवयागे त्वय्यमेवं वा
जिनान्वयबोधस्त्वामिक्षेव निराकांक्षा स्यादिति साशंक्य श्रौतामिक्षासंबंधोत्तरत्वापेक्षानंतरप्र
वृत्तवाक्यप्रमाणकवाजिनान्वयस्य प्रथममनुपस्थितत्वात्तामिक्षायां नैराकांक्ष्यमित्याह श्रौता
मिक्षायां त्विति। ननु यस्य वाक्येऽपूर्वतः प्रामाण्यबुद्ध्या वा नान्वयबोधः तदा त्वामिक्षायां नैराकां
क्ष्यं दुर्वारमिति चेन्न प्रमाणबोधमूलान्वयबोधाभावसहकृतपदैकपदत्वस्यैव प्रजिज्ञासा
विषययोग्यतावच्छेदकत्वेन विवक्षितत्वात्। एवं श्रौतामिक्षान्विते वैश्वदेवयागे वाजिनस्य निराकां
क्षत्वात्तदंगत्वबोधकस्य वाजिनवाक्यस्य दुर्बलत्वमित्युक्तं संप्रत्यसमवायितत्स्वभावत्वयुक्तमेव दौर्बल्य
मित्याह। उदाहरणांतरे त्विति। ऐंद्र्या गार्हपत्यमुपतिष्ठते इत्युदाहरणांतरे इत्यर्थः तत्र हि ऐंद्र्या गा इ
र्हपत्यमुपतिष्ठत इत्यत्र कस्मां चक्रस्य कदाचन स्तरीरसीत्यैंद्र्यां गार्हपत्यागत्वावगमेन निराकांक्षत्वात् ऐं
द्र्या शेषत्वे लिंगस्य न त्वामानां संपत्तया यज्ञायज्ञियेसाम्निऐरं कृत्वोदे यमितिप्रक्रसाद्दपदस्यात्रिगिराद
त्र स्य निराकांक्षत्वात्तत्प्रापकस्य वाक्यस्य दौर्बल्यं। चनिष्टा कामरश्शी दर्शमासप्रयोगे एकविंशतिसंख्या रा म०
त्र३
७२

सामिधेन्यनुवचनानामेकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येति श्रुत्याङ्गत्वावगतेपि पंचदशसंख्यासामि
धेन्यनुवचनानामाकांक्षाभावात्तदंगत्वबोधकस्य प्रकरणस्य श्रुत्याबाधः। गोदोहनान्वितेन पशुकामप्र
योगे च मसृष्टापकस्य कमस्य यजमानस्यापाद्येत्यत्र श्रुत्यात्र तु यागेषु पाठाद्या यजमानकर्तृकत्वावगते
उद्गातृसमाख्याया दुर्बलत्वात्। तथा स्योनं ते सदनं करोमीत्यस्य तस्मिन्सीदेत्यस्य पुरोडाशसदनकरणप्र
तिष्ठापनयोः लिंगेन प्रत्येकमेव विनियुक्तत्वात्सकलमंत्रस्य वाक्याद्विकल्पेन समुच्चयेन वा सदनकर
ण प्रतिष्ठापनयोः प्रयोगः सूक्तवाकनिगदस्य इदं हविरजुषेतामविवृधेतामित्यादेरग्नीषोमादिपदव
त्त्वेदेकवाक्यगतपदस्यामवस्यापर्वद्वये प्रयोगः ननु प्रकरणात्तन्नोषिष्टियामन्नापि प्रयोगः विद्विवना
ह्रीनामभिषेचनीयसन्निधावाम्नातानामपि प्रकरणाद्राजसूयांगत्वावगमेन निराकांक्षत्वात्पुरोडाश
पात्रांगत्वमिति समाख्यायास्तद्दौर्बल्यं तथा च सर्वत्रोक्ताकांक्षाभावः दुर्बलत्वप्रयोजकः न त्वजनि
५३ कान्वययोग्यत्वलक्षणाकांक्षाविरहः न स्यात् सर्वत्राभावादितिभावः। अथ चेदमालोचनीयं जिज्ञासाविषय
योग्यत्वं नाकांक्षा घटः कर्मत्वमानयनेकृतिः अग्निं करणत्वं संस्कोरनः कर्मतापाकः कृतिविषयसाधन
मित्यत्र विषयत्वादेस्तद्घटकस्य सत्त्वेन साकांक्षत्वापत्तेः न चेष्टापत्तिः ततोऽप्यन्वयबोधप्रसंगात्तव

145

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ७३

पयोग्यत्वान्नान्वयबोधः इति चेन्न साकांक्षत्वेनैव शब्दस्य स्वरूपयोग्यतया अप्रापातात् । किंचान्वयबोधोत्तर
कालमपि पदार्थेषु योग्यतालक्षणाकांक्षासत्त्वात् पुनरन्वयबोधापत्तिः न चान्वयबोधाभावसहकृतजि
ज्ञासाविषयत्वं योग्यत्वमाकांक्षेति विवक्षितमतो नातिदोष इति वाच्यं अन्वयबोधानंतरमनेन शाब्दन ६
पुनर्ज्ञानीयामितीच्छायामन्वयबोधदर्शनात् । किंचैवमाकांक्षैव हेतुर्न स्यात् अन्वयबोधाभावस्य प्र
तिबंधकाभावतया पृथक्कारणत्वेन कारणतावच्छेदकतायोगात् । अस्मयासिद्ध्यभावसहकृतसिद्ध्य
ग भावः पक्षतेति सिद्धांतो भग्नः तत्र अनयुक्तेः जिज्ञासाविषयत्वयोग्यत्वमाकांक्षेति । अत्र ब्रूमः जिज्ञासा
आ विरहसहकृतान्वयबोधाभावाकांक्षा अजिज्ञासितान्वयबोधभावच विशेषणाभावाद्विशिष्टाभाव अ
सत्त्वेन बो[illegible]धकेवाकेविशेष्याभावाज्ज्ञानितान्वयबोधे च + नान्वयबोधानुपपत्तिः नचैवं घटः क
र्मत्वमित्यादावपि तत्सत्त्वेनान्वयबोधापत्तिः क्रियाक र्मान्वयबोधविशेषतादृशपदस्य स्वरूपयोग्य
त्यात् तान वसाकांक्षत्वेन तदप्रापादकमिष्टत्वमिति वाच्यं अन्वयबोधविशेषपदविशेषत्वेनैव हेतुत्वा
त् । नन्वजिज्ञासितेनेपि चाजिनाहोविशेष्याभावसत्त्वेन साकांक्षतापत्तौ बलाबलाधिकरणेके नैराकांक्षं
विरुध्येते इति चेन्न नहि नैराकांक्षपदेन शाब्दज्ञानोपयोग्याकांक्षाभावस्तत्राभिप्रेतः किंत्वस्मन्निब राम०

७३

146

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्पनानुकूलजिज्ञासालक्षणाकांक्षाभावः। अन्यथा अत्र शाब्दरूपे लिंगे प्रकरणादौ नैराकांक्ष्यं श
ब्दः स्यादिति वाच्यं। चोदनालक्षणोर्थो धर्म इति धर्मस्य श्रुतिप्रमाणात्तावस्थापनेन सर्वत्र श्रुते
रवविनियोगजनकत्वात् तदुक्तं बलाबलाधिकरणे भट्टपादैः। विनियोक्त्री श्रुतिस्तावत्सर्वत्रैव घतेषु स
स्फुटा॥ धीस्तस्याः सन्निकर्षेण विप्रकर्षेण वाहितेति। ननु नैराकांक्ष्यस्यानुमित्सयापत्यादोषतया
श्रुतिकल्पनाचीतिबंधकत्वाभावाच्छाब्दज्ञानानुकूलाकांक्षाभावपर एव नैराकांक्ष्य
शाब्दत्वे चेति चेत्सत्यं नैराकांक्ष्यं न दोष इति न यापित्वा
त्विनाश्रुतिर्विनियोजिका नैराकांक्ष्योत्तरकालिककल्पितस्य नसपोहृषपत्वेनाप्रमाणत्वातं ति
दुक्तं मंत्राधिकरणे नैराकांक्ष्योत्तरकालिककल्पितमपि पौरुषेयत्वात् प्रमाणं स्यादिति नित्यं चाकां
क्षा स्वरूपसत्त्वेहेतुः। नन्वियं पक्षतापर्यवसन्नेति कथं शाब्दज्ञानासाधारणकारणमिति चेन्न अत्र न
वह्निशेषणसंकरः तत्र त्वनुमितिगोचरेच्छा सिषाधयिषाजिज्ञासात शाब्दज्ञानेच्छा त्वेनेन शब्देनाऽ
मर्थं जानीयामिसेवंरूपा। नाप्यन्वयबोधाभावः साधारणः अनुमितौ हि तिष्ठिमात्रे सेव प्रतिबं
धकत्वान्न चैवमन्वयबोधाभावस्य प्रागभावरूपतया नासाधारणत्व तत्प्रागभावत्वेनासाधारणे

ती

व-च

147

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ७४

पिविशेषणानां तदविशिष्टतया तस्याः साधारणत्वात् तस्माज्जिज्ञासाविरहसहकृतान्वयबोधाभावप्र
वाकांक्षा सैव च शाब्दज्ञाने कारणं इत्यलमतिविस्तरेण। योग्यतां निरूपयति। तात्पर्यविषयसंसर्गो यो
ग्यतेत्यर्थः तात्पर्यविषयपदस्य प्रयोजनमाह। प्रजापतिरित्यादिना। संप्रदायमतेनाह। बाध्याभेदबाधे
पीतिइयं योग्यतानस्वरूप [illegible] सतीहेतुः शाब्दभ्रमोच्छेदात् किं तु ज्ञाय
मानातज्ज्ञानं च संशयनिश्चयसाधारणं कारणं तत्र तत्संशयविपर्ययोने शाब्दज्ञानानुपपत्तेः। चा
भाकरास्तु न पदजन्यपदार्थोपस्थितिः शाब्दज्ञानांगं किं तूपस्थितिमात्रं लाघवेन चासत्तेः पदविशेष वात ६
जन्योपस्थितित्वेनाहेतुत्वे घटः कर्मत्वमित्यादौ अन्वयबोधप्रसंगः तस्य स्वरूपायोग्यत्वात् नैवं च
मात्रं नं पचतीति इत्यत्र मानान्तरोपस्थितकलापस्याप्यन्वयबोधापत्तिः तात्पर्यज्ञानेनैवं तत्र विषयमोप
पत्तेः। अन्यथा देवदत्तशब्दात्तत्कलापपदोपस्थितस्य तद्वमनेऽप्यन्वयबोधापत्तिर्दुर्वारा। किं च पदजन्या
स्यात शाब्दधीहेतुः द्वारमित्यादौ व्यभिचारात् तन्न न पदजन्यार्थोपस्थितिरासत्तिरिति तच्चिरण्य चष्टे
आसत्तिश्चेति। अयं भावः। पदज्ञानजन्यान्वयप्रतियोग्युपस्थितेरेवासत्तिः सैव चान्वयबोधांगं
अन्यथा सैकारोपस्थितं नीरमानाय घोषादिपदैरेवान्वयबोधसंभवे लक्षणोच्छेदापत्तेः किं च यदि व्यासंगत रामं०

148

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिछिन्नस्यान्वयबोधकत्वाद्घटसमवायसंबंधेन घटादिपदैरेवाकाशापरिछिन्निसंभवादाकाशादिपदानां न त्वशक्ति
रनेकल्पेन ननु वृत्तिधीरपि शाब्दधीहेतुः लाघवेन पदजन्यपदार्थोपस्थितित्वेन हेतुत्वे अतिरिक्तकार
णाकल्पनादिति। यदुक्तं हारिभिसारो व्यभिचार इति तन्न चाह। अत एवेति। न चार्थविशिष्टपदकल्पना
द्वारमावश्यकार्यकल्पनामिति वाच्यो उक्तन्यायेन पदजन्यपदार्थोपस्थितित्वेन हेतुत्वसिद्धौ न तस्य न
गौरवस्याप्रामाणिकत्वेनादोषत्वात्। अन्यथापिधानाशशाब्दत्वं न स्यात् अत एवमिति विपरामर्शजन्यत्व
वच्छाब्दत्वे पदज्ञानजन्यत्वस्य प्रयोजकत्वात्। इत्येतत्सर्वं दर्शितम्। भेदलक्षणे पठितं समेषु वाक्यभेदः
स्यात् यान्यसमवेतानर्थानि वाचकानि कविनियोगवन्ति यथा इषेत्वोर्जेत्वाहीति तेषु संदेहः किं प्र
कटदृष्टार्थमंत्रावधेरेकमेव त्वेनयावदेवमिथः संबद्धमिषेत्वेति तावदेकं यजुः अन्यत्तु यजुरन्त
रमिति किं वा प्रत्येकं यजुरिति वृत्तः एकार्थत्वात्। न च निराकांक्षत्वात् नैकमेव त्वे साकांक्षत्वे सति ए
कप्रयोजनत्वस्यैव एकमंत्रत्वे तन्त्रत्वात्तरमिति वाच्यं। एकप्रयोजनानां प्रत्येकं तत्साधनशक्त्यभावेन न
विभज्यमानसाकांक्षत्वात् नन्वसिद्धमेकप्रयोजनत्वं विनियोगभेदेन प्रयोजनभेदावगमात् अत्र
ध्येकमंत्रत्वघटीकभेदे न विनियोगः इषेत्वेति शाखामाछिनत्ति ऊर्जेत्वेत्यसूजमार्ष्टि इत्येवमादिः कर्थस्यादि
उ

149

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ८५

५ + विनियोगभेदानुपपत्तिः मंत्रावृत्यापि तदुपपत्तेः। तत्तन्मंत्रे नयाभि मिति। एवं उक्त त्रे पूर्वपक्षे +
+ प्राप्त क्रमः। इषेत्वेत्येकं यजुः ऊर्जेत्वेत्यपरमिति युक्तं। शब्दभेदेन + ५

दर तिचेत्। किमर्थाभिधानलक्षणप्रयोजनस्य भेदः उतादृष्टलक्षणस्य नाद्यः वायवस्थइ सादिवीदिषेत्वे
साद्यावच्छतत्क्रियापदे तेंविनियोगभेदानुपपत्तिः मंत्रावृत्त्यापि तदुपपत्तेः तत्तन्मंत्रे चैकमिति ए
वं तत्स्त्वेत्यत्र पूर्वपक्षे प्राप्त क्रमः। इषेत्वेत्येकं यजुः ऊर्जेत्वेत्यपरमिति युक्तं शब्दभेदेनैवायोगात्तनच
क्रिया पदाध्याहार एव अर्थाभिधानभेदस्तिवाच्यं तत्तत्तदध्याहारकल्पनगौरवान्मानाभावा
त्त्वनद्वितीयः कल्पनीयादृष्टस्य लाघवादेकस्यैव कल्प्यत्वात्तनच चते कोनेदे नो भिचवाक्यरूपाव
गमे नैनिराकांक्षत्वात् नैकप्रयोजनत्वाद्विभज्यमानसाकांक्षत्वमिति तन्न च प्रथममेवरूपभेदेन
विनियोग प्रयोजनभेदसिद्धौ तदुत्तरकालीनस्य प्रयोजनकल्पना गौरवस्य तद्दूरापरिपंथित्वात् तेन
चसेच भेदस्याप्य भेदस्तुपपत्तेः कथमेनाव नाछिनत्ति यज्ञमार्छिक्रियापदाध्याहारं सिद्धिरितिवाच्यं।
करणत्वेन चोदितेषु मंत्रेषु कल्पनीयस्य प्रयोजनस्य क्रियानिवर्तनोपायस्यैव कल्प्यत्वेनार्थप्रकाश
नस्यैव तत्कार्यत्वकल्पनात्तस्य च क्रियापदाध्याहारं विनानुपपत्तेः। यथा ऊर्ध्वतावितना चोदितकरणसाम
र्थ्यं नभवितावदनाम्नानमपि कल्पनीयं छिनत्ती सा शीतैविकृत्ताविति। अयमेतत्तां जुष्टं निर्वपामि शीर्ष्णीर्हि सत
मध्य सुमनस्यमानः इतिमंत्राज्ञाद सकिमि मोसोयं यागादिर्षे । हिनस्याद्भमनेनेतिसंशयपश्चीत्यपि प्रथम० ८५
उ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्युकूलं मन्त्रयोरैक्यदेवताप्रकाशकतया प्रक्तो हस्वार्थयोरपि ऐन्द्र्यां गार्हपत्य प्रकाशकत्ववत्नीवारस्य यदि
प्रकाशकत्वस्य गुणत्वस्यैवोपपत्तेः न तत्प्रकाशनार्थमूहइति भावप्रभी ह्य ग्निपदयोरैक्यदेवतादि
वाचिपदविवक्षया प्रयुक्तयोरैक्यवन्मंत्रस्य पविवक्षया प्रयुक्तताप्रयुक्ततयात नष्टानेसूह्येनीवारपद
प्रक्षेपोविकृतावपि नवमेणकृन्ति तेन तथा चार्थाध्याहारपक्षे मानान्तरोपस्थि नस्तस्यैदिकमात्रायमे
प्रयान्वयबोधकत्वसंभवाचस्य यदिवदिह वाग्निरित्येतदधिकरणविरोधः स्यादिति भावः नन्वा
सत्तिः पदजन्यविशेषितापि न शाब्दज्ञाने हेतुः अन्नासत्वेन दुर्मेणशब्दभ्रमाभावप्रसंगादिति चेन्न
तात्पर्यभ्रमेणयोग्यताभ्रमेणवा तदुपपत्तेः नं चैवमासत्तेः स्व रूपसत्वाहेतुत्वे विशेषणतावच्छेदकं म
नि चेन्नतात्पर्यभ्रमेण योग्यताभ्रमेणवा तदुपपत्तेः नं चैवमासत्तेः स्वरूपसत्वाहेतुत्वे विशेषण
ज्ञानत्वेन कारणत्वाय शाब्दज्ञानासाधारणकारणत्वेन त्स्यादिति वाच्यं पदज्ञानजन्यपदार्थोप
स्थितित्वेनैव हेतुत्वाभ्युपगमात् अत एव विशेष्यधीरपि शाब्दधी हेतुरिति दिक् केचित्तु गौणीवृत्ति
विषयस्यापि पदप्रकृत पदार्थैन यातेन सह पदार्थस्यैत्रैविध्यमिति नत्सुगौणपादर्तेल क्षितलक्ष
णान्तर्भावस्यवक्ष्यमाणतया नहि विषयस्य पदार्थस्य लक्ष्य एवान्तर्भावादयुक्तमिसाशयेनाहा पदा

151

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
७६

र्थश्चेति। पदनिष्ठवृत्तिविषयत्वस्यार्थः। ननु गौणस्य लक्षणान्तर्भावे लक्ष्यस्यापि तदन्तर्भावावश्यंभावात्ते
न रूपेण विभागः किं न स्याद् अविशेषादित्याशंकाशक्यो गौणश्चेति विभागकरणे केवललक्षणायां गौ
णस्यान्तर्भावाभावेन लक्ष्यासंग्रहापत्तेरित्यभिप्रेत्याह शक्य इति। शक्तिविषयत्वं शक्यत्वं। तन्निरूपणाधी
ननिरूपणमित्यत एतां निरूपयति। शक्तिर्नामेति। लक्षणां व्यावर्तयति। मुख्येति पदनिष्ठसंबंधमात्रनि
रूप्य इत्यर्थः। लक्षणा तु परसंबंधिपदार्थान्तरेणान्वयानुपपत्त्या च निरूप्येति नातिव्याप्तिः। प्राभाकराणां
कार्यान्वित एवार्थे पदसामर्थ्यं नत्वितरान्विते केवले वा तन्मते पदानामन्वितेन सङ्गतिस्त्वादिति तदेतन्नि
राकरोति। स्वार्थ इति। विषयत्वं सप्तम्यर्थः। कार्यान्विते च शक्तिरन्येन निराकरिष्यत इति भावः। शक्तिः संके
तस्य च तद्वेश्वरेच्छा अस्मात्पदादयमर्थो ज्ञानीयादित्येवंरूपा न तु पदार्थान्तरं मानाभावादिति नैयायिकाः
प्राहुः तान्निरस्यन्नाह। सा च शक्तिरिति केचिदिति कस्यायमाह। सिद्धान्त इति। न च कारणत्वतद्वच्छेदकानिरि
क्तशक्तौ मानाभावः दाहादिलक्षणकार्योपपत्तेरेव प्रमाणत्वात् न च वह्निस्वरूपात्प्रतिबंधकाभा
वसहकृतात्तदुपपत्तिः प्रतिबंधकाभावस्याभावत्वाऽहेतुत्वात् अत्रानुमानमपि वह्निरतीन्
द्रियशक्तिमत्स्थापकेतरभावाश्रयः गुणवत्त्वात् घटवत्। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधि

रा०
७६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

152

कश्चन्न दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च। शक्तयः सर्वभावानाम
चिंत्यज्ञानगोचराः। यतोतो ब्रह्मणस्तास्सर्गाद्याभावशक्तयः। सर्वज्ञत्वानन्तत्वानादिबोधस्वतंत्रता
नित्यमलुप्तशक्तिरित्यादिषु श्रुतिस्मृतिवचनानामपि शक्तौ मानं। ननु तंत्वे चिन्त्यवाचार्यैः। परस्य शक्ति
र्विविधा सर्गाद्याभावशक्तय इति श्रुतिस्मृतिष्वति भाशक्तिः केन निवार्यत इति। ननु प्रमाणाभा
वात्तास्त्वर्थविषयिणी शक्तिः पदानां येन सा पदार्थांतरमिति विचार्यते तत्र आह। सा चेति। यद्वा
नन्वस्तु निहता शक्तिस्तथापि शक्यत्वे तु वचनं न तावच्छक्तिविषयत्वं अन्वयस्यापि शक्तत्वाप
त्तेः नापि ज्ञायमानं शक्तिविषयत्वं तथात्वे तज्ज्ञानज्ञापकं न तावत्प्रत्यक्षं गवादिवदनुपलंभात्।
न चानुमानेन व्याप्तिलिंगाभावादित्यत आह सा चेति। नाहशेनेति ज्ञायमाने स त्वर्थः। ननु व्यक्तिरेव
नामाख्यातत्ववाच्या आलम्भप्रोक्षणविशेषनादिचोदनायाः गामभ्याजेत्यादिलौकिकचोद
नायाह ननादिविधिनिषेधस्य चतत्रैव संभवात कथं तर्हि जातिलाभ इति चेत् आक्षेपात्। न च जातिरेव
वाच्यास्तां तत्संबंधात् व्यक्तिलाभ इति वैपरीत्यमपि जात्यन्यथेक्तिः व्यभिचारेणतदनाक्षेपकत्वात्तस्या व्य
क्तिरेव नामाख्यातसदवाच्या न साह नेकेति। अयं भावः किं शुद्धव्यक्तेर्वाच्यत्वं जातिविशिष्टस्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीनाद्यः शब्दान्निर्विकल्पकधीप्रसंगात् न द्वितीयः नागृहीतविशेषणान्यायेन प्रथमगृहीतजातेरेव नामा
दिपदवाच्यत्वौचित्यात् किंच तत्पक्षेपि संगतिग्रहः सर्वव्यक्तिविषयः उत एकव्यक्तिविषयः नाद्यः व्य
तीतानागतव्यक्तीनाम् शक्यज्ञानत्वात् न द्वितीयः इयं व्यक्तिस्तद्विषयाऽयं नेति नियामकाभावात् भाक्ता
संगतिग्रहस्यान्यविषयत्वेनाप्रदर्शकत्वादित्याशंक्य लक्ष्यत्वान्न दोषः स्यादिहेगोत्वपर्यन्तशक्यसंबन्धिमात्रवि
षया वृत्तिः जहल्लक्षणा सा च यथा पिंगंगायां घोषः प्रतिवसतीति रत्यत्र प्रसिद्धलक्षणास्थलेऽगंगापदे प्र
तत्याघिंगंगातीरत्वस्य प्रवाहपरिच्छिन्नस्य कदाचिल्लक्ष्यतावच्छेदकत्वात्सा च अजहत्स्वार्थापीति यत्र
लक्षणाजहत्स्वार्थैव तत्रोदाहरन्ति यथा विषं भुंक्ष्वेति यद्यपि विषभक्षणं कर्तव्यत्वान्वययोग्यं
परं तत्र तु सघोषापादयतीति नान्वयानुपपत्तिस्तथापि पितुः शत्रुगृहे पिभोजननिवृत्तौ तात्पर्यात्ते
दनुपपत्त्या वाक्यस्य तत्र लक्षणेति छिन्नदेश काद्यर्थमिति शक्यार्थविशिष्टविषयत्वं लक्षणं तेन काके
भ्यो दधि रक्ष्यतामित्यत्र नातिव्याप्तिः काकादेः शक्यार्थस्य विशेषणत्वेन जहदजहल्लक्षणायास्तु हि
शिष्टविषयत्वाभावात् यत्र हीति शक्यैकदेशमात्रविषयवृत्तित्वं जहदजहल्लक्षणालक्षणमिह विवक्षि
तं न तु विशिष्टवाचकत्वघटितं तस्याव्याप्तत्वात् न च काकेभ्यो दधि रक्ष्यतामित्यत्राव्याप्तिः पुनः कादेरेकदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यक्तित्वाभाभावप्रसंगादिति। ननूक्ते नोभादिपक्षाशक्तत्वे कथं न दुष्कारणानंतरं न स्वत्ययः कथं वा पशुमान
य पशुमालभेनेत्यादिचोदनाः। न चानेकव्यक्तिवाचकत्वे गौरवं स्यात् नभादिचोदनानुपपत्या व्यक्तिवाचकत्व
सिद्धौ तत्कल्पकत्वस्यादोषत्वात् तस्याशयेनाक्षिपति। कथं तर्हीति। जातिभानसामग्र्या व्यक्तिभानसामग्री नैयत्या
द्वा जातिभानसामग्र्या व्यक्तिभासकनियमाद्वा नाद्यः असिद्धेः नद्वितीयः स्वतिस्यत्वव्यभिचारात प्रकृते
व्यक्तिशक्तिज्ञानाभावे ननु तस्या हि त्याभावाच्च। न तृतीयः अनन्यभानसामग्र्या अनन्यभासकत्वे अतिप्रसंगात् व्य
त्यक्तस्य त्वेच संयोगसंयुक्ततादात्म्यादेर्व्यक्तिजातिभासकत्वस्य सत्वात् ततश्च जातिभानसामग्र्या न व्यक्ति
त्वाभडति अस्तु वेत्याहयद्वेति। ननु गवादिपदानां शक्तिर्यदि व्यक्तावपि सा ज्ञायत एव अन्यथा त्वप्रामाणि
कत्वापत्तिरित्याशंक्य शक्तिसत्वेपि तत् ज्ञानं न व्यक्तिशक्तिज्ञानत्वेन जातिविशिष्टव्यक्तिविषयशक्तिज्ञानत्वेन
हेतुः किंतु जातिविषयशक्तिज्ञानत्वेन लाघवादित्याह। जातावेवेति। जातिशक्तित्वज्ञानइति। तथा चान्वय
व्यतिरेकाभ्यां जातिशक्तिज्ञानं व्यक्तिज्ञाने प्रकारणमिति नातिप्रसंग इति भावः ननु सा शक्तिविषयत्वेन व्यक्तेर
पि शक्या त्वप्रसंगस्य न त्वाह ज्ञायमानेति। पदशक्तिज्ञाननिरूपपदार्थोपस्थितिहेतुतावच्छेदकावच्छिन्न
विषयतावच्छेदकत्वरूपतात्त्वमित्यर्थः ननु गवादिपदानां व्यक्तिशक्तौ मानाभावे न च पदोच्चारणानंतरं जाति

३ नरकोवानानानांस्य: जातिव्यक्तितत्संबंधेषु प्रयं

शक्तिः कथं न याम्नोरकात् तापः ज्ञायमानमिति

155

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
७८

प्रतीतिवस्तुतीतेरनुभवसिद्धत्वात्सेवमानीमितिप्रक्तं लक्षणायापि तदुपपत्तेः अन्यथातीरादावपि स्वरूप
सद्धुतस्यापगमापत्तिः अतएव नान्वयेपि पदस्य स्वरूपसतीशक्तिः तस्य वाक्यगम्यत्वेन पदस्य तत्रसा
मर्थ्याभावात् न च वाक्ये शक्तिरिष्टा तस्मिन् पक्षे च शक्तिविषयत्वे शक्यत्वमिति लक्षणमपि तद्विसप
रित्वाष्यत्वेनाह। अर्थे वेति। ननु शक्तिलक्षणाभ्यां जातिव्यक्त्युपस्थितौ युगपद्वृत्तिद्वयविरोधः न च
लक्षणया भयाच्छित्तिः अन्यलक्षणायाः न्यानुपस्थापकत्वात् जातेश्च शक्यत्वेन लक्षणायास्त
द्विषयत्वायोगात् इत्याशंक्याद्यांते अणजातेश्च शक्यत्वेपि व्यक्तिविशेषणत्वेन व्यक्तिलक्षणाविषय
त्वमविरुद्धमिति सदृष्टांतमाह। यथेति। लक्ष्यस्य शक्याधीननिरूपणत्वात् न निरूपणानंतरं लक्ष्या
र्थो निरूप्यत इति बन्तिज्ञानीतिस्थ्येति। लक्षणेति शक्यसंबंधो लक्षणा [illegible] तद्विषयो लक्ष्य इत्यर्थः
परयेति। शक्यपरंपरासंबंधो लक्षितलक्षणा परन्तु द्वे स्वशक्यपरंपरासंबंधिनमेवार्थं च साप्य
नीतित्वासंबंधः माहशा पदमुदाहरतीति यथेति। नन्विद्वेगौणीवृत्तावतिव्याप्तं न स्यात्पिसिंहशब्दवाच्य
सिंहत्वसमानाधिकरणक्रौर्यादि संबंधेन देवदत्तप्रत्यायकत्वादित्याशंक्य लक्ष्यत्वान्न दोषइत्या
हेगौणपीतिशक्यसंबंधिमात्रविषयावृत्तिः जहल्लक्षणासा च यथा पिंगायां घोषः चतिवस्तुतीति राम०
७८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यत्रत्रसिद्धलक्षणास्थले गंगापदेपि तथापि गंगातीरत्वस्य पूर्वमुपस्थितस्य कदाचिल्लक्ष्यतावच्छेदकत्वान्मा
त्रजहत्स्वार्थापीति यत्र लक्षणाजहत्स्वार्थैव तदुदाहरति यथा विषं भुंक्ष्वेति यद्यपि विषभक्षणे कर्त
व्यत्वान्वये योग्यपरं तु कर्तृसद्योव्यापादयतीति नान्वयानुपपत्तिस्तथापि पितुः शत्रुगृह भोजननिषे
धे तात्पर्यानुपपत्त्या वाक्यस्य तत्र लक्षणेति ध्येयं शक्यार्थमिति। शक्यार्थविशिष्टविषयत्वलक्ष
णं तेन काकेभ्यो दधि रक्ष्यतामित्यत्र नातिव्याप्तिः काकादेः शक्यार्थस्य विशेषणत्वेन नजहल्लक्ष
णायास्तद्विशिष्टविषयत्वाभावात् यत्र हीति शक्यैकदेशमात्रविषयत्वं तत्त्वं जहदजहल्लक्षणा
लक्षणमिह विवक्षितं न तु विशिष्टवाचकत्वघटितं तस्य व्यर्थत्वात् न च काकेभ्यो दधि रक्ष्यतामित्य
त्राव्याप्तिः शुनकादेरेकदेशत्वाभावादिति वाच्यं। सांप्रदायिकमतेनैतस्यानुदाहरणत्वात् येषु च म
ते तु शक्यतावच्छेदकविशेष्यकवृत्तित्वस्य तल्लक्षणत्वात् नन्वाकाशादिशब्दार्थैरभ्युपगमादेव दृष्टा
ति देः शक्यैकदेशत्वाभावादसंभव इति चेन्न आह। विशिष्टशक्तिवाचकत्वाहि मतेनेन तल्लक्षणप्रणय
नात् सिद्धान्ते च जहदजहल्लक्षणाया एवासिद्धेः लक्षणात्रैविध्यस्य च मतान्तराभिप्रायत्वात् ननु विशेष
णे परेऽपि निसोघटः इत्यादौ लक्षणा न स्यादविशेषादित्यत आह। यत्र पदार्थैकदेशस्येति। स्वानन्वयेऽपि ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषणत्वेन शक्त्युपस्थितस्य घटत्वादेरन्वितयानिराकांक्षत्वेन स्वतंत्रोपस्थितेराकांक्षोत्थापकतयान
टी० ७९ स्याएषान्वयबोधांगत्वादितिभावः। ननु विशिष्टवाचकपदस्य विशेष्यपरत्वेपि लक्षणैव तदेकदेशत्व
साम्यात्लाघवेन शक्तेरेकदेशपरत्वस्य तत्र प्रयोजकत्वात् अत एव माष्यः पदार्थः पदार्थे नान्वीति
न तु तदेकदेशेनेति। तथा च नीलो घटः सोयं देवदत्तः तत्त्वमसीत्यादावपि लक्षणासत्त्वाह। अत्र
न्वयेति। घटादिपदसाम्यमिति। न चात्रापि अनुपपत्तिः अप्रसिद्धांनाद्विशेष्यैकदेशत्वेपि शक्तैव
स्वातेऽन्येनोपस्थितेन तयान्वयबोधोपपत्तौ पुनस्तदुपस्थितये एव लक्षणाकल्पनस्याप्रामा
णिकत्वादेवेतिभावः। नहिं जहदजहल्लक्षणाया निर्विषयत्वापत्तिरित्याशंक्य विशिष्टवाचकत्वादि
५ जह मन्ते न स्वयं तद्विषयमाह। जहदजहल्लक्षणोदाहरणे त्वितिच्छविणा यांती सादिकमादिपदग्राह्य श
क्येति। शक्यतावच्छेदकेत्यर्थः। ननु काकेभ्यो दधि रक्ष्यतामित्यादौ लक्षणायाः शक्यसंबंधिमात्रविषय
यत्वं जहल्लक्षणात्वप्रसंगात्। न च शक्याशक्यविषयत्वं तदनुगतलक्ष्यतावच्छेदकस्याप्रतीतेरित्या
शंकादध्युपघातफलमेव स्वार्थत्वं च शक्याशक्य [illegible] वृत्तिल
क्ष्यतावच्छेदकमित्याह अशक्येति। एवं लक्षणां निरूपिता संप्रति तद्बीजं निरूपयति। लक्षणाबीजं त्वि राम० ७९

158

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्ति। एवकारव्यावर्त्त्यमाह। नन्विति। किमन्वयानुपपत्तिस्तद्वीजं तात्पर्यविषयान्वयानुपपत्तिर्वा। आद्ये आह का
केभ्य इति। न द्वितीयः लाघवस्यावश्यकत्वात् तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वौचित्यात्। ननु तात्पर्यविष
यान्वयानुपपत्तिः गङ्गापि गङ्गायां घोष इत्यादौ कुन्तत्वात् लक्षणाबीजं न तु तात्पर्यानुपपत्तिरित्यत आह गं
गायामिति। लक्षणा पदमात्रवृत्तिः वृत्तित्वात् किंविदिति नेयम्। यत्कात्तान्यसाह लक्षणा चेति। उक्तानुमा
ने च शक्तित्वेन सोपाधिकमिति भावः। ननु शक्तेः पदमात्रवृत्तित्वे शक्तित्वं न प्रयोजकं लाघवेन सामान्यधर्म
स्य वृत्तित्वस्यैव तत्प्रयोजकत्वान्न रत्याशंक्य चित्रगुमानय गंभीरायां नद्यां घोषः इत्यादौ गवादिपदे ल
क्षणा न चित्रादिपदस्य तन्नियामकाभावेन पदसमुदाय एव तत्र लक्षणा यास्त्वयापि स्वीकर्त्तव्यतया वे
पि शक्तित्वं न च प्रयोजकमित्याह। य[illegible]थागंभीरायामिति। शक्यसंबंधो हि लक्षणा वाक्ये च श
त्यन्ताभावेन तत्कल्पनं बाधितमिति चोदयति। नन्विति। शक्यसंबंध एव लक्षणा स्वशक्तिज्ञाप्यं चेह शक्यपदे
न विवक्षितं शक्तिज्ञाप्यस्य पदार्थज्ञानद्वारा वाक्यार्थोपि निर्वाक्येपि लक्षणा युक्तेत्याह उच्यत इति। ननु
शक्यसंबंधत्वापेक्षया स्वशक्तिज्ञाप्यसंबंधित्वं गुर्विति चेन्न वाक्यलक्षणायाः प्रमाणेन रासिद्धत्वेन
तत्साधनगुरुलक्षणे न हि विश्वरूपावैलाघवरसादावनेकपदसंदर्भात्मके पैवाक्ये विशेषपदे ला

159

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०

८०

स्मारकं विशेषणपदं द्योतकमिति नियमोऽस्ति विशेष्यपदस्य नामपि नानात्वात्तथा चार्थवादस्थले वाक्यलक्ष
णायाः कुप्तत्वेन लोकेऽपि गंभीरायां नद्यां घोष इत्यादौ वाक्य एव लक्षणेति भावः। अर्थवादैकवाक्यताप्र
सिद्धिरपि न च वाक्यलक्षणायां मानमिसाहा एवं चेति अन्यथा तत्र मते अर्थवादान्तर्गतस्य कस्यचिदेव
पदस्य प्रशस्तत्वनिन्दितत्वरूपार्थप्रत्यायकतया तस्यैव पदैकवाक्यतापत्त्यार्थवादपदसमुदायेन तत्
सिद्धिर्न स्यादिति भावः। प्रसंगाद्वाक्यैकवाक्यतां निरूपयितुं आकांक्षापूर्वमुपनिबध्नाति। यत्र
न तत्सिद्धिर्न वाक्यलक्षणाया प्रमाणं पदमात्रवृत्तिलक्षणावादिमत एवार्थवादान्तर्गतस्य पदस्य स्तुतेः
पदान्तरद्योतितनानार्थविषयप्राशस्त्यार्थप्रतिपादकतया पदैकवाक्यत्वसंभवात् अन्यथा वाक्यस्यापि
स्तुतेः पदैकवाक्यत्वे कुत्रापि वाक्यैकवाक्यता न स्यादिति साक्षिपति। कुतो नेति। नहि वाक्ययोः स्व
तोऽनेकवाक्यत्वं वाक्यैकवाक्यत्वं किंतु वाक्यार्थबोधकयोः तथा चार्थवादस्य वाक्यत्वेऽपि प्राशस्त्यरू
पार्थबोधकतया वाक्यार्थानुभावकत्वाभावान्न वाक्यैकवाक्यत्वेन साहाय्य चेत्तु। विशेष्यविशेषणमिति
न्यायेन पदार्थसमूहालंबनादेव वैशिष्ट्यावगाहि महावाक्यार्थज्ञानोपपत्तौ नमन्येनावान्तरवाक्यार्थ
बोध इति वाक्यैकवाक्यतायां लोके कश्चिद्धि चतिपयेतापीत्यतो नोक्तिः संसदि एवं वैदिकवाक्यसमुदाहरति। यथेतिपर

८०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्या

स्येरिति । प्रकृतौ तेनोत्तरदेशे पूर्णमासादीनां स्वप्रकरणस्थाङ्गैरिव नोपकारकाङ्क्षा प्रणोत्स्वनारभ्याधीताङ्गैर्विकृ
तीनां चातिदिष्टाङ्गैः परिपूरणेनान्तरमयादिभिः सहनत्वात्प्रथमं स्थवदुत्थितानाकांक्षा विरहेऽपि प्रकृतःपदा
भवतीति वटु[illegible]पितपरस्य प्रकरणकाङ्क्षासत्त्वादित्यभिप्रायः । ननु वेदेऽपि नावान्तरवाक्यार्थबोधानन्तरं म
हावाक्यार्थज्ञानं तथा सति वाक्यभेदोऽपि ज्ञेयस्यान्वयबोधस्य तेन निराकाङ्क्षत्वया महावाक्यार्थबोधानसा
दिति चेन्न अवान्तरवाक्यार्थबोधानन्तरं तदनुकूलाकाङ्क्षाभावेन वाक्यांशे अवान्तरवाक्यार्थ
ज्ञानाभावप्रसञ्जनेन तात्पर्यविषयमहावाक्यार्थबोधाभ्यां ताभ्यामेव संहताभ्यां महावाक्यार्थबोधसम्भ
वात् । अत्र च सदाचार्यसंमतिमाह नन्दुक्तमिति । न च वेदेऽपि विशेष्यावि शेषणमिति न्यायेन प्रथममन्तर
वविशिष्टवैशिष्ट्यावगाहिमहावाक्यार्थबोधोत्कलाघवादिति वाच्यं तथा सति कर्मस्वरूपज्ञानानन्तरं फ
लान्वयबोधः ततः शेषशेषीभावान्वयबोध इति तद्बोधानभ्युपगमापत्तेः उत्सर्गतन्त्राशिष्टजनविभागानुपप
त्तेश्चेति ननु उपस्थितिनिरिति नियमः किल प्रकरणान्तरस्य बोधेन पदजन्यपदार्थस्यैव निराकाङ्क्षस्येति अर्थः । ननु
स्तु पदार्थोपस्थितिनिराकाङ्क्षिः तथापि नन्तज्ञाने शाब्दबोधहेतुः मानाभावात् नापि स्वरूपसती पदार्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ + वैदिकमहावाक्यार्थस्तोमेऽवांतरवाक्यार्थज्ञानं हेतुः ॥ ...कल्पितत्वसमूहत्वं + ६

टी० नं शाब्दज्ञाने विशेषणत्वेन भासमानत्वात्तदुपस्थितेर्विशेषणज्ञानत्वेन हेतुत्वापत्तेः शाब्दज्ञानासाधारण
८१ कारणत्वाभ्युपगमभंगापत्तेरित्यत आह स्वा चेति। आसत्तिर्यद्वेतुः तेन तज्ज्ञानं तथा च पदजन्यपदार्थोप
स्थितित्वेन हेतुत्वादसाधारण्यमिति भावः न चैतेन रूपेण हेतुत्वे मानाभाव इत्याह। तेष्वेवेति न च विशे
षणज्ञानत्वेन हेतुत्वं विशिष्टधियो हेतुत्वापातात्। न चेष्टापत्तिः पावदन्वयधीनियोग्यपख्तिनाथवा
रो न्वयबोधः तदभावे नेत्यन्वयव्यतिरेकविधाप्रादिसर्थः। एवं शाब्दज्ञानकारणानि निरूप्य तद्विशेषका
रणमाह स्वमिति। न चोक्तमार्गेण नैनात्तदुपपत्तौ विरोधाभावादिति वाच्यं। वैदिकस्येत्यलौघेन महा
वाक्यार्थज्ञानस्यैवावांतरवाक्यार्थज्ञानजन्यतावच्छेदकतया कूटत्वेन लोके समूहालंबनमात्रान्म
हावाक्यार्थज्ञानस्यैवासिद्धेः स्वमर्थकदाचिद्धाकांक्षादिवशाद्वावांतरवाक्यार्थज्ञानेनचततत्त्वा
न्यदि च पदार्थसमूहालंबनादपि महावाक्यार्थज्ञानं न हा तदजन्यमहावाक्यार्थज्ञानत्वं तज्जन्यताव
च्छेदकमिति न व्यभिचार इति बोध्यं। मौनी। श्लोकादौ चणपनस्यमाप्यत्वात् न च ज्ञाप्यसंबंधत्वमेव लक्षणा
लक्षणमस्तु तस्य वाक्यलक्षणसाधारणत्वात् तत्र न लक्षणे शक्तिपदं व्यर्थमिति वाच्यं तथा स रा म०
८१

162

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निगद्योद्देश्यपदस्य लक्षणापत्तौ साधुत्वापत्तेः वृत्तिमत्त्वस्यैव शाब्दसाधुत्वप्रयोजकत्वात्। नच
वाक्यस्य वृत्तिविरहस्याभावेन कथं तत्र शक्तिज्ञाप्यसंबंधरूपा लक्षणेत्यादि निषेध्यं। शक्तस्य पदस्य
पदस्यैव समुदायरूपेण वाक्यत्वाभ्युपगमात्। पदज्ञाप्यसंबंधसत्त्वात्। किंचापभ्रंशस्य साधु न
त्वापत्तौ यज्ञे प्रयोगापत्तिः। आकरणाच्युत्पाद्यत्वस्य साधुत्वव्यवहारप्रयोजकत्वात् व्याकरणं च प्रकृतिप्र
त्ययानुव्याख्यापिका स्मृतिरिति नात्माश्रयः। ततश्चोपपन्ना वाक्ये लक्षणेति नेदं तत्त्वमभिप्रेत्याह। न
कदाचिदनुपपत्तिरिति। नच चित्रगुमानय गंभीरायां नद्यां घोषः इत्यादावपि गवादिपदस्यैव लक्ष
णा नच नियामकाभावः विशेष्यपदस्यैव नियामकत्वात् अत एवाभेदान्वयस्थले नीलो घट इत्यादौ
विशेष्यविभक्तिः साधुत्वार्था नच पदांतरैरेव स्वार्थे चित्रगोस्वामिनि गंभीरनदीतीरे दीनामन्वयद्योतक
त्वात् अत एव प्रजापतौ सादेरोपसर्गस्य प्रकृष्टजपेतान्वयद्योतकत्वं न तु शक्तिर्लक्षणा वा न तच्च वाक्ये
न लक्षयेत्सत आह। एवमिति। अर्थवादवाक्यानामिति। मौनीश्लोकादावप्युपस्थितिरिति दोषः सत्त्वेव दो
षांतरमाह अर्थज्ञानस्मरणेनेति। [illegible] न च किं तात्पर्यज्ञानप्रमारु

163

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ८२

पंश्रमरूपं वातत्त्वाद्यंगनिराकृतस्य द्वितीयं निरस्यति। विशेषदर्शनेनेति विरोधिदर्शनस्येत्यर्थः। न चेति। यद्यपि साक्षात्कृ
ताल्वादि घरकत्वाभावाभ्यासाद्यारयितृत्वमीश्वरस्य तथापि तत्तेरकृतामावमश्वारोपितत्वं। तत्र कंठताल्वादि
आपारानुकूलकृतिमत्त्वादीश्वरेपीति भावः। अश्रुत्तन्नोच्चारितपदवाक्यव्याविशाः सांख्यमीमांसकादेरपौरु
षेयत्वनिश्चयवत्तत्तान्वर्यात् शाब्दज्ञानदर्शनेन व्यभिचारान्न तात्पर्यज्ञानं हेतुरित्याह। ईश्वरेति। नहि ति
ष्ठार्थं तत्संसर्गानुभवजननत्वरूपयोग्यत्वं तात्पर्यमित्यर्थः। ननु फलोपधाने। तस्मिन्नसतिता न तात्पर्यज्ञाने सति च वा
क्यमिन् वाक्यार्थज्ञानफलमित्यस्मिनोन्याश्रया ने केवलमिदं तात्पर्यशाब्दज्ञानोपयोगि किंतु व्यवहारोपयोगि चेत्या
ह्याह इति। घटःसंसर्गपरमिति। इति व्यपदिश्यतस्तत्त्वयः। अन्यथेति। शब्दोपात्तहेतुविशेषापत्तेः। नन्विति
। श्वेतो धावतीत्यादिवाक्यमादिपदयास्ये। लक्षणपरत्वेति। लक्षणामात्रप्रतीतिच्छयोच्चरितत्वज्ञानदशायाम
श्वादिसंसर्गप्रतीतिजनकत्वलक्षणतात्पर्यप्रतीतिसंभवेन तद्वाकारश्वादिसंसर्गानुभवापत्तिः तत्सत्त्वे व्यवहा
रापत्तिरित्यर्थः। तत्प्रतीतिजनकत्वे सतित्वदन्यप्रतीतीच्छयानुच्चरितत्वं तात्पर्यं विवक्षितमित्याह तदिति। यं ३
ननु प्रथममनतम्नरेनाश्वस्य द्वितीयेन लवणस्य परामर्शे लवणपरेवाक्ये दोषतादवस्थ्यमित्याशंक्य सर्वेना
न्नाबुद्धिस्थवाचकत्वनियमे न द्वितीयपर्ते[illegible]देन प्रथमनसदात्मस्येव परामर्शः अन्यथा यस्य कस्यचित्स्मरणम् राम० ८२

स

164

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेषपदार्थान्तघटवत्तीतिच्छयोश्चरितत्वघटमानेयत्वस्यतत्त्वरत्वानापत्तेरित्याह अतएवेतिभोजनचक्रेणेच
घञन्तस्यसैंधवमानेयत्वस्यवाक्यस्य अश्वान्नलवणवत्तीतिच्छयोश्चरितत्वात्तनत्संसर्गज्ञानेनापिनदानस्तत्त्व
व्यवहाररतिभावः। अत्रनन्ववाकेसैंधवादीनामव्याप्तिमुद्धरति। अश्वादिति। तदन्तमोचेति। अत्रानुश्चरितत्वम
वत्तिसेहितत्वंतेनेनकृपशून्तपाचत्तीतिसहतिमाचिलिखितननानार्थश्लोकेनानिवसंगः। ननुतत्रत्वंवित्तिजनन
स्वरूपयोग्यतावच्छेदकंतत्सत्तीतीच्छयोश्चरितत्वमेवअन्यस्यनाहरस्याभावात्तथाचपरमेश्वरवन्हेषि
मतेवेदवाक्याह्नावव्याप्तिरित्याह। उक्तेति। नचहिशक्तिकल्पनेगौरवमितस्तत्त्राह। अस्मार्कंत्विति। नयाच
वाक्यनिष्ठवाक्यार्थज्ञानकारणतावच्छेदकंचिदवच्छेदकरसनात्वादौभिनिधकारणतावदित्सतमानेशक्ते
मानमितिभावः। नत्त न्यायमतेशक्तेरनंगीकारादसंभवः नचतन्मतेतत्सत्तीतीच्छयोश्चरितत्वादिकमवच्छे
दकमितिपुक्तंअत्रनत्तुगमादितिनेत्याहरतिनकेपिदोषरति। नचाप्यवच्छेदकत्वमनुगतमितिनोक्तदोषाव
काशः। अन्नयापदशक्त्यवगतेरितिभावः। ननुतात्पर्यज्ञानस्यहेतुत्वेः पतिष्ठांतःविवरणादौनस्यनि
एकतत्वादित्याशंक्यानिरुक्ततात्पर्यज्ञानेहेतु त्वस्यान्वयव्यतिरेकप्रमाणसिद्धत्वेनतद्वाक्यस्यामाह
शतात्पर्यनिरूपणपरतयाप्युपपत्ते।नविरोधइत्याह एवमिति। तात्पर्यज्ञानमात्रहेतुत्वनिरूपणपरत्वेवा

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ८३ धकमाह अन्यैनेति। ननु नतावदिदं तात्पर्यं व्यवहारे प्रयोगितदितरघटीतीच्छयानुच्चरितत्वस्यैव नसदघट
त्वेनिमित्तत्वेन प्रत्येयत्वेवं यथ्यात् नचेगेहे घटइति वाक्यपदसंसर्गार्थपरतावारणायतत्स्वतीतिजनकत्वप्राप्त
मितिवाच्यं घटसंसर्गपरस्यतत्स्यपदसंसर्गान्यत्रमिस्तृहेदस्यफलत्वेन ननतएवतद्वारणात्। नहि कश्चित्सद्घटसं
सर्गेच्छया गेहे घट इति प्रयुंक्ते शब्दप्रयोगस्यावाचकपदप्रयोगस्याप्रामाण्यत्वात् प्रयोगश्चापदसंसर्गस्वपर
त्वस्यपष्टत्वात् गंगादिपदवल्लक्षणायानस्यतत्तद्घटीतिस्वरूपयोग्यत्वाच्च। अतएवैनेनतात्पर्यं शाब्द
तया ६ नोपयोगि विशेष्यमात्रविषयेतस्यहेतुत्वसंभवेपि विशिष्टविषयतयातस्यगौरवात् नचैवपरीसमर्हेसेघव
मानयतिवाक्यस्याश्वसंसर्गप्रतीतिजनकत्वज्ञानेनत्वबोधापरत्वज्ञानदशायामश्वान्वयबोधासंभवात्तन्न च
नस्यतीतिजननस्वरूपयोग्यत्वमेवतात्पर्यं तदवच्छेदकं च तदन्यप्रतीतीच्छयानुच्चरितत्वं तथा च तत्तज्ज्ञानेन
वहेतुरितिवाच्यं। लाघवेन तत्प्रतीतीच्छयानुच्चरितत्वस्यैवावच्छेदकत्वौचित्यात् किंच तदन्यप्रतीतीच्छया
नुच्चरितत्वाप्रतिसंधानेपि तत्प्रतीतीच्छयोच्चरितत्वज्ञाने सति युक्तस्य वाक्यादन्वयबोधदर्शनान्नतत
त्ज्ञानमन्वयधीहेतुः नच तेन नादृशानुच्चरितत्वमनुमायततोऽन्वयमतिर्भवतीतिवाच्यं तत्राप्तिमविदुषो
पितेनान्वयबोधस्यानुभवसिद्धत्वात् नचतदपितस्यत्वयेवदूषितत्वात् एतदप्रतिसंधानेपि तदन्यप्रती रा०म० ८३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीच्छयानुच्चरितत्वज्ञानादन्वयबोधाजनकत्वान्नोक्ततात्पर्यं कारणमिति। अत्र ब्रूमः तत्तत्प्रतीतीच्छयोच्चरितत्वंत
दन्यमात्रवृत्तीतीच्छयानुच्चरितत्वं च तात्पर्यं। न च परस्परव्यभिचारान्नोभयमपि हेतुः स्यादिति वाच्यं तदन्य
मात्रवृत्तीच्छाविशेष्यकत्वज्ञानीयविशेषधिज्ञानविषयज्ञानत्वेन हेतुत्वाभ्युपगमात् नहि तत्प्रतीच्छाविशेष्यकत्व
ज्ञानेन तदन्यमात्रवृत्तीच्छाविशेष्यकत्वज्ञानमेदेति। न चोक्ततात्पर्यज्ञानं न कारणं मानाभावादिति वाच्यं
सैंधवमानयेति वाक्यस्य लवणपरत्वज्ञानदशायां सत्यामप्याकांक्षादिघटितसामग्र्यामश्वपरत्व
ज्ञानविरहेणाश्वसंसर्गज्ञानाभावात् अयमेति प्रयोगज्ञः शुक्लोप[illegible]सार्यतामिसत्रान्वयपरत्वसं
देहे तद्व्यतिरेकनिश्चये च शाब्दज्ञानप्रतिबंधात् केचित्तु तात्पर्यज्ञाननिश्चयस्य शाब्दज्ञानप्रतिबंध
कतत्संशयतद्व्यतिरेकनिश्चयनिवृत्युपक्षीणत्वान्न हेतुत्वमिति तन्न सिद्धांते प्रतिबंधकाभावस्य
हेतुत्वानभ्युपगमात् किंच यत्संशये साधिव्याप्तिबलात्तात्पर्यनिश्चयो हेतुः न तु तद्व्यतिरेकज्ञानाभावः त
स्याभावत्वेन गुरुत्वात् अन्यथा व्याप्तिनिश्चयस्यानुमितिहेतुत्वापत्तेरिति। अभेदकारणकारणत्वमाह
केचित्त्विति। अत्रेदमनभिहतबीजं तात्पर्यज्ञानजन्यतावच्छेदकं शाब्दत्वादेव शाब्दज्ञानत्वं लाघवात् ननु
तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानत्वं गौरवात् न चास्तु सपि तात्पर्यनिश्चयेन तत्संशयादिविरहेणाब्धी

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
८४

दर्शनेनव्यभिचारात्तद्धेतुत्वमितिवाच्यं उक्तलाघवेनतदेवतत्त्वकल्पनात्तदभावेशाब्दज्ञानस्यैवासिद्धेः अन्व
याव्याप्तिनिश्चयेपितत्संशयविपर्ययोत्तरानुमितोहेतुः स्यादितिमहद्गौरवमापद्येतेति। नन्वेवमपि
निरुक्ततात्पर्यज्ञानेनहेतुःतस्यवाक्यार्थगर्भत्वेनप्रथमंदुर्ग्रहत्वात्तन्नचप्रमाणान्तरेणतद्ग्रहः वैदिकवा
क्यार्थस्यापूर्वादेर्मानान्तरायोग्यत्वात् प्रमाणान्तरेणतद्ग्रहे चशब्दवैयर्थ्यादिसत्त्वाद्वाह। नन्वेवंवाक्या
र्थगर्भमपितात्पर्यंवेदलाघवात्तद्ग्रहीतेनानुमानेनतदुपजीविनावाप्रमाणान्तरेणनिश्चीयतेयथा
कपिंजलानालभेतेतिद्वित्वलाघवात्त्रित्वसंख्यापरत्वंनतुचित्वादिपरार्धसंख्यापरत्वंगौरवात्तल्लोके
तुतात्पर्यंप्रकरणादिलिंगकानुमानप्रत्यक्षादिनावाऽवधार्यतइत्यर्थः नचैवंवाक्यार्थस्याप्यवगमेना
जनितान्वयबोधत्वलक्षणाकांक्षाविरहाच्छाब्दज्ञानंनस्यादितिवाच्यं। तथापितच्छब्दजन्यवा
क्यार्थज्ञानाभावात्तस्यैवाकांक्षात्वादितिभावः। ननुशाब्दज्ञानत्वावच्छेदेनतात्पर्यज्ञानस्यहेतुत्वेलौ
किकवाक्यवत्तवेदस्यानुवादकतापत्तिः तात्पर्यग्रहेतद्घटकवाक्यार्थभानात्तथाचलौकिकंवाक्यम
नुवादकंनवैदिकमितिराद्धान्तोभज्येतेत्याशंक्यकिमवश्यापेक्षणीयनिरपेक्षप्रमाणजनितसमानवि
षयावगतविशिष्टार्थबोधकत्वमनुवादकत्वंवेदस्यापद्येतत्वाच्च तदुपजीविप्रमाणजन्यसमानप्रकारवि राम०
८४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेष्यकत्वमिति विषययोग्यार्थबोधकत्वं वा नाद्यः प्राभाकरसंमतस्यास्माभिः लोकेऽप्यनंगीकारादि
स्मभिप्रेतसिद्धितीयं दूषयति न द्वेति। न योग्यमेधभरसर्थः। अपूर्वे तनयेति स्वानुपजीविप्रमाणाजन्यसमा
नप्रकारविशेष्यकत्वमिति विषयत्वायोग्यतयेसर्थः। तथा च तात्पर्य[redacted]केणवेदिकानीमानि ह३
पदैर्नित्यस्वर्गकामनिपात्रकयागविषयकनियोगपराणि स्वर्गेऽपि स्वर्गकामनियोजकं यागवि
षयं कार्य[redacted]मिति स्वर्गमात्रं वेदस्यानुवादकत्वमिति भावः। नन्वाकांक्षादिसहकारिवशाच्छब्द
स्य प्रत्यक्षप्रामाण्यं तथापि न वेदान्तानां ब्रह्मणि प्रामाण्यं नेषां सिद्धार्थबोधकत्वात् कार्यान्विते
एव संगतिग्रहणेन सर्वेषामेव सर्वत्र प्रामाण्यावधारणात् तथा हि प्रयोज्यवृद्धेः इति गामानयेत्यु
क्तिवाक्यश्रवणसमनंतरभाविप्रयोज्यसमवेतगवानयनचेष्टामुपलभमानो बालस्तयातत्कारणं
गवानयनगोचरप्रवृत्तिमनुमाय तद्हेतुमितत्वकार्ये संसृष्टपदार्थज्ञाने वाक्यस्य सामर्थ्यमन्वयव्यतिरे
काभ्यां भवतिपद्यते अत्र स्वर्गं पश्य गां बधान अश्वमानयेत्यादिप्रयोगान्तरे आवापोद्वापाभ्यां गवि
गोपदस्य सामर्थ्यं गृह्णन् कार्यान्वित एव गृह्णाति। अन्यथा प्रथमावगते कार्यान्विते व्युत्पत्तिबाधापत्तेः। न
च सिद्धार्थेऽपि प्रथमं व्युत्पत्तिग्रहः। हानोपादानक्रियानन्विताभूतषितत्त्वात् वक्तृविवक्षाभावेन शब्दस्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
८५
कृष्ण

वत्त्वाप्रयोगात् प्रयोगे वा ऽनभिहितक्रियापदत्वात्तस्मान्न बालोऽनुमापयेत् लिंगाचेष्टादेरभावात्तस्मात्कार्या
न्वितार्थेष्वेव पदानां शक्तिः ननु अत्र सिद्धार्थे नेन प्रामाण्यमिति तेदनत्रिएकरोति। तद्वेति। इदमेकं तत्का त्रा
र्यान्वितप्रथमं वाक्यसामर्थ्यग्रहेऽपि न तद्भेदे धातुत्वेव पदस्य व्युत्पत्तिगौरवात् अन्यथा प्रामाण्यान्तर
प्राप्यत्वस्यावश्यंभावात् तद्धि शिष्टस्य वाच्यत्वप्रसंगः किंच कार्यान्वितत्वमिति शब्दितत्वं वानवाच्यं वा
वच्छेदकं कार्यस्य न त्वाद्यः चकोलिंगादिलभ्यत्वात् न्यायस्य चवाकारादेवलाभात्। अनन्यलभ्यश शब्दार्थ इति
न्यायात्। अन्यथाऽन्वयविशेषोऽपि वाच्यः स्यादिति वाक्यस्यानुवादकत्वापत्तिः किंच कार्यस्य कार्य
त्वाभावान्न कार्यान्वयोऽवच्छेदकः। यत्तु केवलार्थे पदशक्तिग्रहे वाक्यस्य प्रथमग्रहो नाशक्तिः का
र्यान्विते बाध्येते ति तन्न दृष्टत्वात्। उक्तं तु जानत्वं साहचर्यान्वितार्थेऽपि प्रथमं व्युत्पत्तिग्रहात्त्वमे च
न व्युत्पत्तिग्रहाभावः हर्षादेस्तल्लिंगत्वात्। न च सुखदुःखसत्त्वादिनापि तदुपपत्तिः प्रत्यपादिकितप
टघटदर्शनवत्तादरस्वपसंवदत्वचकस्य याचकस्याभावात् ततश्च परिशेषात्तज्जन्मसिद्धौ न त्व परत्वा
त्वव्यग्रहः ननु अदृष्टा चेष्टस्नेऽसत्ते श्वरणाकितवासनः वाक्ताहारेण भानस्य परिशेषविनि रामः
क्ति निरिति। अन्वएवेति। यतएव सिद्धार्थे वाक्यानां प्रामाण्यमिसर्थः। ननुनत्यापि वेहात्तानां। ८५

170

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मणि न प्रामाण्यं तेषां प्रतिपत्तिविधिपरत्वेन तत्सत्वाभावात् सत्संज्ञानमित्येवमादीनां च विध्य
पेक्षितविषयसमर्थकत्वात् न यथा च वाचं धेनुमुपासीतेतिवत्तेहि विषय ब्रह्मणो वेदांता इति न चाह
। यथा चेति नतु वेदांतिमते वेदमात्रस्य पुरुषाधीनोत्पत्तिकत्वात् पौरुषेयत्वसंभवात्। किंच
दृष्टांताभावान्न प्रामाण्यमित्याशंक्य स्वयंप्रकाणतेरण वेदांतानां प्रामाण्यं साधयितुं प्रथमं पराभि
मतं तत्स्वीकारमनूद्य दूषयति नित्यत्वेत्यादिना। वेदांतग्रहणं वेदमात्रोपलक्षणं नित्येति त्वतेत्वे
निशेषः सर्वज्ञेश्वर प्रणीतत्वस्य वेदांतिभिरभ्युपगमो हि सर्वथैव वेदस्य पुरुषाधीनोत्पत्तिक
त्वे प्रदेशादप्रामाण्यं स्यादित्यत उक्तं सर्वज्ञेति। यदि मन्वादयोपि सर्वज्ञास्तदा तत्प्रणीतत्वेनैव
प्रामाण्योपपत्तौ न परमेश्वरापेक्षा इत्यत उक्तं नित्येति। तेषामनित्यत्वेन नानात्वात् क्लोरेवेणनत
त्प्रणीतत्वमिति भावः। भ्रमप्रमादविप्रलिप्साकरणापाटवादिदोषाभाव एव प्रामाण्ये हेतुः न च
हेतुमाह। नित्यत्वेनेति। किं वर्णानित्यत्वे वेदस्य निर्दोषत्वे हेतुरुतानुपूर्वीविशिष्टवेदनित्यत्वं वा ना
द्यः लौकिकवाक्यस्यापि निर्दोषत्वापत्तेः न द्वितीयः वर्णानामनित्यत्वेन तत्समूहात्मकपद
स्य तत्समुदायस्य च वाक्यस्यापि नित्यतया तत्संदोहात्मकवेदस्य सुतरामनित्यत्वादित्यभिप्रेत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ + वेदस्य क्षणमात्रतयाऽवस्थायित्वेन तदुत्पत्तेर्लौकिकसिद्धत्वात्तत्रापि सर्वेश्वराधीनोत्पत्तिपरता + २

वेद नित्यत्वे हेत्वन्तरमाह । अस्माकं त्विति । अस्मदाद्यनुमानिज्ञनिरस्तिसादिरूपनिरादिपदयासा । नान्व
टी० यं अनित्यं वेदास्तिन्नि परोपुरुषत्वेन सर्वेश्वरस्यापि वेदेसादिकत्वानुमानात्तस्मात्स्वतन्त्रपुरुषाधीनोत्प
९६ त्तिपरेव श्रुतिः । महत्सदस्य स्वतन्त्रवाचित्वादिनाशपदेनैव पापिकस्याशंकां निराकरोति नित्यापीति । अनेक
वर्णसमुदायगर्भस्य वेदस्य स्वरूपतः क्षणिकत्वं वर्णक्षणिकत्वाद्धातत्रार्धं दूषयति । यदेवेति । परम
तेउत्पत्तौ निरुक्तानामिसर्थः । शब्दस्य नाशकत्वाभिमतशब्दान्तरादीनामन्तरसंभवेऽपि बहुकालस्य
स्थायित्वाभ्युपगमेऽकदापिनाशोनस्यादिसतस्राह । प्रलयेति । नयाच प्रलयकाल एव नाशक
इति भावः नन्वेवं वेदस्य वर्णानां च न विपदादिषु दृष्टान्तमत्वेऽदसमीगकारउत्पन्न इदानीं विनष्ट
इति प्रतीतिविरोधात् गच्च प्रत्यभिज्ञा योसादृश्यविनाशभेदप्रतीतिबाधः बहुप्रतीतिबाधकल्पनेऽपी
एवेणासज्जेदंकुलस्या थ इति न्यायेन प्रत्यभिज्ञाया बाधस्यैवोचितत्वात्तत नयुवेदस्य वर्णादीनां
उ च मध्ये [illegible] न्नादृविनाशाविसाशेक्याह । नत्विति । सजातीयानन्ते वहुकल्पनायोगे एवं बाधेन्तया
चोसादृविनाशभेदप्रतीतीनां उक्तगौरवपराहत यामा पनन्द इत्वेवो बाधवत्त्वव प्रयोजक
मितिभावः । शब्दस्य स्थायित्वबाधकमाशंक्यानिराकरोति सत्त्वस्थारयोति । ननु न्यायमते उत्पादा राम० ९६

द्विघतीनयः प्रसमिद्धापि सा पंगकारशतेन कृत्वावच्छिन्नभेदविषयागम्यमाने तिघटितं परंपरासंबंधविष
यत्वेन प्रमाणानवमतेन तासामप्रामाण्यं स्यादित्यत आह। वर्णाभिव्यंजकेति। शब्दो न नष्टोऽतो घटउ
सच्चरतिशनैर्निवर्ततिभावः। उपसंहरति तस्मादिति। ननु वेदानस्थाणिकः नापि वियदादिवदुत्पाद
विनाशशीलः। किं तु नित्य एवेत्युक्ततिश्रुतिः आभिव्यक्तिपरा। अन्यथा परमेश्वरकर्तृत्वेन सापेक्षत्वप
स्यापत्तेः अपसिद्धान्तः इति जैमिनीयः शंकते नन्विति। अस्य सहतरत्वादिकृतिर्वेदो सन्निवैरेवंतस
रत्वे बाधकाभावात् यद्वृत्तस्य पौरुषेयत्वबाधकं तद्वाविकल्प्य दूषयति नन्विति हीनासाहिना। मौनिश्लो
को वेपौरुषेयः स्यादिति दोषस्तस्य दोषात्तरमाहात्म्य दर्शनेति। सजातीयेति। अन्तरुस्वासजा
तीयमन्वमो निश्लोकः आदिः कस्यापि कदाचित् केनचिदुच्चारितत्वात्। अन्यथा तस्याप्यलीक
त्वापत्तिः उच्चारणपदस्य अनुसंधानपरत्वान्नेद्यमाभटेदरक्षणिकेन तथापि स्वतंत्र
पुरुषप्रणीतत्वं सर्वेश्वरप्रणीतत्वात वेदभिन्नत्वे तुल्यं तथा चैवं अन्यथा परमेश्वरस्यमाणवक्
वदुच्चारणसापेक्षत्वेन तस्यास्मदादितुल्यत्वापत्तौ सर्वज्ञत्व सर्वशक्तिताभ्युपगमभंगप्रसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
८७

गतत्वञ्च पौरुषेयो वेद इत्यत्राह। तथा चेति। सर्गाद्यकाले सर्वेश्वरः पूर्वसर्गसिद्धयमानुपूर्वीं वेदस्येति वी०
ज्ञात्वा तत्समानपूर्विकं वेदं रचयामीति संकल्प्य तादृशं वेदं माचख्यौ न तु तद्भिन्नजातीयानुपूर्विकं ज्ञात्वा
सर्गाद्यसमये वेदस्य पूर्वसिद्धवेदजातीयत्वात्तादृशवेदाध्ययनस्यैवाभ्युदयःनिःश्रेयसहेतुत्वात्
अन्यथा वाग्वज्जत्वया अनर्थहेतुत्वापत्तेः तथा चेश्वरः सर्वशक्तिरपि पूर्वसर्गसिद्धानुपूर्वीसमानानु
पूर्वीकं वेदं रचयन् स्वतंत्रः इति न वेदस्य पौरुषेयत्वमिति भावः। अनेनैतदपौरुषेयव्यवहारस्य प्रयोजकं
भारतरामायणादावव्याप्तेः तस्यापि शब्दजातीयोच्चारणसापेक्षत्वात् न वानुपूर्वीसाजात्यं संनत्वे न
त्तिवा अन्यथापि पद्यमानभारतादावव्याप्तिरित्याशंका स्वानासमानुपूर्वीकं च विवक्षितं तत्सिद्धांते च पद्य
मानमाद्यभारतयोर्भेदाभावान्नाव्याप्तिरित्यभिप्रेत्य साह भारतादीनामिति॥ ॥ ॥ ॥ इति वेदान्तपरि
भाषायामागमपरिच्छेदः॥ ॥ ॥ संगतिं दर्शयन् शिष्यावधानाय प्रतिजानीते इदानीमिति।
या तदेवेति। अर्थापत्तेर्निरूपणीयामित्यर्थः॥ ॥ उपपाद्येति। उपपाद्यज्ञानत्वेन तज्ज्ञानस्य ज्ञानमर्थोप
ति त्तिरित्यर्थः तत्र तद्व्यवहारो यौ हो मातिव्याप्तिः। नैवं व्यतिरेकानुमितावतिव्याप्तिः तस्याः प्रयोगेण निरस्त
त्वात् तदंगीकारे चार्थव्यतिरेकसहचारजन्यप्रमायामव्याप्तिज्ञानस्यैव तत्रेह तु नयानदभावव्यापकाभावव् ए१४०
चै२ रे२
८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

174

नियोगित्वविषयकोपपाद्यज्ञानस्याहेतुत्वान्नातिव्याप्तिः अस्तु वा व्यतिरेकसहचारज्ञानं व्यतिरेकव्याप्तिग्रहा
त्तादृनुमितिः तथापि तस्य व्यभिचारज्ञानविरोधिज्ञानविषयज्ञानतया हेतुत्वेन तदभावव्यापकाभावप्रतियो
गित्वज्ञानत्वेनाहेतुत्वान्नातिप्रसंग इति दिक् ननु उपपाद्यज्ञानत्वेन तज्जन्यज्ञानत्वफलत्वमन्तर्भाव्योपपत्तिल
क्षणं तत्करणत्वं चार्थापत्तिप्रमाणलक्षणं तत्करणं च नातः करणं न चानन्तर्भाव्य किंत्वनुमितौ व्याप्तिज्ञानमेव मि
न तत्करणत्वापत्तेरिति न विनाऽदृष्टमनुपपन्नमित्युपपाद्यज्ञानमेवेत्याह। तन्नेति। ननु उपपादकज्ञानेनप
त्वेनस्य प्रयोगे व्यसिद्धत्वात् हि सा शंका सामान्यतः सिद्धावपि विशेषस्योपरागे उभयोरुपपाद्याधिकरणवृत्तिवि
शेषरहिततया तदसिद्धत्वादेव फलत्वमित्याह। उपपादकेति। ननु व्याप्यत्वमुपपाद्यत्वं व्यापकत्वमुपपादकत्वं न हि
पीनत्वस्य रात्रिभोजनव्याप्यत्वं किन्तु तद्व्यापकत्वमित्याशंक्य तदभावव्यापकाभावप्रतियोगित्वमुपपाद्यत्वं तदभावव्याप्या
भावप्रतियोगित्वमुपपादकमित्याह। येनेति। नन्वर्थकल्पनाकारणत्वं चेदर्थापत्तिलक्षणं तर्हि न देवार्थो
पत्तिपदप्रवृत्तिनिमित्तं यथा चैत्यादेः शिवव्यवहारानन्तरस्य तत्क्षणप्रयोजनत्वात् तथा वरात्रिभोजनादिक
ल्पनायास्तद्व्यवहारे न स्यादिति साक्षात्फलकरणयोर्ज्ञानपदप्रयोगवन्न विरोध इत्याह। रात्रिभोजने चे नि
यद्यप्यनयाप्यत्वं वहत्वार्थापत्तिशून्यार्थापत्तिनिरूपणस्वरूपं च मिथ्यात्वादिसिद्धिः प्रयोजनमिति स

175

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ८८

चयन उदाहरति दृष्टार्थापत्तिरिति स्वमतेन श्रुतार्थापत्तिमुदाहृत्य जैमिनीयस्यापि संमतां तामुदाहरति। यथा वेति। य
त्र वाक्यैकदेशेनेति। यार्थापत्तिरन्वयाभिधायिनोपयोगिकस्य नानुकूला साभिधानानुपपत्तिरित्यर्थः। अन्यथा
य या क्षेत्रमर्थाध्याहारमतेऽध्यास्यापत्तेरिति बोध्यं पदाध्याहारमतेनाह। यथेति। कलाचिंतामणिसाहय
थावा विश्वजितेति। सः स्वर्गः सर्वान्प्रत्यविशिष्टत्वादित्यत्र सूत्रे चतुर्थाध्याये स्वर्गपदाध्याहारस्य साधितत्वा
दिति भावः। अन्वयाभिधानानुपपत्तेरस्य चाभावमुत्पत्तिमभिप्रेत्य शंकते। नन्विति। कल्प्यादृष्टं वै मतेनाभि
हितानुपपत्तिमुदाहरति यथा स्वर्गकाम इति नैयायिकमतेन निराकरोति न चेति किमर्थापत्तेरन्वयिन्यन्तर्भावः
उत व्यतिरेकिणि त चाद्यं निराकुरुते द्वितीयं निरस्यति व्यतिरेकिण्येवेति। नन्वर्थापत्तिस्थले लाघवेन कूलत्वप्रमा
णाभावस्यानुमानस्यैव करणत्वं न त्वर्थापत्तेर्गौरवादित्यत आह अन्तरेणैवेति। न च यद्यनुमिनोमीत्यनुव्यवसाया
भावात्तत्र नानुमानं करणं तर्हि न हि लक्षणानुव्यवसायाभावान्नार्थापत्तिरपि प्रमाणं स्यादिति चोदयति। किं त्वि
ति। न तु किं तेन च विनाऽनुपपन्नत्वं न तावत्तदभावव्यापकाभावप्रतियोगित्वं तद्धि न तदभावव्याप्याभावप्रतियो
गित्वं तदभावव्याप्याभावप्रतियोगित्वं वा व्याप्याभावप्रतियोगित्वं वा नोभयमपीति शंकते। नन्विति व्यापकत्व
प्रयुक्तत्वमिह विवक्षितमित्याह। तदभावेति। यद्वा तेन विनाऽनुपपन्नत्वं हि न तदभावव्यापकाभावप्रतियोगित्वं राम० ८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्रमानिरुक्तेः। तथा च व्यतिरेकव्याप्तिज्ञानं न तावदावश्यकं व्यभिचारज्ञानविरोधिज्ञानत्वेनानुमिति[redacted]
हेतुत्वमाच कॢप्तमिति अनुमितिमेव जनयेन्न विलक्षणानुमितिमर्थापत्तिमित्याशयेनाक्षिपति नन्विति। नन्वव्य
तिरेकव्याप्तिज्ञानेनेति क्रमः। किंत्वनेनेदं कल्पयामीति विलक्षणानुव्यवसायबलादर्थापत्तिविषयात्
त्वमानमिति भेदस्य समाधत्ते न तदभावेनेति। मानान्तरत्वेति। यथा च व्यतिरेकिमानान्तरमर्थापत्तिः पृथक्प्रमा
णं न त्वात्मकमनुमानं परिच्छेदे नन्विति पृथिव्यादावितरभेदसिद्धेरसाधीनसाव्यतिरेकिमानान्तरमीसाशंक्यार्था
पत्तेरेवपीनत्वादिस्थले कॢप्तप्रमाणभावस्तथा सर्वत्रैनैयायिकाभिमतव्यतिरेकिस्थलेऽस्तु प्रमाणमित्याह। पृ
थिवीति। नन्वनुव्यवसायबलादस्त्वनुपपत्तिज्ञानं करणमत्र तु न तथेत्याह। अन्नरवेति। यतः स्व
त्रानुपपत्तिज्ञानेनत्वेन कारणमित्यर्थः॥ ॥ ॥ ॥ वेदान्तपरिभाषायां अर्थापत्तिपरिच्छेदः॥
॥ ज्ञानाकरणकाभावानुभवकरणत्वमनुपलब्धिप्रमाणलक्षणं तत्करणत्वं च व्यापारभावादसाधारणकारण
त्वं विवक्षितमित्याह। ज्ञानकरणेति। भावा[redacted]नुभवकारणे चक्षुरादावतिव्याप्तिवारणायाभावपदेन नु
ज्ञानकरणजन्येति विशेषणम्। अभावानुमितिस्थलेऽप्यनुपलब्धेरेवाभावग्रहसंभवाज्ज्ञानघेवनकेवलानुपलब्धेरेव
प्रमाणत्वेन योग्यत्वविशेषणवैयर्थ्यादित्याशंक्य निराकरोतीति नचेति। नन्वनुपलब्धेर्योग्यत्वं नवन्तस्य योग्यत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथमतेत्तस्याप्रत्यक्षत्वायोग्यत्वात् न च योग्यानुपलब्धियोग्यत्वमात्माद्यपादित्यत आह अनुपलब्धेरिति। न
टी० न्वन्यप्रतियोग्युपलब्धिप्रसंजनादन्याभावप्रत्ययापत्तिः यत्र च न तत्प्रसंजनं तत्र नाभावग्रहः स्यादित्याशंक्य
८९ यत्तु प्रतियोगिसत्त्वप्रसंजनप्रयुक्तप्रसंजनयोग्यप्रतियोगित्वं यस्यानुपलंभस्य सोऽनुपलंभस्तदभावप्रति गि
योग्य इति तेन सत्त्वप्रसक्त्वे नास्याभाव इत्याह यथेत्यादि। नन्वंधकारवर्तिभूतले घटोपलब्धिप्रसंजनाभा
वेऽपि न योग्यत्वानपायात्तथापि तदभावज्ञानं अनुपलब्धेः योग्यत्वं विवक्षितमिति नातिप्रसंगः। यद्वा यो
ग्येऽधिकरणे प्रतियोग्यनुपलब्धेर्योग्यानुपलब्धिः न योग्यत्वं च प्रतियोगिसत्त्वप्रसंजनप्रयोज्यप्रतियो
रुपलब्धिप्रसंजनविषयत्वं योग्यत्वं योग्यतावच्छेदकं च अधिकरणस्य तादृशप्रतियोग्युपलंभकसमवधा
नं ते नांधकारे घटाभावस्यात्मनिष्ठधर्माभावस्य नानुपलब्ध इति भावः पूर्वोक्तदोषं निरस्यति। अत एवेति। इं
न्द्रियसन्निकर्षानंतरं भूतलादावभावज्ञानमिति निर्विवादं न चक्षुः प्रमाणाभावमिंद्रियमेव करणं न तु क
ल्प्यानुमितिर्गौरवादिति षष्ठप्रमाणप्रद्वेषी नैय्यायिकः प्रत्यवतिष्ठते। नन्विति विपरीतं गौरवमित्याह तत्प्र
तियोग्यानुपलब्धेरिति। सन्निकर्षाभावेनेति। न चेंद्रियस्याभावेन संबंधः संयुक्तविशेषणतासंबंधः तस्या रा०म०
नभ्युपगमात्प्रमाणाभावात्सर्वः। नन्विंद्रियस्यान्वयव्यतिरेकाभ्यामभावग्रहे हेतुत्वकॢप्तौ तदनुरोधात्सवि ८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

+तु भवतु तत्र प्रत्यक्षस्यापि ज्ञानस्य परोक्षप्रमाणजन्यत्वं प्रकृते ऽभावप्रतीतेरिंद्रियजन्य +
+त्वं किं न स्यादिसा + ९०

कर्षेऽपि कल्प्यतऽस्यादाशंक्याह इंद्रियेति। प्रमाणचैतन्याभेदेऽपि हि ज्ञानस्य विषयांशे न तन्मते प्रत्यक्षत्वं तथा च चक्षुः
सन्निकर्षद्वारांतःकरणस्य निर्गतत्वे न वृत्तिविषययोः पाथोरेकदेशस्थतयावच्छिन्नचैतन्यस्य विषयावच्छिन्न
चैतन्याभिन्नत्वेऽपि भेदत्वेन भासमानत्वे ज्ञानस्य भासमानत्वांशे प्रत्यक्षत्ववदभावांशेऽपि प्रत्यक्षत्वं स्यात् तत्र कथ
मनुपलब्धेर्विजातीयप्रमाकरणत्वमिति चोदयति नन्विति। यद्यपि अभावावच्छिन्नचैतन्यस्य विषयचैत
न्याभेदेऽप्यभावस्य प्रत्यक्षत्वयोग्यत्वाभावाच्छुद्धजन्यत्वनिषेधमादिज्ञानवच्च प्रत्यक्षत्वं प्रत्यक्षलक्षणयो
ग्यत्वस्यापि विषयविशेषणत्वेनोक्तत्वात्तथापि अभ्युपेत्याह। सत्यमिति। अनुपलब्धेर्न प्रत्यक्षज्ञान
करणं प्रत्यक्षप्रमाणाभिन्नत्वादित्याशंकेयमभिप्रेता अभावज्ञानं प्रत्यक्षप्रमाणजन्यं प्रत्यक्षज्ञानत्वादिति
वानघः तत्र प्रसीसादिवाक्ये व्यभिचारादित्यभिप्रेत्य सिद्धांती परिहरति। अभावप्रतीतेरिति। नहीति। प्रत्य
क्षज्ञाने प्रत्यक्षप्रमाणजन्यमिति न नियमः तत्त्वमस्यादिवाक्यजन्यज्ञाने व्यभिचारादिति भावः। ननु औ
पनिषदे ब्रह्मणि प्रमाणांतरप्रवृत्तेर्निमीलितनयनस्य चेदं शमत्वमसीतिज्ञानेऽपि कपाटवातबाधकं स्या
रयति। तथा चेति। अनीर्वचनीयेति। यद्यप्यभावस्येंद्रियवेद्यत्वादिमते तत्र तन्मभावज्ञानस्य प्रत्यक्षत्वादि
दृदूषणं समानमेव तत्रापि न्यायमते सर्वचारोपस्थलेऽन्यथाख्यात्यभ्युपगमान्न दोष इति भावः। अत एवान्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याख्यातिमत्वेनापरिहरति। नघटवतीति। आरोप्यसन्निकर्षस्थले इति। आरोप्याद्यभावस्थले इत्यर्थः। प्रत्यक्षस्य

टी० त्वेऽन्यथाख्यातिमभ्युपगमे यद्यपि सिद्धं तदति ब्रूयात्तदापि क्षतिरमाह अत्रत्वेवेति। अनिर्वचनीयत्वमिति। इदं चा

९० भावज्ञानस्य प्रत्यक्षज्ञानमभ्युपेत्योक्तं वस्तुतस्तु अनुपलब्ध्यभावस्य प्रत्यक्षयोग्यत्वाभावान्नाभावज्ञानस्य

प्रत्यक्षत्वमित्युक्तं तथा चानुमित्यादिस्थले स्वाश्रयप्रतियोगिनीति तदभावज्ञानस्यान्यथाख्यातित्वान्नानिर्व म ४

चनीयत्वमिति बोध्यं किमभावस्य सर्वाकारेण मायासाजात्यमापाद्यते जात्या समाचेवा तत्त्वाद्यं निषत्स्यहि

तीयं निरस्यति। यत्किंचिदिति विजातीयापि मायाद्युपादानस्यात्तर्हि ब्रह्मणा किमपराद्धमिति साशंकं निराकरो

ति। नचेति। ननु ब्रह्मणो विभ्रमाधिष्ठानत्वमेव सकलकार्योपादानमिति सिद्धं तेन विरुद्धेन साशंकस्य तत्

स्यपरिणाम्युपादानपरत्वान्न विरोध इत्याह तथा चेति। प्रागभावत्वं लक्षयति। तन्मते निंदाद्वावितः। अत्र त्वसम

वायिकारणमात्रवृत्तित्वे सति प्रतियोगिजनकाभावत्वं प्रागभावत्वमिति न भ्रमितव्यं तथा सति स सत्व

वेद्यप्यपिचेः। चैवेतावन्मात्रमेव लक्षणं निंदाद्वाविति साहित्यावच्छिन्नियताधिकरणपरमिति वाच्यं। प्रागभा

वस्य कालेपि चेत्तस्य प्रगमाज्जनकत्वस्य प्रागभावगर्भत्वेनात्माश्रयात्। तस्मात् प्रतियोगिजनकाभावत्वं प्राग राम०

भावत्वं किंतु कार्यसमवायिकारणमात्रवृत्तित्वे सति कार्योत्पत्तिपूर्वकालीनाभावत्वं। ध्वंसेऽतिव्याप्तिवारणा ९०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यकार्योत्पत्तिपूर्वकालीनेति। असंताभावाद्देतद्वारणाय सत्त्वं असंभवनिरासाय कालीनेति। अयंभावः
कार्योत्पत्तेः पूर्वं तत्कारणत्वेनावश्यमभ्युपेयः अनयोरसत्वेनंतरं ध्वंसः घटोत्पत्तिप्रसंगात् नचोत्पन्नो घटः
प्रतिबंधकः तस्य तत्कारणत्वे एव विस्त्रमादिति। तत्र मानांतरमाह। सर्वेति। नचासंताभावेन भविष्यती
तिप्रतीतेरन्यथासिद्धिः विचित्रप्रतीतीर्विचित्रविषयत्वावश्यंभावादितिभावः। ध्वंसं निरूपयति। जन्येति
ति। मृत्पिंडादावित्यर्थः। तथा च कार्यसमवायीकालोऽसत्त्वप्रतियोगिजनको योऽभावः स प्रध्वंसः स न्या
च घटो विनष्ट इत्यादिप्रतीतिविषय इति भावः। प्रध्वंसाभावोऽनंत इति नायमतेनिरस्यति। ध्वंसस्यापीति।
ननु नाशकस्याभावात् ध्वंसोऽविनाशीसत्यत आह। स्वाधिकरणेति। घटोत्पत्त्येति। प्रागभावध्वंसाना
धारकालस्य प्रतियोगिकालत्वनियमादितिभावः। कालस्य ध्वंसानाधारकत्वमसिद्धमित्याह। घटध्वं
४ ट सध्वंसस्येति। यथाहि घटोत्पत्तेः पूर्वं घटो भविष्यतीति ध्वंसो भविष्यतीति प्रतीतिर्लाघवादेकैव प्रागव
स्य घटध्वंसप्रतियोगित्वं तद्वत् ध्वंसध्वंसकाले घटो विनष्ट इति प्रतीतिर्लाघवात् तस्यैव घटप्रतियोगि
त्वमितिभावः। ननु ध्वंसस्य प्रतियोगिजन्यत्वनियमात् अजनको घटो न प्रतियोगी सत्यत आह। अस
र्येति। तथा च प्रागभावस्य घटनाशप्रसजननत्वेपि घटध्वंसकाले प्रागभावो नष्ट इत्यनुभवाल्लाघवात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
६१

घटध्वंसस्य प्रागभावप्रतियोगित्वमिति तदावक्तेऽपि तुल्यमिति भावः॥ निःसाधिकरणवृत्तिध्वंसस्य विनाशका
भावादनंतत्वसिद्धेस्तत्सामान्यादितरेऽपि ध्वंसस्तथेति आशंकां निराकरोति। न चैवमिति। किमाकाशादिनि ना
साधिकरणत्वेन विवक्षितमुत ब्रह्मतत्त्वाद्यं निराकुर्वद्द्वितीयं दूषयति। यदि चेति। असिद्धिः ध्वंससाधिकर
णत्वासिद्धिः ब्रह्मारोपितनाशरूपमारोपाधिष्ठानत्वादिदमवच्छिन्नचैतन्यवदित्यत्र दृष्टांतासिद्धिमाशं
क्याह। एवमिति। अतिरिक्तकल्पने गौरवात् प्रामाणिकत्वाद्भेदघटितेश्वराहोः [illegible]शिर इति वक्तुमुप
त्तेनाविरुध्यंते ध्वंसा इति भावः। असंताभावं लक्षयति। यत्रेति। त्रैकालिकाभावनिःसंदिग्धमुदाहर
ति। यथेति। मायमत्तीन एकेणेति अयमेवेति। भेदं विभजते अयं चेति। अनादिभेदस्य ब्रह्मनिवर्त्य
त्वेन स्यादित्याशंक्याविद्यावन्न विरोध इत्याह। द्विविधोऽपीति कल्पितेति द्वैतांगीकारश्चात्र द्वैतविरोध इत्यत्राभि
प्रेत्य संमतिमाह। तदुक्तमिति। ननु नृसिंहाश्रमश्रीचरणैः प्रागभावस्य निराकृतत्वात्तदंगीकरणे सिद्धांतवि
रुद्धमित्याशंक्य तदंगीकार एव सिद्धांताविरोधी विवरणादौ तदभ्युपगमादित्याह। अत एवेति। न च परमते ने
न हितिवाच्यं स्वमते बाधकाभावादुक्तप्रमाणसिद्धत्वाच्चेति भावः। तत्रानुपलब्धिर्मानांतरमिति। अत्रे
दमालोचनीयं किमनुपलब्धेरभावप्रमायां करणत्वमुपपत्सामानांतरत्वमाश्रीयते अनुभवबलाद्वा रा०न०
६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

182

घः कॢप्तप्रमाणाभावेऽस्येंद्रियस्यैव तत्करणत्वस्य संभवान्नेंद्रियाभावयोः संबंधानिरूपणे संयुक्तसंबंध
स्यैव सत्त्वात् न चाप्रमाणाभावः। भूतले घटाभाव इत्याधाराधेयभावसंबंधप्रतीतेः घटाभावज्ञान
संबंधविषयकं विशिष्टज्ञानत्वाद्दंडी पुरुष इति ज्ञानवत् इत्यनुमानात्। अन्यथाऽभावस्य निराकरण
त्वापत्तेः ध्वंसस्य स्वाधिकरणकपालनाशे नेत्यादि वर्णानमधिकरणस्य सादित्वे इत्यादिना भेदे द्वैविध्यनि
रूपणे च विरुद्धेन समवसंबंधस्वरूपसंबंधोऽनावेत्सम्बंदे तत् न च द्वितीयः निर्घटं भूतलं पश्यामीति विप
रीतानुभवप्रसंगात्। अन्यथा पर्वते पश्यामि वह्निमनुमिनोमीति वह्न्यभावयोर्विलक्षणानुभवस्यापा
पत्तिः किं च प्रत्यक्षप्रमायां प्रत्यक्षप्रमाणं करणं इत्युत्सर्गः स च ब लवता बाधकेनापोद्यते भूतले न्या
भावज्ञानं प्रत्यक्षत्वमेवेत्युभयसिद्धं तत्र च प्रत्यक्षप्रमाणमिंद्रियमेव तत्करणबाधकाभावात् इंद्रियाभा
वयोः संबंधस्य च साधितत्वात्तेनान्यकथमनुपलब्धिर्मानांतरं तस्मादत्र समाधानेऽविंत्यं। प्रसंगादाह
। एवमिति। प्रमाणानामिति प्रमाकरणानामित्यर्थः। ननु यथार्थज्ञानं गतं प्रमाणत्वं तत्सर्वैर्व्यवहृतं उत्पद्यते ज्ञा
यते वा न तदभाववति तत्प्रकारकत्वाभावस्याविशेषात् स प्रकारत्वादेः प्रामाण्यस्य तद्योगादिति अत
आह तथाहीति। अत्र मेऽस्ति प्रसंगवारणाय तद्वतीति तद्वद्विशेष्यकत्वे सतीत्यर्थः। इच्छादीनां प्रामाण्यं न स्वतोऽप्या

183

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ९२

र्थमित्यत उक्तं ज्ञानत्वमिति। नन्विदं प्रामाण्यं स्वनिष्ठाधारणमिति तत्र प्रामाण्यव्यवहारप्रसंगस्ताशंकाव्यस्त
नुक्तत्वस्यैव प्रामाण्यस्याप्यविचारितत्वात्स्वनिसाधारणस्य चताहृशत्वेन लक्ष्यत्वान्न दोषइत्याह। संवादीति
। ननु प्रामाण्यनिश्चयस्य कथं प्रवृत्तिहेतुत्वं प्रमाणाभावादिति चेन्न निष्कंपप्रवृत्तिः प्रामाण्यनिश्चयसाध्या
न्वयव्यतिरेकज्ञानत्वावच्छिन्नप्रतिबाध्यत्वात्सामान्यव्याप्तौ व्याप्तिनिश्चयसाध्यानुमितिवदिति अनुमानस्य
सत्तेच प्रमाणत्वान्न चाप्रामाण्यशंकानिवृत्तेरेव प्रवृत्तिहेतुः तत्र चान्यथासिद्धिः प्रामाण्यनिश्चयस्य निवार्च्य
लाघवेनभावस्य प्रामाण्यनिश्चयस्यैव हेतुत्वौचित्यात् नचस्वतः सिद्ध एवायं चाप्रामाण्यशंकाविरह इत्यत्र
व्यभिचारस्य निवार्यं। दोषाभावस्तर्हि न तन्नेत्याह कस्यामप्यां प्रामाण्यनिश्चयावश्यंभावात्। अन्यथा दोषस
तिश्च प्रामाण्यस्यैव ग्रहाप्रतीतिविरहस्तउपपत्तेरिति। ननु प्रामाण्यस्य स्वेसायत्तस्तप्रत्तौ स्वतस्त्वं अन्ताद्य
यात् न चज्ञानसामग्रीमात्रजन्यत्वं तद्धि प्रामाण्यस्योपाधित्वेनाजन्यत्वादित्यत आह। नुद्धेति। प्रामाण्यं पर
तउत्पन्ने परतस्त्वं च उत्पत्तौ ज्ञानजनकसामग्र्यातिरिक्तकारणजन्यत्वमिति नैयायिकाः तत्पक्षे त्वान्त्रसा
हत्वमिति। प्रमाणाभावादिति भावः। अनुगतगुणासंभवादपितदनपेक्ष्याह। प्रमामात्र इति। भूयोवयवेन्द्रियसं
न्निकर्षसल्लिंगकरणपरामर्शयोग्यतादीनां व्यभिचारात्प्रमात्वावच्छेदेन हेतुत्वायोगादिति भावः। नन्वत्र असत्त्वप्रमा

ए.म० ९२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रात्वादिकमेव तज्ज्ञप्तावच्छेदकमिति नव्यभिचारस्याशंकाहनापीति न थापि भ्रमामात्रस्यानुमतगुणासं
भवन्तिदोषस्येवहेषांतरमाह। रूपादीति नन्वयं रजते कोषेबहिरिन्द्रियसत्त्वभ्रमायामेव गुणाइतिनरू
पादिवसत्वभ्रमायामात्मवसक्षेचव्यभिचारिदोषइत्यपरितोषादुहसतपीति। तथा चान्वयव्यभिचा
रइतिभावः। अस्तुर्हिलिंगेति तस्यपि सल्लिंगपरामर्शे गंधप्रागभावावच्छेदेन गन्धाज्ञमितेर्भ्रमात्वाच्चस्यपिवो
ध्यं दोषाभावस्येति। तर्हि सत्यत्व निरूपमात्वमात्राभावेगुणात्वेन हेतुत्वमानाभावाच्चेतिभावः। प्रामाण्य
स्यदोषाभावप्रयोज्यत्वेज्ञान सामान्यातिरिक्तप्रयोज्यत्वेन प्रामाण्येवदुत्ततो परतस्त्वस्यादिसाशंकानिरा
करोति। नैवमिति। ज्ञानसामान्यप्रयोजकासत्त्वेमापत्तावद्दृष्टादिसापेक्षत्वास्यतःत्वस्यादिसतउक्तमा
गंतुकेति ज्ञानत्वाप्रयोजकेस्थैः। दोषाभावमागंतुकमादायपतद्वारणायभावेनितथा चागंतुकभावका
रणसहकृतज्ञानत्वप्रयोजकप्रयोज्यत्वउक्तौ परतस्त्वस्वतस्त्वंतुनाहशकारणनपेक्ष्यज्ञान
सामान्यप्रयोजकप्रयोज्यत्वमितिभावः। प्रामाण्यमिति। तद्वति तत्त्वप्रकारकज्ञानत्वमित्यर्थः। दोषाभा
रा वसतिअत्र तत्त्वकारिभूतप्रकारकत्वेनतद्विशेष्यभूतविशेष्यकत्वेनचत्वाश्रयग्राहकत्वे[redacted]
[redacted]हीकारोदिसतउक्तं यावदिति। स्वाश्रयग्राहकविशेषणानादृश सामग्रीग्राह्यत्वं तज्ज्ञप्त्यग्रहविषय
२+ स्वाश्रयग्राहकपदेनविवक्षितं तेन ज्ञानपदादिनातद्ग्राह्यस्य दोषः पर[illegible]तस्त्व

185

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
६३

त्वेन यथा चयचदोषवशात् प्रामाण्यनिश्चयः न तु संशयो वा न तथा तादृशस्यापि सामग्र्याः प्रामाण्यग्रहाद्धावरस्तत
उक्तं दोषाभावरहितेन यथा चदोषासहकृतेन तादृशयावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम् प्रामाण्यस्य स्वतस्त्वं
न त्वेवं तदुक्तं ग्रन्थमवर्णकेनृसिंहाश्रमश्रीचरणैः । दोषासहकृतज्ञानसामग्रीमात्रग्राह्यत्वं स्वतस्त्वं प्रामा
ण्यस्य स्वतस्त्वं नौयायिकत्वमुपपादयन्ति । स्वाश्रयपदनि । संशयस्थलीयेऽपि सामग्रीदोषासहकृतेति मन्वानो
न्यापि कश्चिद्दूषयन्ति । न चैवमिति । यद्वा सामग्र्यां दोषासहकृतत्वविशेषणमजानन्तः शेषकते नन्वेवमिति
परिहरन्ति । तेन तत्स्वतस्त्वमिति प्रामाण्यस्येति शेषः । यद्यपि नेदं स्वतस्त्वं प्रयोजकं संशयस्थलस्थत्वात् तथाव स्वं
स्थायस्थलेऽपि प्रामाण्यानुमितिहेतुव्याप्तिज्ञानलिंगपरामर्शाभाववशेन प्रामाण्यस्याग्रहेऽपि तद्योग्यता
याः स्वाश्रयेऽपि सत्त्वात् तथापि द्वैतोके एवमेतत्पोसस्तिनैयोक्तप्रामाण्यस्य परतस्त्वमुपपादयन्ति । अप्रा
माण्यमिति । अप्रामाण्यस्वतोग्राह्यत्वपरतोग्राह्यत्वाभावे सति ग्राह्यत्वात् ज्ञानवदिति शंकते किं त्विति
इदं रजतमिति ज्ञानमप्रमाणं विसंवादिप्रवृत्तिजनकत्वादित्यनुमानग्राह्यत्वादेस्सिद्धिरित्याह । विसंवादि
ति ॥ ॥ ॥ वेदान्तपरिभाषायां अनुपलब्धिपरिच्छेदः ॥ ॥ प्रमाणनामिति प्रमाकरणानां तत्त्व
रणत्वलक्षणं प्रामाण्यमित्येवमपीत्यर्थः । वेदान्तानां पारमार्थिकवस्तुगोचरप्रमाकरणत्वे हेतुमाह त ए प्र०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विषयस्येति। तयोर्द्वयोर्विषयनिरूपणमेव क्रियतामित्याशंक्य तन्निरूपणस्य तत्त्वंपदार्थनिरूपणाधीनत्वा
त्तत्त्वंतत्सत्यार्थादिनिरूपणमेवोचितमित्याह तत्त्वंपदार्थेति। प्रथममिति। न च त्वंपदार्थनिरूपणमेवप्राक्
भावी स्यादविशेषादिति वाच्यं तत्त्वंपदार्थेषु प्रथमं तत्पदार्थस्योपात्तत्वात्त्वंपदार्थस्य कथंचित्लोका
वगतत्वेन तदपेक्षणाभावात्तं तदुक्तं यत्नया च प्रथमं शिष्यजिज्ञासितत्वादिति भावः। लक्षणमिति। अस
धारणधर्मः इत्यर्थः। वस्तुप्रतिपत्तौ स्वरूपलक्षणस्य प्रमाणत्वात्तटस्थलक्षणोपन्यासो विलक्षणमिव
मेतल्लक्षयति। तटस्थेति। इतरनिरूप्यं यल्लक्षणं तत्स्वरूपलक्षणमित्यर्थः। यद्यपि प्रकृष्टप्रकाशश्चन्द्र इ
ति लोकेऽपि स्वरूपलक्षणं प्रसिद्धं तथापि वैदिकस्य ब्रह्मलक्षणस्यैव प्रकृतत्वात्तदुदाहरति। यथेति।
ज्ञानानन्दादिपदग्राह्यो। तथा च सत्यं ज्ञानमानन्दं ब्रह्मेत्यादिकं। ब्रह्मस्वरूपलक्षणं न तु सर्वज्ञत्वादि
कं तस्य प्रपंचोपाधिकत्वेनेतरनिरूप्यत्वादिति भावः। नन्विदं ब्रह्मस्वरूपमिति कथमवगम्यत इत्यत
स्त्वाह। तस्मिन्निति। जन्मस्थितिभंगं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेष इ
ति वदता भगवता भाष्यकारेण सर्वज्ञत्वादेरेव ब्रह्मलक्षणस्य स्वरूपलक्षणत्वेनोक्तत्वात्तद्विरोध इति चेन्न स
सर्वावभासनयोग्यविज्ञानाभिप्रायत्वात्। तदुक्तं विवरणाचार्यैः। अनेन सर्वज्ञशब्देन सर्वावभासनवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
९४
ज्ञप्तिमात्रं विषयस्य तदिति केचित्तु सच्चिदानंदात्मकमेव ब्रह्मणः स्वरूपलक्षणं न सत्त्वादि प्रत्येकं लक्षणं न
घ्याहि। न तावत्सत्त्वं लक्षणं तस्य घटादिसाधारणत्वात्। न च सत्यत्वे सति ज्ञानत्वं तस्य ज्ञानेपि परैरंगीकारा
त्। नापि ज्ञानानंदत्वं सत्त्वरहितस्य ज्ञानानंदात्मकस्य शून्यवादिभिरंगीकारात्। तस्मात्सच्चिदानंदात्म
कमेव स्वरूपलक्षणमिति। न च सिद्धांते घटादेः पारमार्थिकसत्ताभावेनोक्तदोषासंस्पर्शात् सिद्धांते नैव
न लक्षणं घटाद्यनात्मस्य पराभिमतजगत्कारणस्य सच्चिदानंदात्मकत्वाभावेन तत्राव्याप्तिप्रसं
गात्। तत्रापि सत्त्वादि प्रत्येकमेव स्वरूपलक्षणमिति। स्वरूपं न लक्षणं धर्मत्वाभावादित्याक्षिपति। न
न्विति परिहरति तत्स्वरूपेवेति। लक्षणलक्षणे पारमार्थिकधर्मत्वस्याप्रयोजकत्वादिति भा
वः। अत्र पंचपादिकाचार्यसंमतिमाह तदुक्तमिति। स्वरूपलक्षणेति। व्यावृत्तिकारणं यया वदिति। लक्ष्या
वृत्तिनाह शंधर्मेण तद्वारणाय यावत्तेषु पदं परमतेनाह। चलयरति। उभयमतेनाह। उत्पत्तिकालेति
ब्रह्मणस्तटस्थलक्षणमाह। यतो नेति। ननु ब्रह्मणो जगच्छब्दांतःपाती मायादिकारणत्वाभावादसं
भवः। जगच्छब्देन कार्यपरमेशे कुलालादेरपि परिकिंचित्कार्यकारणत्वेनातिव्याप्तिरित्यत आह। अत्रेति
कार्यजातमिति सर्वकार्यमित्यर्थः। ननु यावत्कार्यजन्मकारणत्वेन ब्रह्मलक्षणं तस्य प्रधानमायापरमाणुजीव
राम०
९४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यसाधारणत्वादित्याशंक्याह। कारणत्वं चेति। कर्तृत्वमिति। अदृष्टद्वारकत्वादुपादानगोचरापरोक्ष
ज्ञानचिकीर्षाकृतिमत्त्वमित्यर्थः। तेनाचेतनानां प्रधानमायादीनां निरास इति भावः। ननु जगत्कारण
स्य तावदुपादानगोचरापरोक्षज्ञानवत्त्वमप्युक्तं नानुमानं प्रमाणं तर्काप्रतिष्ठानात् न च स ईक्षांचक्रे र
सादिश्रुतिः तस्याः सर्वगोचरेक्षणेऽप्रमाणत्वादित्याशंक्याह। ईश्वरस्येति। यः सर्वज्ञः सामान्याका
रेण सर्ववित् विशेषतः यस्य भगवतो ज्ञानमयं तपः उपाधिकमीक्षणमिति यावत् तस्मादीक्षणसह
कृतात्कारणाद्ब्रह्मणः एतत्कार्यं ब्रह्म हिरण्यगर्भः नाम घट इत्यादि रूपं शुक्लादि तदपि व्याकृतं न त्व
व्याकृतं तत्तपसा चीयते ब्रह्म ततोऽन्नमभिजायते अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतमिति
पूर्ववाक्ये अपरवेदनीयाव्याकृतनामरूपस्येश्वराभिधानात् अन्नं व्रीहियवादि वायुः कालकालो
त्पत्तीः सर्वविषयत्वादिश्रुतिरित्यादिपदव्याख्या। तादृशेति। तावदुपादानगोचरेत्यर्थः। एवमग्रेऽपि ज्ञाने
च्छाप्रयत्नेष्वपि। सकलकार्योपादानगोचरापरोक्षज्ञानाश्रयत्वं तादृशचिकीर्षाश्रयत्वं तादृशकृसा
प्रयत्नं चेति लक्षणत्रये विवक्षितमित्यर्थः। तादृशज्ञानेच्छाकृत्याश्रयत्वस्य ब्रह्मलक्षणत्वे गौर
२ स्थि वमित्याह। अन्यथेति। नहि [blot]निमंगगर्भमपि एकं लक्षणं नस्यादित्याशंकां [blot]दोषापसारीहरति मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

189

टी० ९५

सिद्धा

।न्त एवेति । यथेति विशेषणात्तादृशेत्यर्थः । ननु [द्वि]तीये साक्षिगर्भस्यापि न सकललक्षणत्वं तद्धि सत्तानुकूलज्ञानत्वस्यै
व लक्षणत्वेन शेषवैयर्थ्यादित्याशंक्य जन्मगर्भलक्षणावच्छिन्नगर्भलयगर्भ च लक्षणत्रितयमेव
विवक्षितं तथा च ब्रह्मणस्तटस्थलक्षणानि नव संपद्यन्त इत्याह । एवं चेति । ननु ब्रह्मणो जगज्जन्मक
र्तृत्वं न लक्षणं तद्धि सकलकार्योपादानविषयापरोक्षत्वं च सकलकार्यानुकूलत्वविशेषितम् । तादृश
ज्ञानवत्त्वं वा ॥ नाद्यः कार्यानुकूलत्वादृशज्ञानवत्त्वस्यैव कर्तृत्वव्यवहारप्रयोजकत्वे सति तस्य कर्तृ
त्वाप्रयोजकत्वात् । न द्वितीयः । सिद्धं तेन तादृशज्ञानस्य वृत्तिविशेषरूपतया तस्यापि कार्यत्वेन सकल
कार्यानुकूलत्वाभावात् । नहि तदेव तत्प्रतिकारणं तथा च नवलक्षणानीत्यसंगतमित्यपरितोषा
दाह । ब्रह्मण इति । तथा च मायाभिन्नत्वे सति जगज्जन्महेतुत्वं स्थितिहेतुत्वं तद्धि लयहेतुत्वमिति ल
क्षणत्रयमेव विवक्षितं । यद्वा ब्रह्मण एव जगतो स्थितिलयोपमा ... जगदुपादानत्वं लक्ष्यते तदु
क्तं भामत्यां । त्रिभिरस्योपादानत्वं लक्ष्यत इति । तथा च सर्वकार्योपादानत्वं ब्रह्मणस्तटस्थलक्षणं । उपा
दानत्वं चाकारणवस्फुटमिति न मायायामतिव्याप्तिरिति भावः । ननु जगदुपादानत्वं न लक्षणं तद्धि स
कलकार्याध्यासाधिष्ठानत्वं तथा सकलकार्यावस्थानं ब्रह्मणोऽन्यत्रे[त्य]हितीयब्रह्मासिद्धिप्रसंगादित्यप राम० ९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रितो षाद्दाहायेद्रुति। न मुक्तवच्छिन्नेचेतनेऽनियानिवारणायनिखिलेति असंभववारणाय जगत्सदं ब्रह्मयाति
रिक्तपरं। नतु समवायिकारणत्वमुपादानत्वं समवायानभ्युपगमात् नापि तदाकारेण परिणममानत्वमा
या यामनित्यान्ते: ब्रह्मणोपरिणामित्वेनासंभवात् चेत्साह। उपादानत्वं चेति। तदध्यासाधिष्ठानत्वं तदुपाद
नत्वं। जगत्सदं तु कल्पिताभिप्रायमिति। बोध्यं [redacted] जगत्कारणेति जगत्सदेना च कार्यज्ञानं विव
क्षितं निखिलपदं चाशेषजनीयं तथाच बौद्धविशिष्टश्चैतन्ये नानीतिव्याप्तिर्नेवाऽसंभवः। यद्यपि मायाधिष्ठा
नत्वं नाचेमेव ब्रह्मणो लक्षणमस्तु तस्य मायिनं तु महेश्वरमित्यादाविश्वप्रसाधारणधर्मत्वावगमात्
तथापि तेन रूपेण ब्रह्मप्रतिपत्तौ तदन्याधिष्ठानमन्यदिति संभावनायामधिकरणेन तरवमितस्य जगतोने
हनानास्तीत्यादिना ब्रह्मणि निषेधावगमेपि चलरपतीतघटवन्मिथ्यात्वानापत्तौ स्वरूपेण ब्रह्मणासिद्धि वस्तंग
त। न च विशिष्टलक्षणेपि जगत्परिणामित्वस्य मायायामेवावगमादुक्तदोषतादवस्थ्यं ब्रह्मगतमायापरिण
मस्य जगतः ब्रह्मगतत्वसंभवात्। अत एव मुक्तवच्छिन्नेचेतन्ये निष्ठाज्ञानपरिणामरूपमपिरजतं न
रिव अंते मेवेति राद्धांतः। न[illegible]तु ब्रह्मणे नन नि[illegible]ल प्रपंचाध्यासाधिष्ठानत्वं न च प्रमाणाभावात्। न च सर्वोत्तपनो
वेत्यादि कृतिर्मानमिति वाच्यं तस्याः सकलभक्तोपादानत्वे प्रमाणत्वेपि ब्रह्मणो निखिलप्रपंचाध्यासाधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
९६

ध्यानत्वेन प्रमाणाभावादित्यत आह। एतादृशमेवेति। इदं सर्वमिति बृहदारण्यके श्रूयते। इदं ब्रह्मेदं क्षत्रमिमे लो
का इमानि भूतानीदं सर्वं यदयमात्मेति। अस्या अर्थः यदिदं ब्रह्मादिभूतपर्यन्तमिदं ब्रह्मेत्यादि दृश्यवाक्यो
पात्तं तत्सर्वमयमात्मेति। अत्र च पञ्चस्थाने सप्तम्यन्तनिर्दिष्टं ब्रह्मसत्तातिरिक्तसत्ताकप्रपञ्चनिषेधोऽभिप्रेतः
। न चैतावता ब्रह्मण एव प्रपञ्चत्वं प्रपञ्चस्य नास्तित्वमिति वाच्यं। न सत्तातिरिक्तसत्ताकत्वस्यैव तदभावत्व
रूपत्वात् अन्यानिरुक्तेः न चापूर्वैव घटमिति घटनिमित्ततया ब्रह्मण एवेदं वक्तव्यमिति तदाधारतया आदित्यो
रूपदर्शिवत्सदृशतया सामानाधिकरण्योपपत्तिरिति वाच्यं। तेनैव एतज्ज्ञानस्यात्मनि खल्वरे दृष्टे श्रुते
मतिविज्ञातेनेदं सर्वं विज्ञातमित्यात्मविज्ञानेन सर्वविज्ञानस्य निमित्तादिप्रश्नबाधापातादिति भावः। तथा
सत्त्वसत्त्वाभवदिति तादात्म्यव्यपदेशोऽपि प्रपञ्चस्य ब्रह्मण्यध्यासे प्रमाणमित्याह। सत्त्वेति। पृथिव्यादि
स्थूलभूतत्रयमपरोक्षत्वात्सत् वाय्वाकाशौ परोक्षत्वादसत् तदिदं सर्वं यदयमात्मेत्यत्र दृष्टं वा
क्योक्तानां ब्रह्मक्षत्रलोकदेवसूक्ष्मस्थूलभूतानां सत्त्वसच्चत्वस्थूलभूतानां ब्रह्मण्यध्यासे सिद्धे व्य
वाकृतनामरूपयोर्नोध्यस्तत्वसिद्धिरित्यत आह। बहु स्यामिति। सर्वविकारकारणब्रह्मनिष्ठेक्षणस्य
सर्वविकारविषयत्वावश्यंभावेन सर्वकार्यपरत्वे बाधकाभावेन च तदीक्षणबहुस्यां प्रजायेयेत्यत्र बहुशब्द एम०
९६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यसर्वकार्यपरत्वात्सर्वाध्यासप्रसिद्धिरिति भावः। नन्वेवमपि कार्यप्रपंचस्य न ब्रह्मणः पृथक्त्वं तत्त्वमुक्तं वाचा
नां ब्रह्मणि विकाराध्यास एव प्रमाणत्वादित्यपरितोषादाह। इत्यादिश्रुतिभिरिति। एकमेवाद्वितीयं नेह ना
नास्ति किंचन यत्र त्वस्य सर्वमात्मैवाभूत् मायामात्रमिदं द्वैतमद्वैतं परमार्थत इति इत्यादिश्रुतयस्त्व
दि पदग्राह्याः लौकिकानां व्यवहारेऽपि ब्रह्मणि प्रपंचाध्यासमानमिति स्वाह घटः सन्निति। नन्विष्ट
विषयत्वमिष्टत्वेन त्वघटस्य स्वाभाविकं तत्तज्ज्ञानादेव तद्व्यवहारः नन्वानंदात्मब्रह्मणि काध्यासात्स्वन्यथा
दुःखे तदानंदात्मकब्रह्माभेदव्यवहारान्दुःखस्यापीष्टतापत्तिरिति चोदयति नन्विति। दुःखे ब्रह्मणः तस
चि स्मिन्साध्यासे त्वानंदत्वाध्यासाभावान्नेष्टत्वव्यवहारः। न ब्रह्मगतसद्भाविताध्यासेऽपि स्वानंदत्वाध्यासा
भावान्नेष्टव्यवहारः। न ह्यानंदगतं किंचिद्दुःखे आध्यासिकं न तु न सर्वधर्माध्यास इति नियमोऽस्ति तज्जनकहेयस्य
कार्यमन्तिमपत्वादित्याह। नारोपणमिति। ननु घटादावपि इष्टत्वादेर्नाध्यासो युक्तः न त्वप्रतीयमानसर्वधर्मस्य ब्र
ह्मगतत्वेन तद्दीयस्वाभाविकधर्माभावात् सर्वत्रांशांतर एवं सेवांशांतराध्यासस्य इष्टत्वादित्याशंक्य प्रपंचस्या
स्तित्वव्यावहारिकमेव तदुपमित्याह जगतीति। उक्तेऽर्थे श्रुतिः अभियुक्तसंमतिमाह। न तु तु मिति। ननु परमेश्वरः कर्म
रिव सापेक्षः सन्निखिलकार्यकरोतिनिरपेक्षो वा नाद्यः कर्मणो जगत्कारणत्वे प्रमाणाभावात् अन्यथा कर्मणैव स

193

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा

टी० धुक्तत्वोरीश्वरे वैषम्यनैर्घृण्ये न स्तः । विषमसृष्टिं निर्मिमाणस्य प्राकृतजनवद्रागद्वेषापत्तेरित्यत आह सापेक्षत्वादिति । अ

९० यं भावः परमेश्वरः कर्मसहकृत एव जगत्सृष्टिहेतुः न चात्र प्रमाणाभावः सृष्टेरेवात्र प्रमाणत्वात् अन्यथा

विचित्रकार्यानुपपत्तेः तस्या विचित्रकारणजन्यत्वनियमात् पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्या

दिश्रुतिश्च अत एव न विषमसृष्टावीश्वरस्य रागद्वेषापत्तिः व्रीहियवादिसृष्टौ पर्जन्यवज्जगत्सृष्टावी

श्वरः साधारणं कारणं तत्तद्बीजानीव व्रीहियवादिवैषम्ये कांश्चिद्दुःखभाजः करोतीति विषमसृष्टौ

जीवगतकर्माण्यसाधारणकारणमिति । ननु गौणादिमहाकार्ये नानाकारत्वदर्शनात्कथमसहायस्येश्वरस्य

विचित्रप्रपंचकर्तृत्वमित्यत आह अपरिमितेति । नन्वावश्यकत्वान्मायैव कर्मसहकृता हि परिणामिनी

एव जगताकारेण परिणमतां किमीश्वरेणेत्यत आह । नामरूपेति [illegible] तत्र एव गताका [illegible] दिरूपत्वनिवारणेनाम रूपा

र्थाभावादेकस्यैवावयवस्य व्यापारद्वयासंभवान्नेत्यतोऽस्ते नैतत्प्राकाशाद्युत्पत्तिरिति च अत एवावकाशप्रदानाभावा

त्वेति भावः । महाभूतानि पंचैव भूतपोषिमहत्तमः । तन्मात्राणि चत्वारि तन्मात्राणि मेयावग

त्राणि तेः भूतानि पंचतन्मात्राणि पंच महाभूतानीति महोपनिषद्यपि तथैवावगमात् कथं तन्मात्रेति केन पंचीकृतानाम

भ्युपगमस्त्यत आह । तन्मात्रेति । यद्यपि तन्मात्रचतुष्टयोपलम्भस्तेन तथापि तत्कार्ये गुणदर्शनेन तत्कारणेऽपि कार

९०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदं शोधपत्रं सप्तनवतितमे सांकपृष्ठे अष्टमपंक्त्यामिति बोध्यं ॥

+ यथा हि कुलालो बुद्ध्याकारवाहिरव्य नामरूपे तथैव संकल्प्य घट इति ना
म्ना रूपेण कंबुग्रीवादिना घटमुत्पादयति। तथेश्वरोऽप्युत्पत्तेः पूर्वं
यस्य कार्यस्य यन्नामयत्र्यास्य रूपं मनसा संकल्पयति तथैव तदुत्पादयि
ष्यामीति संकल्पयति तथैव करोतीत्यर्थः॥ तत्र प्रमाणमाह॥ तदिति॥
तन्मनोऽकुरुतेत्यादि श्रुतिराद्यपदव्याख्यातं तदिति ईक्षणसंकल्पमप
लानंतरमित्यर्थः॥ आकाशादीति॥ प्रथममाकाशमुत्पादनंतरं वायुस्त
तस्तेजस्ततो जलं ततः पृथिवीत्येवं क्रमेण भवंति पंचभूतानि अपंची
कृतान्युत्पद्यंत इत्यर्थः। ननु छांदोग्ये तेजआ। दिकास्त्वथिश्रूयते त
त्तेजोऽसृजतेति प्रश्नोपनिषदि प्राणादिकास्सृष्टिः प्राणमसृजतेति ऐत
रेयेत्वेक एव सदिमान् लोकानसृजतांभोमरीचिर्मरमाप इति तथा
च स्पष्टः कथमाकाशादित्वमिति चेन्न तावदाकाशादित्वे प्रमाणाभा
वस्तैत्तिरीयके तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशा

195

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी.

९७ द्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवीति स्पष्टेराकाशादित्यस्याव
गमान्नच स्कृत्यं तत्र विरोधइ हेतरीये त्रिगुणोपसंहारन्यायेना
त्रस्कृतानां क्रमस्यावरुपं कल्पनीयत्वान्नापिछांदोग्यश्रुतिविरो
धः। तस्मात्तेजो जनिप्रधानत्वेन स्कृत्यं ४ इदं शोधपत्रं सप्त
नवतितमे सांकपत्रेऽष्टमपंक्त्यामि तिबोध्यं ॥ श्रीराम

९७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गात्वेन गुणानुमानादित्यभिप्रे(त)त्यत्रासाधारणगुणानाह। तत्रेति। शब्दस्पर्शाविति। यद्यपि स्पर्शः साधा
रणगुणः तथापि पृथिवीवायवीययोरनुष्णाशीतत्वेन तैजसाप्ययोरुष्णशीतत्वं एवं रसेपि वेद्यासमञ्ज
भवसिद्धमस्तीत्यसाधारण्यं बोध्यं। तन्मात्रिकमतं निराकरोति। नत्विति। वाय्वादाविति चसक्षस्य चास
वित्यर्थः। तथा च तन्मात्रेषु तदनुमानमिति भावः। बाधकाभावादिति। इदमापाततः जलादावपि गंधो
पलंभात् पार्थिवो पृथिवीमात्रगुणो न स्यात्। न चायमौपाधिकः। नयतोपाध्यनुविधानाभावा
त्. तदंतर्वर्तिपार्थिवभागसंबंधात्तदुपलंभ इति चेद्वायावपि तर्हि व्यापकाकाशसंबंधाच्छब्दाप
त्त्वाद्ध्वनिरिति तुल्यं वक्तुं तत्त्व शब्दस्पर्शरूपरसगंधाश्चैते पृथिवीगुणाः तेषु गंधहीनाश्चत्वारोपां गु
णास्तेषु गंधरसहीनास्त्रयो गुणाः स्वेनः। शब्दस्पर्शाविति द्वौ वायोः शब्द एकश्चाकाशस्येति
लौकिकोपनिषद्वचनं शब्दस्य वाय्वादिगुणत्वमानमिति बोध्यं भूतानां त्रिगुणत्वमानमिति।
। त्रिगुणमायेतिमायायाः सत्त्वरजस्तमोगुणात्मकत्वे अजामेकां लोहितेत्यादिश्रुतिर्मानमिति सत्त्वमध
स्तादू नानां सर्वदा गुणत्रयोपि तत्त्वेपि कार्यविशेषजनने कस्यचिद्गुणस्याविर्भाव इत्यभिप्रेत्या
ह। ए नैरिति। तत्त्वं गुणापन्नैरपंचीकृतैराकाशादिभिरित्यर्थः। मन इति। एकस्याप्यंतःकरण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० स्यवन्तिचातुर्विध्याच्चातुर्विध्यं तदुक्तं भागवते मनोबुद्धिरहंकारश्चित्तमित्यन्तरात्मकं चतुर्धा लक्ष्यते निजे
९८ होरस्तालक्षणरूपेणेति। अत्र मनआदीनां गलान्तर्वर्तनत्वे दर्शनाभयः स्थानानि मनसः स्थानं न
लान्तरं बुद्धेर्वदनं अहंकारस्य हृदयं चित्तस्य नाभिरिति शारीरकोपनिषदि श्रवणादिति ध्येयं।
श्रोत्रादीनामिति। न चात्र प्रमाणाभावः अचेतनानीन्द्रियाणि चेतनाधिष्ठितानि स्वार्थं जनयं
ति अचेतनकारणत्वात् हृदि सज्जमानस्य तत्प्रमानत्वान्न च जीवेन सिद्धसाधनं। अनपेक्षित
दुर्गं धज्ञानस्योपेक्षितत्वेन तेनास्य दर्शनात्। दिग्गादिदेवतानां च ज्ञाति कर्मवशेनात्रापि प्रेरणा
संभवात्। तथा च श्रोत्रं एकरोचं दिशः सादिभागवतवचनं न च प्रमाणं वक्तात्तक्त चक्षुः श्रोत्र घ्राण रस
नत्वमिंद्रियाणां क्रमेणादित्यादिक दृष्टि पृथ्वीवरुणवायवोऽधिष्ठात्र्यो देवताः सुबालोपनिषदि ध्यान
दिस्यानि मानयंते रस्तपचं चक्षुरध्यात्मं द्रष्टव्यमधिभूतमादित्यस्तत्राधिदैवतं श्रोत्रमध्यात्मं
श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतमित्यारभ्य नादित्यवोध्यं। चंद्रश्चेनेति चंद्रत्वेन शंकरः विष्णुः
क्रमेण मनआदीनामधिष्ठातृदेवताः मनोऽध्यात्मं मंतव्यमधिभूतं चंद्रमास्तत्राधिदैवतमिति
सुबालोपनिषदि बुद्धिरध्यात्मं बोद्धव्यमधिभूतं ब्रह्मा तत्राधिदैवतं जिह्वाध्यात्मं अहंकर्तव्यमधि रामः०
९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतं रुद्रस्तत्राधिदैवतं चित्तमध्यात्मं चेतयितव्यमधिभूतं क्षेत्रज्ञस्तत्राधिदैवतं मिसादिाव क्लीं इति वाग
ध्यात्मं वक्तव्यमधिभूतं अग्निस्तत्राधिदैवतं हस्तावध्यात्मं आदातव्यमधिभूतं इन्द्रस्तत्राधिदैवतं पादाव
ध्यात्मं गंतव्यमधिभूतं विष्णुस्तत्राधिदैवतं पायुरध्यात्मं विसर्जयितव्यमधिभूतं मृत्युस्तत्राधिदैवतं उप
स्थ आध्यात्मं आनंदयितव्यमधिभूतं प्रजापतिस्तत्राधिदैवतमिति नेत्रश्रवणादीनि भावः । प्राणल
क्षणमाह । तेषां ति ऊर्ध्वगतिमत्त्वं प्राणस्य लक्षणं । न चोदानं ऽतिव्याप्तिः तस्योत्क्रान्तिकाले ऊर्ध्वगति
मत्त्वेपि सर्वदा तदभावात् । तस्यैव प्राणलक्षणत्वेन विवक्षितत्वात् । न च प्राणस्योर्ध्वगतिमत्त्वे प्रमाणाभा
व इति वाच्यं । अथ यो यमूर्ध्व उत्क्रामति एष वाव स प्राणः इति मैत्र्युपनिषदि तथैव प्राणस्याभिहितत्वा
दिति भावः तस्याधाराधिष्ठानं नासिके इत्याह । नासिकेति । वायुः प्राणो भूत्वा नासिके प्रविशती त्यैतरेय श्रु
तिरनुमाणं । अन्यथा तदधिष्ठानत्वापत्तेरुक्तायाः नासास्थानवर्तित्वं न स्यादिति बोध्यं । अपानलक्षण
माह । अपानेति । तस्य वागधिष्ठानत्वे अथ यो यमवाचं संक्रामति एष वाव सोपान इति मैत्र्युपनिषत्प्रमा
णमिति भावः । वायुरितीति ।। नाभिमारभ्य [illegible] पर्यंतं तिष्ठतीत्यर्थः । तस्यापानः पायुप्रदेशमाचरती तथोस
ति मृत्युरपानो भूत्वा नाभिं प्राविशदिति नाभिवर्तिनमृत्युदेवताधिष्ठानत्वप्रतिपादकैतरेयश्रुतिरिति साधा

पा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ९९

पत्तेरिति भावः। व्यानलक्षणमाह विस्पृगिति। येनैताः शिरा अनुव्याप्ताः एष वाव स व्यान इति तेनैव व्यवधानार्
जिभावः। उदानं लक्षयति। ऊर्ध्वमिति। नन्वूर्ध्वगतिमत्त्वेन लक्षणं प्राणस्यापि तथात्वेन न चातिव्याप्तिरि
साशंक्य उत्क्रमणसमर्थो वायुत्वेन विवक्षितमित्याह। उत्क्रमणेनेति। उत्क्रमणं चात्र देहादूर्ध्वगतिर्लो
कान्तरयानाश्चाभिप्रेतं अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति। पापेन पापमुभाभ्यामेव मनुष्यलो
कमिति प्रश्नोपनिषद्वचनं तस्य लोकान्तरगमयितृत्वेन प्रमाणमित्यवधेयं अथवा पीताशितपानान्नाद्यूर्
र्ध्वक्रियाहेतुर्वायुरुदानः। अथ योऽयं पीतमशितमुद्गिरति एष वाव स उदान इति मैत्र्युपनिषद्वचनं प्रमाणत्वा
दिति भावः। अशितेनेति। अशितपीतान्नपानीययोः स्थविष्ठभागपुरीषमूत्रोपादानं बहिर्निर्गमः यथितुम
पाने स्थापयति मध्यमभागं मांसलोहितोपादानेन स्थूलं सूक्ष्मं च मनःप्राणोपकारकं अंगोपांगेषु समानयति समा
नरसार्थः। अथ योऽयं स्थविष्ठमलेपानं समाने स्थापयति अणिष्ठं चांगे समानयति एष वाव स समानो नेति तेन वाव ६४
गतेः अयं च सकलान्तर्वर्ती अन्यथा सकलांगेष्वशितादि समीकरणानुपपत्तेरिति भावः। महाभूतोत्पत्ति
माह। तैश्चेति पंचीकरणेऽपरिणवाकं पंचमाणामिति भावः। ननु त्रिवृत्करणश्रुतिप्रतिपादकच्छांदोग्यश्रुतिविरो
धेन परिणादिवाक्यात्पंचीकरणसिद्धिरित्याशंक्य तस्यास्त्रिवृत्करणे परत्वेन पंचीकरणनिषेधे तत्परत्वाभावा राम० ९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः। एकस्य वाक्यस्य व्यापारद्वयाभावात्॥ स्वाभिप्रेतमाह। तामसामिति। ननु पंचतन्मात्रेभ्यस्समुदितेरेकमहाभूतो
सत्तिर्यदि पंचीकरणशब्दार्थस्तदा पंचतन्मात्राणामेकैकैवोपक्षयान्महाभूतानां तेरेत्यन्निनस्यात्तत्ता नि
भूतानि त्रसेकैकं पंचधा विभज्य तद्भूतांशे पंच समुदायकरणमित्यभ्युपगतां वैकैकत्रमहाभूते तत्पृथिव्यादि
पंचव्यवहारापत्तिरिति साशंकं पंचीकरणप्रक्रियामाह। पंचीकरणप्रकारं दर्शितं। ननु स्वस्वैकभूतार्द्धभागेन
दितरभूतार्द्धचतुर्थांशानां च तद्गुणसंयोजके पंचीकृतिः तथापि न व्यवहारसांकर्यमित्यत्रनिकारस्तत्
स्वाह। तद्देवमिति। अत्र वस्तुत्वकारसंमतिमाह। तदुक्तमिति। केचित्तु तेजोबन्नानि त्रिरूपवद्भूतानि त्रि
वृत्कृतानि न तु पंचभूतानि पंचीकृतानि तथा सत्याकाशपार्थिवांशस्यापि भाने रूपवत्त्वेन चाक्षुषत्वाप
त्तेः अभानेन तद्व्यवहाराभावेन पंचीकृतिर्वैयर्थ्यात्। किंच त्रिवृत्करणमेव श्रुतं तासां त्रिवृतं त्रिवृतमेकैकां
करवाणीति न त्वेवं प्रकृत्वान्न पंचीकृतिरस्यास्त्र श्रवणात्तदुक्तं कल्पतरौ स्तं प्रसाद्यध्वना पंचीकरणं य
घपि द्धितेन यापि युक्तिदृष्टत्वाद्ग्राह्यस्यानिमतं शुभं पृथिव्यत्वात्मत्वं गगनपवनेऽपि चेत्तद्रूपवत्त्वमहत्त्वाभ्यां
चाक्षुषत्वं प्रसज्येत अर्भकत्वात्तु नः क्षित्याद्यविभावनफलेन व्यवहारव्यवस्था त्रिधा पंचीकृतिमेवेत्
अन्ये पक्षफलं वेदसिद्धे सैव पाने यदि त्रिवृत्कृतिः। अतः पंचीकृतिर्न --- न अकरिति त्रिवृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वरसाद्यकारेष्वेवं तेजोबन्नानि त्रीणि भूतानि प्रत्येकं द्विधा विदार्य जनितभूतमेकैकमर्धं द्विधा पस्क्षेत्पुरस्तरभूतत्वा
टी० द्वे हृदये योजनमिति तन्न। गगनपवनयोः स्वांशाधिक्यात्पृथिव्यवुग्मांशाविर्भावनेन रूपवत्वाभावात्। नचव
१०० वहार प्रयोजनाभावाद्ध्यर्थपंचीकरणमित्युक्तमिति वाच्यं। त्रिवृत्करणपक्षे पृथिव्यप्तेजसां गंधवत्वा
दिव्यवहारणभावेन दोषसाम्यात् नच प्रमाणाभावः तस्योक्तत्वात्त्रिवृ श्रुतिस्कृतेस्तन्निवृत्तिपरत्वाभा
वनाविरोधस्योक्तत्वात्स्थूलं पंचीकृतानि भूतानि जायंत इति। पांचभौतिकं हि शरीरं। तेषां समुदायः श र-च
रीरमिति भौतिकपक्षेतेः। तद्द्विविधं स्थूलं सूक्ष्मं चेति। तत्र स्थूलं कर...णाद्यवयवोपेतं त्वङ्मज्जापंची
कृतभूतैरुत्पन्नत्वात्साहतेष्विति। ननु परिदृश्यमानस्थूलशरीरेणैव जीवस्य सकलकार्यसंभवात्किमने
नलिंगशरीरेणेत्यत आह। लोकेति। स्थूलशरीरस्येहैव भस्मीभावेन परलोकयात्रानुपपत्तेः तन्निर्वाह
कस्य संगमनवश्यमेष्टव्यमिति भावः। तस्य परलोकयात्रानिर्वाहकत्वे हेतुमाह मोक्षेति। प्राकृतप्रलयपर्यं
तस्थायीत्यर्थः। ननु सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेतीत्यादौ सकलकार्यलयश्रव
णेन लिंगशरीरस्यापि नाशात्कथं कार्यब्रह्मविनाशपर्यंतस्थायित्वमिति चेन्न ज्ञानशक्तिविशिष्टस्य स
त्वाभ्युपगमादिति भावः। उक्तावयवोपेतं लिंगशरीरे प्रमाणमाह। तदुक्तमिति लिंगशरीरं विभजते नवेति। राम०
१००

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परंब्रह्मांडआपिच्चपरंतद्व्यापीसर्वथः। हिरंण्यगर्भलिंगशरीरस्यमहत्तत्त्वव्यपदेशस्तस्यपरत्वेप्रमाणम्
न्यथाशक्यादेहोहिरण्यगर्भशरीरंमहत्तदितरंजीवलिंगशरीरमहंकारमात्रमितिव्यपदेशोनस्यादि
त्याह। तत्त्वेति। एवंतमोगुणाधिकेभ्यइतितस्मात्तमः संजायतेतत्तम सोभूतादिःभूतादेराकाशः
आकाशाद्वायुर्वायोरग्निरग्नेरापअद्भ्यः पृथिवीतितदंडंसमभवत्तंवत्सरमात्रमुषित्वाद्विधा
अकरोदधस्ताद्भूमिमुपरिष्टादाकाशमितिसुबालोपनिषद्वचनंब्रह्मांडस्यतमोगुणाधिक्योक्तसन्नि
त्वेप्रमाणं। अत्रचभूम्याकाशशब्दयोरधोलोकसप्तकोर्ध्वलोकसप्तकपरत्वादतएवसंन्यास
विद्यापिनारायणश्रुतिरपिभूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकं
चातलपातालवितलसुतलातलरसातलमहातलब्रह्मांडंचविसर्जयेदितिचतुर्दशभुवनात्मकं
ब्रह्मांडमाहेतिभावः। वृक्षादीनामिति। शरीरजैःकर्मदोषैर्यातिस्थावरतांनरइतिवृक्षादेःकेवलपा
पजन्यत्वावगमेनतज्जन्मदुःखभोगायतनत्वाच्छरीरत्वमितिभावः। ननुब्रह्मणोनसकलजगत्का
रत्वंसुबालोपनिषदिब्राह्मणोस्यमुखमासीदित्यादिनाब्रह्मक्षत्रादिसृष्टेस्तत्रैवाम्नानान्निषाद
पक्वसारास्सागंधर्वाश्चास्थिभ्यपर्वतालोमभ्यःओषधिवनस्पतयस्सादिनानिषादादिसृष्टेश्चश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
१०१

रीरसाध्यत्वावगमाद्धेरस्य च लिप्सादिसंभवात्परस्य चाशरीरेण कर्तुमशक्यत्वात्तच्च शरीरसाध्यं कर्म हिरण्यग
र्भः करोतीति तत्साध्यं तु ब्रह्मणेति निषिध्यते नहिं ब्रह्मैव सकलजगत्कारणमिति आह। नेनेति साशंकमाह। स्वच्च चेति।
त्लिंगशरीरेति। उभयविधलिंगशरीरेत्यर्थः हिरण्यगर्भस्य स्थूलशरीरेति। मध्ये तु पुरुषोविद्यः सहस्रशी
र्षा पुरुषः सहस्राक्षः सहस्रपात्सहस्रबाहुरिति सुबालोपनिषद्वचनं ब्रह्मणो हिरण्यगर्भशरीरकर्तृ
त्वप्रमाणं। न चाक्षोसन्निवाचकस्य च शब्दस्याश्रवणात्कथं कर्तृत्वसिद्धिरिति वाच्यं। तस्मात्तमसं ज्ञायत
इति पूर्ववाक्ये श्रुतस्य तदुभयस्याप्यनुषंगात्। ननु हिरण्यगर्भकर्तृकं कार्यं कथं ब्रह्मकर्तृकं स्यान्नहि
कुलालेन कृतं कुविंदेन कृतं भवतीत्याशंक्य तत्र च्छांदोग्यश्रुतिः प्रमाणयति। हंतेति। नन्वनेन जीवे
नेति वाक्ये हिरण्यगर्भो नाभिधीयते तेन तस्य ब्रह्मविश्वरूपलक्षणमर्थं निर्णयं तभावेन जीवत्वाभावादित्य
त आह। हिरण्यगर्भो नामेति। न च प्रमाणमाह सर्वेशरीरीति। तस्य तदन्तत्वे मंत्रवर्णान्प्रमाणयति
। हिरण्यगर्भ इति ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता इति। उक्तश्रुतिरर्थस्य प्र
प्रथम जीवत्वे प्रमाणमिति बोध्यं। जगज्जन्मनिरूपणमुपसंहरति। एवमिति। स्थितेरेकरूपत्वेन तन्नि
रूपणीयांशाभावाज्जन्मनिरूपणानंतरं प्रलयो निरूप्यत इति प्रतिजानीते। इदानीमिति। प्रलयस्य रूप

ण्म० १०१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि ज्ञाने तद्विभाग इति च यथमं तल्लक्षयति । चलयोनामेति । सकलकार्यनाशः चलपदस्यार्थः । निसचलयं
निरूपयति । तत्र्चैव सर्वत्र चनिदिनं शति सुषुप्तिर्नाम यमावोलयो नितः सुषुप्तिकालीनः चलपदस्यार्थः । न
नु सुषुप्तिकाले सकलेन्द्रियव्यापारोपरमेऽपि न सर्वकार्यविलयः मानाभावादित्यत आह । तस्यामिति । सु
षुप्तिकाले सकलविलीनमिति केवलोपनिषदि तत्काले सकलकार्यविलयस्य श्रवणादिति भावः ।
ननु सुषुप्तिकालस्य सकलकार्यविचलयाधारत्वे धर्माधर्मयोः स्थितिहेतुसंस्कारस्य च तत्राविनाशेन
सुप्तोत्थितस्य सुखदुःखानुभवो घटादिस्मृतिश्च न स्यादित्यत आह धर्माधर्मेति । कारणात्मनेति । स्व
विघात्मनेत्यर्थः । ननु धर्मादिविदेनः कारणस्याविघात्मना स्थितत्वे न स्वरूपेण विनाश इत्युक्तो सादिकि तस्था
यानुपपत्तिरित्याशंकां निराकरोति । नैवेति । किं सुषुप्तौ क्रियायाः नुपपन्नात दुपलब्धिर्वी नाघः रूपापत्ते
नेद्वितीयस्साहावस्तत्वइति । एवं सति सुखदुःखोत्तयोर्भेदो न स्यादिति सापेक्षां निराकरोति । नैवेविति सं
स्कारात्मनेति । नाशात्मसंस्कारविघात्मनेत्यर्थः । ननु सुषुप्तौ सकलकार्यलयाभ्युपगमे सुप्तोत्थि
तस्य धर्मादिविनाशे सुखाद्यनुपपत्तिरित्याकारकारणात्मनावस्थानमिति चेत् किमविघात्मनावस्थानमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० १०२

त्यनेन विवक्षितं उक्तधर्मादेरपि स्वकार्यकारणत्वेन स्वरूपेणावस्थानं स्यादेव धर्मादिकारणामविद्यैव तद्वर्त्तन
इत्यर्थः स्यात्तथा च सुखादिकारणधर्माभावादुक्तदोषतादवस्थ्यं द्वितीये च तत्काले विलीन इति श्रुति
विरोधः। अंतःकरणस्यापि स्वरूपेणावस्थाने स्वाप्नोपलब्धेः भ्रमत्वमुक्तिपाद न विरोध अस्य स[illegible]र साद्य स्व३
ह्यदेति। शक्तिरिति शक्तिः सामर्थ्यं तत्त्वफलोपधाने विवक्षितं न स्वरूपयोग्यत्वं। तस्य सर्वदा सत्त्वेन
ज्ञानशक्तिविशिष्टांतःकरणस्य सुषुप्तौ विनाशः उक्तरीत्या विरोधात्। प्राणादीति। अत्रापि पदेन सा धा
वयवलिंगशरीर धर्माधर्मसंस्काराणां परिग्रहः। न च धर्मादेरपि कार्यं स्वरूपेणावस्थाने अत्र तथात्वं सुषुप्ति
काले विलीन इति स्मृतिविरोधापत्तिरिति वाच्यं धर्मादिकार्यस्य सुखादेर्विनाशेन तस्य कार्यविशिष्ट
कारणनाशपरत्वात् अत एव कैवल्योपनिषदि पुनश्च जन्मांतरकर्मयोगात्स एव जीवः स्वपिति प्र
बुद्ध इति तदुत्तरवाक्यं संगच्छते अन्यथा कारणस्य धर्मादेः स्वरूपेण विनाशे तद्विरोधापत्तेः अत एव मां
डूक्योपनिषदि यत्र सुप्तो न कंचन कामं कामयते न किंचन स्वप्नं पश्यति तत्सुषुप्तमिति निर्वचनं अत एव
वायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति बृहदारण्यकश्रुतिरपि सुषुप्तौ सकलका
र्यविलये कौषीतकिश्रुतिप्रमाणमाह यदेति तच्छांदोग्यश्रुतिं च प्रमाणयति। सतासोम्येति। प्राज्ञेनेति

रामं० १०२

206

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नो मायायांभवः प्राकृतप्रलयस्सर्थः। न चैसौषुप्तिकप्रलये ऽतिव्याप्तिः तदा सुखादिविनाशस्य स्वतः
कारणनिष्ठत्वादिति भावः। तल्लोकनिवासिनामिति। सत्यलोकवासिनामित्यर्थः। यद्यपि कार्यब्रह्मवि
नाश एव प्रकृतोपयोगी। तथापि तत्समानत्वेन वक्ष्यमाणवचनेन कृतात्मान इति पदद्वयमन्यब्रह्मसा
क्षात्कारवत्परं चविशतिपदं विदेहकैवल्यपरं न तु लोकान्तरप्राप्तिपरमिति दर्शयितुं तत्र ऽभिधानमिति
ध्येयं ननु चयप्रलयो न प्राकृतः ब्रह्मनिष्ठत्वादिसाशंक्यमायानिष्ठ एवायं प्रलयः परिणाम्युपादानका
लीननाशस्य तन्निष्ठत्वाभ्युपगमात् स्वत एव घटादिनाशो मृदादिनिष्ठस्त्वभ्युपेसाह। नविनि।
बाधेति। इदं च नाशस्य ब्रह्मज्ञानत्वमभ्युपेत्योक्तं वस्तुतस्तु बाधोपि न ब्रह्मनिष्ठः तस्याधिष्ठानावशेषबला
दिति बाधः। नैमित्तिकप्रलयं निरूपयति कार्यब्रह्मेति त्रैलोक्यमात्रेति। सत्यलोकतदन्तर्वर्तिकार्यव्यतिरि
क्तसकलकार्यविनाशस्सर्थः। तुरीयश्चतुर्थः सर्वमोक्ष इति सर्वकार्यविनाशस्सर्थः। ननु मोक्ष
स्यापि प्रलयत्वे नैमित्तिकादिप्रलयाविशेषापत्तौ तद्वदेव मोक्षस्य पुरुषार्थत्वं न स्यादित्यत आह। न
त्रैनितन्यथा च मोक्षस्यानर्थहेतुविधानिवृत्तिरूपत्वात् पुरुषार्थत्वमिति भावः। जन्मवत्प्रपस्यापि कर्मकोऽस

207

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० १०३

त्वात्तत्क्रमनिरूपणं घटितानानीतितस्येति। तर्ह्युत्पत्तिक्रम एव प्रलयेऽप्यस्तु न तु विपरीतक्रमः कृतत्वादित्यत आह।
भूतानामिति। उत्पत्तिक्रमस्यांगीकारे बाधकमाह। कारणेति। आश्रयमंतरेणेति। न च विनश्यदवस्थायामा
श्रयमंतरेणैवावस्थानं। अत एवानाश्रिताश्च वर्तिष्यंत इति न्यायसिद्धांत इति वाच्यं तथा सति सर्वदा निराश्र
यत्वापत्तेः। ननु क्रमोत्तराभावाद्गत्या स एव क्रमः कल्प्यत इति चोदयति किंचिति तदभावोऽसिद्ध इत्याह।
स्पष्टेति। न चाश्रयनाशानंतरमेव कार्यनाशः कार्य[illegible]नाशे हेतुः घटनाशाभावप्रसंगात् न च चो न
समवायिकारणनाशाघटनाशः आत्मनि पाकरके घटे च विरोधिगुणाविर्भावाद्गुणनाश इति नैदोषइ
ति वाच्यं अननुगमात्कार्यजनकादृष्टनाशस्यानुगतस्य तत्तत्कार्यनाशजनकत्वसंभवेनाननुगमस्या
न्याय्यत्वादिति अदृष्टनाशस्य कारणत्वानंगीकारे बाधकाभावमाह। अन्यथेति। सिद्धांते परमाणोरन
भ्युपगमादाह न्यायमत इति। तथा चादृष्टनाशस्य सत्वात्स एव सर्वत्र प्रयोजक इति भावः। पृथिव्यादेरवल
य आरोपमाणमाह। तदुक्तमिति वक्तव्ये तत्त्व आकाशस्येंद्रिये प्रलयः इंद्रियाणां तन्मात्रेषु तेषां जी
वाहंकारे तस्य चेहे रणगर्भोऽहंकारे तस्य च मायायामित्येवं बोध्यं पृथिव्यप्सु प्रलीयते आपस्तेजसि विली
यंते तेजो वायौ विलीयते वायुराकाशे आकाशमिंद्रियेषु तन्मात्राणि भूतादौ विलीयंते भूतादिर्महति विली रा०म०

१०३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येत महानप्यकृत इति सुबालोपनिषदि तथैव श्रवणात् न च तत्सहार्थे निरूपणेऽसंक्रमः प्रलयनिरूपणस्य कः प्र
संग इत्याशंक्य तस्य प्रकृतोपयोगमाह। नन्तु प्रपंचोपाधिकं जगज्जन्मादिकारणत्वं ब्रह्मणः तटस्थलक्षणमित्यु
क्तं तदयुक्तं प्रमाणाभावान्न च प्रतीतो वेदांतवाक्यं न च प्रमाणमिस्तु कमिति वाच्यं। ब्रह्ममात्रपरत्वाद्वेदांतानां त
त्प्रामाण्याभावात् अन्यथा सप्रपंचब्रह्म शास्त्रार्थः स्यादिति चोदयति नन्विति। नहि योयोऽर्थः प्रतीयते स
र्वोऽपि शास्त्रार्थः न स्वर्णपिवेदिसादेः स्वर्गपानकर्तव्यत्वस्यापि शास्त्रार्थत्वापत्तेः किंतु यत्तात्पर्यविषयः
यत्परः शब्दः स शब्दार्थ इत्यभ्युपगमात् तत्समान प्रपंचस्तु कृतिप्रतिपाद्योऽपि न तात्पर्यविषयः यत्परः
शब्दः स शब्दार्थ इत्यभ्युपगमात् तत्समान प्रपंचस्तु कृतिप्रतिपाद्योऽपि न तात्पर्यविषय इति न शास्त्रार्थः
न च निंदाश्रवणेन प्रायश्चित्तोपदेशेन च सुरापानकर्तव्यतायाः शास्त्रतात्पर्यविषयत्वाभावेऽपि प्रकृते तद
भावेन सप्रपंचं ब्रह्म तात्पर्यविषयः स्यादिति वाच्यं। उदरमंतरं कुरुते अथ तस्य भयं भवति आत्मन अपरस्या
पियः करोत्यंतरं मिथः तस्य भिन्नदृशो मृत्योर्विदधे भयमुल्बणं। अंधं तमः प्रविशंति ये के चात्महनो ज
नाः यो ऽन्यथा संतमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चौरेणात्मापहारिणा इत्येवमादिभेदद
र्शननिंदा च तस्य बहुत्वेन प्रपंचभावप्रपंचस्य लोकाद्वगतेन न तत्तात्पर्ययोगात् अज्ञातस्यैव शास्त्रतात्पर्यविष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० यस्मात्प्रपंचपरत्वेनेह नानास्तीति प्रतिषेधानुपपत्तेः इत्याशयेनाह। नहीति। ननु सत्यस्यादिवाक्यानां कथमद्वितीय
१०४ ब्रह्मप्रतिपत्तौ विनियोगः न तावत्तद्ब्रह्मप्रतिपत्तौ अन्नमयादिवाक्यवत् स्थूलारुन्धतीन्यायेन सूक्ष्मब्रह्मप्र
ति तिपत्त्युपयोगः नहूतत्प्रपंचस्य ब्रह्मत्वेनानुपदेशात् नाप्युपासनादिवाक्यवद्ब्रह्मज्ञानोपयोगः अंतःकरणशु
द्धिद्वारा उपासीतेत्यश्रवणात् न च प्रतिषेध्यप्रपंचसमर्पकतया तत्रोपयोगः अनयोस्तत्त्वस्यापि प्रपंच
स्य तत्र च प्रतिषेधसंभवेन ब्रह्माधीनसत्ताभिधानवैयर्थ्यापातात् तथा च सत्यादिवाक्यानां सप्रपंचब्रह्मप
रत्वाभावे प्रामाण्यापत्तौ न निष्प्रपंचब्रह्मशास्त्रार्थ इत्याक्षिपति। न त्वनिपत्ताविति। यद्यपि ब्रह्माधीनस्यापि प्र
पंचस्य ब्रह्मणि प्रतिषेधः संभवति। तथापि प्रायो प्रतिषिद्धरूपवन्निषेध्यस्य पारमार्थिकत्वेपि संभवेन तन्मिथ्या
त्वासिद्ध्या ब्रह्मणो द्वितीयत्वासिद्धिप्रसंगः। ब्रह्माधीनस्थितिलयोपन्यासेन तु प्रपंचस्य ब्रह्मणोऽपरतयासिद्धस्य
नेह नानास्तीत्यादिनानेनैव निषेधोक्तिरूप्यवन्मिथ्यात्वावगतेः अद्वितीयब्रह्मसिद्धिरितीत्याह। इत्थमिति। प्रसं
गाद्वाक्यांतरस्यापि तदुपयोगमाह। उपासेनेतिपद्यानतु यथा य एषोऽन्तरादित्ये हिरण्मयः पुरुष इत्यादिवाक्या
नां सगुणब्रह्मपरत्वं तद्वत्सत्यादिवाक्यानामपि सप्रपंचब्रह्मपरत्वं स्यादित्याशंक्याह किं उपासनाप्रकरणपठितानां
हिरण्मयादिवाक्यानां गुणपरत्वमुत निर्गुणप्रकरणपठितानां द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेत्यादीनां। तत्राद्यं राम० १०४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूषयति उपासनेनेति गुणारोपेति। वाचं धेनुमुपासीतेत्यादिवह्यास्तव गुणाभावेपि तद्गुणारोपमात्रेणोपासना
संभवात् न चैवमध्यारोपपरत्वं न ब्रह्मपरत्वमिति वाच्यं फलानुषंगरहितानामुपासनानां साक्षात्तंतः
करणशुद्धिहेतुत्वेनात्तद्द्वारा ब्रह्मज्ञाने विनियोगात्। अत एव योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धय इति
भगवद्गीतावचनं। इदानिहेयमित्येवयज्ञेयष्टव्यमित्यपि इति आरण्यपर्वशिरोहक्तिनणीं चेति द्रोपदीव
चनं च फलोद्देशेन क्रियमाणानां चोपासनानां क्रममुक्तिफलकत्वात्। द्वितीयं निरस्यति। निर्गुणो
ति। बृहदारण्यके मूर्तं चामूर्तं च मर्त्यं चामृतं चेत्युपक्रम्य तदेतन्मूर्तं यदन्यद्वायोरंतरिक्षाच्चेत्यादि
ना वाय्वंतरिक्षव्यतिरिक्तं मूर्तं वाय्वंतरिक्षं चामूर्तमित्यादि भौतिकमुपन्यस्य अथाध्यात्ममित्यादिना
प्राणव्यतिरिक्तं मूर्तं प्राणश्चामूर्तमित्याध्यात्मिकमभिधाय अथात आदेशो नेति नेतीति निषेध
तित्रमूर्तादिगुणवाक्यानां निषेधवाक्यापेक्षितनिषेध्यसमर्पकतया प्रकरणार्थे निर्गुण
ब्रह्मज्ञाने विनियोग इत्यर्थः। ननु कर्मकांडवाक्यानां यथा ब्रह्मज्ञाने विनियोगाभावात्स्वार्थपरत्वं तथा
सगुणोपासनावाक्यानामप्यस्तु स्वार्थमात्रपरत्वं। किंच ब्रह्मणो निःप्रपंचत्वे कर्मवाक्यानां यागस्व
र्गादि साध्यसाधनभावप्रतिपादकानामसति स्वर्गादिलोकप्रपंचे कथं प्रामाण्यमिति चेन्न तावदप्रामाण्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० स्वर्गयागादीनां व्यावहारिकत्वाभ्युपगमात् नाप्यनुपयोगः अग्निहोत्रादीनामपि फ क्रत्वानुषंगरहितानामारादुपका
१०५ रकत्वस्य सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति सूत्रे सूत्रकारेणांगीकृतत्वाच्चित्तशुद्धावुपयोगसंभवात्तदेत
दाह। न किंचिदपि बाधकमस्ति। यद्ब्रह्मप्रतिपादनेन विरुध्यत इति। नन्विदं लक्षणद्वयमयुक्तं लक्षणाभा
वात्। तथाहि न तस्य दवाच्यं लक्ष्यं नहि न चिद्रूपं जीवस्यापि तथात्वात् नाप्यविद्यावच्छिन्नो जीवः माया
वच्छिन्नेश्वर इति वाच्यं तत्र त्वविद्यामित्यादौ मायाविद्ययोः सामानाधिकरण्यव्यपदेशाच्च तयोर्भेदस्व
लत्वात् तस्माल्लक्ष्यानिरूपणाल्लक्षणद्वयमनुपयुक्तमित्याशंक्याह। तदेवमिति। अविद्याप्रतिबिंबरूपमी
प श्वरचैतन्यं [illegible] दवाच्यं तदेव स्वरूपलक्षणतटस्थलक्षणयोर्लक्ष्यमित्यर्थः। नन्वविद्याप्रतिबिंबो जी
वः तत्कथमीश्वरस्याविद्याप्रतिबिंबत्वमित्याशंक्य एतन्मतेप्यंतःकरणप्रतिबिंबो जीव इत्याह।
तेषामिति। अंतःकरणावच्छिन्नो जीवः तदनवच्छिन्नेश्वर इति केचित्तन्मते स्पष्टं निर्विरोधादित्याह।
कार्येति कार्यमंतःकरणं कारणमविद्या [redacted] किंच जीवेश्वरावंतःकरणविद्या ति
प्रतिबिंबावित्युक्तं न तु तदवच्छिन्नानवच्छिन्नौ तथा सति जीवेश्वरयोरत्यंतभेदापत्तेरित्याह। पिचेश्वरस्या ति २
नवच्छिन्नरूपत्वे ब्रह्मांडस्य सर्वजीवानां तत्तया अनवच्छिन्नस्य ब्रह्मणोऽस्माद्बहिरेवावस्थानापत्तेः सर्वगत राम०
१०५

212

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ + वेश्वरस्याव स्थाशांश्यत स्यबिंबत्वेनेश्वरत्वं प्रतिबिंबत्वेन जीवत्वं चाविरुद्धमित्याह॥ एकमेवेति॥ ४

त्वसर्वोपादानत्वसर्वात्मत्वादि ब्रह्मणो न स्यात् अविद्याप्रतिबिंबत्वपक्षे तु तत्सर्वमुपपद्यत इत्याशयेनाह। अ
विद्येति। जीवस्य तु न व्यापकत्वं तदुपाधेरव्यापकत्वादित्याह अंतःकरणस्येति। एकजीववादे ऽविद्याप्रति
बिंबो जीव इति तन्न जीवेश्वरविभागो न स्यादिति प्रतिबिंबत्वे दोषसत्त्वेऽपि तद्दोषां न रमाह। एतन्मतद्वये। ननु सिद्धां
ते बिंबप्रतिबिंबयोरभेदेन चैतन्यस्यैव बिंबप्रतिबिंबात्मकतया कथमेकस्यैव जी[illegible] ननु बिंबप्रतिबिंबभा
वो यदि पारमार्थिकः तदा निष्कलंकत्वविरोधः उपाधिश्च नित्यसन्निहितः पारमार्थिकः स्यादिति सिद्धा
तो व्याघातः यदि कल्पितः तत्कल्पकोपाधिर्यदि अंतःकरणं तदा जीववादानवकाशः यद्यविद्या तदा
नानाजीववादविरोधः इत्याशंक्य मतभेदेन व्यवस्थितोपाधिमाह। बिंबेति। मतभेदेन भेदमाह अविद्यांतः
करणेति। एवं मतोक्तदोषानाच मतत्रयसंगतीमाह। उपाधेरिति। अंत एव दर्पणागतमुखप्रतिबिंब एव यत्राभेपि
प्रतिबिंबतामिति वाच्यंत त्राप्यन्नत्वनाद्देरेवरूपवतः प्रतिबिंबत्वसंभवेन निरूपाकाशप्रतिबिंबस्यासंप्रति
लभ्यत्वादित्यत आह एकधेति। तत्सदार्थनिरूपणमुपसंहरति। तदेवमिति। अविद्याप्रतिबिंब इति। एकैवावि
द्या अजामेकामित्यादिश्रुतेः नेचंद्रो मायाभिरिति बहुवचनेविरोधः तस्य तद्गतशक्तिभेदपरत्वेन व्याख्यानत्वा
त्तया चाविद्योपाधेरेकत्वात्तत्संतिबिंबलक्षणो जीव एक एवेत्यर्थः जीवैकत्वं च संप्रदायाध्वनास्थितमित्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
१०६

तावतैव तत्पक्ष उपपन्नस्तः नत्वयं पक्षो युक्तः तथाहि एकजीववादिमते अविद्याया एकत्वेनैकस्य मुक्तत्वेनेदानीं
प्रपंचानुपलंभापत्तेः एवं शुकवामदेवादिमुक्तिप्रतिपादकबहुवाक्यविरोधात् वामदेवादीनामुत्प
न्नब्रह्मसाक्षात्काराणामप्यमुक्तौ अर्वाचीनानामाषाढवनिवल्लनिहि एवं इत्यभिप्रेत्यैवापि धीरैकाग्र
त्रिन्मायेन मुक्तिई रोत्सारितास्यात् नचैवमावद्यातत्वादिकमिति भावः। ननूपाधिकृतभेदरत्यमुक्तस्वरूप
तएव भेदसंभवादित्यत आह। एतन्मत इति। ईश्वरस्य बिंबत्वबाधकमाह शंकते नन्विति। सर्वांतर्यामित्वं
नस्यादित्युपलक्षणं सर्वोपाह। नत्वंचनस्यादित्यपि बोध्यं। परिछिन्नस्यैव विषयस्य प्रतिबिंबदेशवर्ति
त्वनियमः नापरिछिन्नस्येत्याह। नेति। ननु महाकाशो जलादौ न प्रतिबिंबितेन चाप्याकाशस्यैवाभावसं
भवादित्याशंक्याह। साभ्रेति। ननचाभ्रादिकमेव तत्र न महाकाश इति वाच्यं। प्रत्यभिज्ञाविरोधात् किं नि
रूपे प्रतिबिंबाभावनियम उत निरूपद्रव्ये नचाद्यं निराकरोति द्वितीयं दूषयति नचेति। आत्मन इति। आत्मा
नद्रव्यत्वद्विनसमवायिकारणसमवायानभ्युपगमात् नापि गुणाश्रयः ब्रह्मणो निर्गुणत्वादित्युक्तत्वादि
त्यर्थः। ननु ब्रह्मणो कल्पितगुणांगीकारात् निर्गुणश्रुतिविरोधः नचाकाशवद्ब्रह्म निरूपद्रव्यं विरणाचायै
जीविकेत्युक्त्वात्प्रतिविरोधादिति वाच्यं तदुक्तेर्जीव[illegible]पद प्रतिपाद्य एक एव निशास्त्र दृष्टजीविकापरत्वात् अन्यथा राम०
१०६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

214

तद्वचनस्य लोकसिद्धजीवभेदप्रतिषेधकत्वेनानंतजीवनिर्भासस्वप्नदृगेकवत् संब्रह्मसंहकारत्रीकार्योपमपादाचा
र्ये जीवभेदस्याभिधानात्तद्विरोधापत्तेः । अत एव विवरणाचार्यैः शारीरकन्यायसंग्रहे ग्रंथांतरे देवताधिकरणे
तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथा ऋषीणां तथा मनुष्याणामिति वाक्योदाहरणेन यस्य ज्ञाने
नस्यैव मुक्तिरिति निरूपणेन तदेव वच यावदधिकारमवस्थितिराधिकारिकाणामित्यत्र वसिष्ठादीनां ब्रह्मज्ञानि
नः उत्पन्नज्ञानस्य तेषां पौरोहित्याद्यधिकारलक्षणप्रारब्धपर्यंतमवस्थानेन तन्नाशोर्ध्वं मुक्तिरित्युक्तं तदेत
त्सारमर्थसत्त्वेऽभोगान्न नक्षितेरक्षणपि त्वासंपद्यत इति तस्माच्छ्रुतिस्मृतिन्यायविरोधाज्जीवैकत्ववा
दोऽयं नादर्तव्यः । परीक्षकैः । जीवैकत्वमतेन जीवस्य लक्षणोपन्यासात् तदनेकत्वमतेन तल्लक्षणमाह । अ
नेकजीववादे त्विति । अंतःकरणप्रतिबिंब एव जीवः न त्वविद्यावच्छिन्न इत्यर्थः । तदुपाधेरेकत्वेन जीव
नानात्वानुपपत्तेः ननु अविद्यावच्छिन्नो जीवः स च नानैव मायाभिरिति श्रुतेस्तदुपाधेरनेकत्वावगमात् ।
अजामित्येकवचनश्रुतेरेकवचनमिति वस्तुभेदाद्यभिप्रायत्वादिति चेन्न कार्योपाधिरयं जीव इति स्मृ
तिविरोधात् किंच स्वप्नेऽपि तो भवतीत्यादिश्रुतौ स्वप्ने ब्रह्मण्युपाधिविलयः श्रूयते जीवस्याविद्यो
पाधिकत्वे तद्वचनं न स्यादविद्यायास्तदा विनाशाभावात् अपि चैवं जीवस्यांतर्निगमागतयोनोपपद्येरन्

215

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ९ १०७

अविद्यायाः व्यापकत्वेन तदवच्छिन्नस्यागत्याद्यनुपपत्तेः । उपाधेः प्रतिबिंबपक्षस्य निरस्तत्वात् तद्दोषाः प्रति
बिंबपक्षेऽपि तुल्याः स्वरूपेण केनेदेशस्सा कांक्षायामाह सचेति। अत्र वक्ष्यमाणावस्थात्रयव्यतिरिक्तमुपलक्षणं तुरीयनामाका
वस्थान्तरमादायावस्थाचतुष्टयवानिति द्रष्टव्यं न चैक एवात्मा तस्य जाग्रत्स्वप्नसुषुप्तिषु सत्त्वान्न बि
रूपनिषद्वचनविरोधः तस्यावस्थान्तरोपलक्षणार्थं जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते इति कै
वल्योपनिषदादिपदेन तस्याभिधानात् बालोपनिषदि योयं विज्ञानघन उक्तो मनःप्राणवहीति
रूपकम् जागरितस्वप्नसुषुप्तं तुरीयं चेति तुरीयपदेनावस्थान्तराभिधानात् जाग्रत्स्वप्नसुषुप्तितुरीयभि
त्तिचतुर्विधावस्था इति शारीरकोपनिषदि स्पष्टमेवावस्थाचातुर्विध्यस्योक्तत्वाच्च न च लक्षणतः स्व
रूपतो वा एवं तर्हि बहुत्वापत्तिः प्रकृतिसिद्धविलक्षणावस्थान्तरानुरोधेन तथात्वे तत्सुषुप्त्यादिलक्षणस्य
सुषुप्त्यादिव्याप्यत्वात् अवस्थान्तरलक्षणस्यावश्यं कल्पनीयत्वात् प्रमाणसाध्यस्य लक्षणेन निवर्तना
योगात् न चैवं मूर्छामरणाभ्यां षड्विधावस्थावत्त्वापत्तिरिति वाच्यं तयोरवस्थान्तरत्वे प्रमाणाभावादिति दिक्
। तत्र जाग्रदवस्थां निरूपयति जागरितेति । इंद्रियजन्येति । इंद्रियजन्यज्ञानोपलक्षितकालो जाग्रदिति तदर्थः । नन्
जाग्रति स्वप्नादिभवकाले श्रोत्रादिसन्निकाले च तद्विशिष्टत्वाभावात् अतिप्रसंगः इंद्रियपदस्यावसेमाह मा० १०७

216

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अवस्थांतरमिति। सुषुप्ताविसर्थः। नचैवमपि सत्वेऽतिव्याप्तिः नचेंद्रियसत्वेपि तद्व्यापारे परमात्मेतिभावः।
ननु सुषुप्तावींद्रियसद्भावपक्षे तत्राव्याप्तिरित्याशंक्य किमविद्यावृत्तिमादाय तत्रातिव्याप्तिरुत स्वरूपज्ञा
नमादाय नाद्यः जायति जायमानबाह्यगोचरांतःकरणवृत्तेरेवेंद्रियजन्यत्वेन सर्वोपरमल
क्षणसुषुप्तिकालत्वस्याविद्यावृत्तेस्तज्जन्यत्वाभावादित्याह। इंद्रियजन्यज्ञानं चेति। द्वितीयं दूषय
ति स्वरूपज्ञानेति। ननु निःश्रेयाजनेयमंतःकरणवृत्तिरतो नापेक्षा स्यादित्यत आह सा चेति। न
नु चैतन्यप्रकाशसंबंधेनैव घटादिस्फुरणोपपत्तेर्नावरणभंगार्था वृत्तिरित्याशंक्याह किं शुद्धचैतन्यं विष
यावभासकमुत नेश्वरचैतन्यं वा नाद्यः शास्त्रा ब्रह्मणो निर्विकारत्वेन विषयानवभासकत्वान्न द्वितीयः क
ल्पितबिंबभावस्य चैतन्यस्य विषयप्रकाशकत्वे तेन जीवस्य आपहारिकभेदेन मायागतमिति घटसंबंधानव
भासप्रसंगात् सर्वदा सर्वविषयावभासापाताच्च न तृतीयः अंतःकरणावच्छिन्नो जीव इति पक्षे तस्य घटादिसं
बंधाभावेनानवभासकत्वात् अविद्याप्रतिबिंबः सर्वगतो जीव इति पक्षे तस्यावभासकत्वमिति चेत्तत्राह। त
स्याहीति। जीवरूपतयेति तदुपाध्योर्घटादिविषययोरेकदेशत्वरूपस्वाहित्विभावः। ननु घटाद्यावरकस्य मूलाज्ञानो
त्त्वेन भेदेन नानात्वापत्तावेकज्ञाननष्टातिविरोधः स्यादाशंक्य तत्तद्विषयावरणस्य मूलाज्ञानगतशक्तिभेद

217

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या

टी० १०८ तयानस्यारतेऽन्यात्संतनभेद इत्याह। मूलाविद्येति। अत एवोक्तं विवरणाचार्यैः मूलाज्ञानस्यैवावस्थाभेदा रज्
ज्वाद्युपादानानीति। ननु व्यक्तघटादिचैतन्यावरकमज्ञानं ततः किमत आह। एवं सतीति। तथापि कथं न भा
नेन लाघवेन चैतन्यस्यैव विषयावभासकत्वमित्याशंक्य रूपच सक्षज्ञानसमये तद्ध तपरिमाणहित्य हापु
स्य विषयावरणभंगविशिष्टचैतन्यस्यैव बाह्यानयोगौरवस्यापि प्रामाणिकत्वादित्याह। अनावृतेति। न
नु घटादिविषयावरणं ब्रह्मावरणवत्संसारदशायामनिवर्त्यं स्यादावरणत्वादित्याशंक्य तद्धेवदर्शनीन
भानप्रसंग इत्याह। तस्यैवेति। ननु आवरणभंगस्यापि चैतन्येनैवोपपत्तेर्न तथा वृत्तिरित्याशंक्य किं चैतन्य
मात्रं तन्निवर्त्तकं विशिष्टचैतन्यं वाना घ इत्याह। तद्धुगजनकमिति। तद्रूपसकस्येति। यद्यपि स्फुरणाद्वित्रका
शकस्याप्यन्येः तन्नाशकत्वदर्शनान्नभासकत्व निवर्त्तकत्वयोर्विरोधः तथापि घटस्फुरणात्पूर्वं चैतन्य
त्वपि तदावरणभानस्यैव दर्शनेनान्वयव्यभिचारान्न निवर्त्तकमिसत्त्वनाप्वर्यहितीयं दूषयति नापीति। वृ
त्तिविशेषस्येति। यावत्तिर्यद्विषया शत्वक्षासानसावरणभंजिकेत्यर्थः। ननु वृत्तिर्ननिवर्त्तिकायतो ज्ञानम
ज्ञानस्य निवर्त्तकं प्रत्यज्ञानस्यैव निवर्त्तकत्वाभ्युपगमादित्यत आह। तदुपहितेति। अस्मिन्पक्षे तु वृत्ते
रवच्छेदकतया तन्निवृत्तिप्रयोजकत्वमिति बोध्यं उपसंहरति। इत्यावरणाभिभवार्थेति। आवरणाभिभवो ना रम० १०८

218

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मवितः प्रतिबिंबपक्षे केवलावरणाशक्तिनाशस्तस्मिन् प्रतिबिंबपक्षे परं घोतादिप्रकाशे महांधकार
स्येव अज्ञानस्यैकदेशेन नाश इति संप्रदायविदः न तु कंतलदीपेन प्रतिकर्मव्यवस्थाया नावर
णाभिभवशब्देनानवच्छिन्नात्माज्ञाननिवृत्तिरिति जीवस्यापरिच्छिन्नत्वपक्षे वृत्तेः संबंधार्थत्व
स्य निरूपत्वादपरिच्छिन्नत्वपक्षे तावदनुपपादयति। नचेति। ननु परिच्छिन्नत्वपक्षे जीवस्याविद्योपा
धिकस्य कल्पसंयोगितया कथं न तस्य संबंधार्थो वृत्तिरित्याशंक्य संबंधसत्त्वेऽपि घटादिज्ञानप्रयोजकसं
बंधाभावात्तदर्था वृत्तिरित्याशयेनाह सचेति। आशयमविद्वानशंकते। नन्विति वृत्तिविरहदशा
यां संबंधाभावादित्येतत्संबंधसामान्यनिषेधपरं पारमार्थिकत्वनिषेधपरं वा तत्राद्यं निरस्यति हि
तीयं निरस्यति। असंगत्वेति। असंगो न हि सज्जत इत्यादिश्रुत्या पारमार्थिकप्रपंचसंबंधनिषे
धावगमादित्यर्थः। संबंधो न स्यादिति पारमार्थिक इति शेषः। स्वाशयमुद्घाटयति। नहीति। ननु
घटादिस्फुरणप्रयोजको न संयोगोऽनित्यसंगात्वापि समवायः अनभ्युपगमात् अनभ्युपग[illegible]मे
वा तस्यानित्यत्वादित्यत आह। सचेति। संगेति। जीवस्य घटादिभासकत्वेन तदाकारवृत्त्युपहितत्वं तद्व्यस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० त्वे घटादेस्तदुपाधिवृत्तिविषयत्वं प्रयोजकमित्यर्थः। ननु चैतन्यवद्वृत्तिरपि यदि प्रकाशस्वभावा तर्हि सैवास्तु
१०९ घटप्रकाशिका किं चैतन्येन जडशक्तिकाचेत्तर्हि वृत्त्यादिनेव तया घटादेरावरणापत्तिरित्याशंकायां वृत्ति
किरणस्य दर्पणसंबंधेनेव ...च्छान्तःकरणसंबंधाच्चैतन्यस्य विषयप्रकाशकत्वमुपपद्यत इत्याह तत्
स्याहीति। नहि घटादेरस्वच्छतया न चभासकत्वे विषयस्यापरोक्षत्वे अभिव्यंजकत्वाभ्युपगमो विरुध्ये
तेत्याह। त्वाकारवृत्तीति चैतन्यम ... भिव्यनक्ती सत्र घटादिकमित्यनुषंगः। ननु परस्य स्वच्छतातत्स्येवान्तः
करणस्य व्यंजकता न तु तत्संयोगिनोपि विषयस्येत्यत आह दृष्टं चेति। ननु घटादेर्न चैतन्याभिव्यंजकत्वे
इंद्रियादेरिव साक्षात्कारणत्वेन व्यंजकत्वात् न चालोकवद्वृत्त्यवच्छिन्नचैतन्यगोचरज्ञानलक्षणतमो
निवर्त्तकतया विषयस्य व्यंजकत्वमिति वाच्यं वृत्तेरेवावरणनिवर्त्तकत्वेनोक्तत्वादित्याशंक्याह। घटादे
रिति। ननु वृत्तिविषयस्य घटादेः कथं वृत्तिसंयोगादिवशादभिव्यंजकत्वं लाघवेन वृत्तिसंबंधस्यैव तत्प्र
योजकत्वोपपत्तेरित्यत आह। एवंविधेति। अन्यथा संबंधमात्रस्यैव चैतन्याभिव्यंजकत्वप्रयोजकत्वे वृत्तेर
परोक्षस्थले बहिर्निर्गमनवैयर्थ्यापत्तेरिति भावः। किंच तत्संबंधमात्रस्य प्रयोजकत्वे परोक्षस्थलेव स्मादे
रपि वृत्तिविषयतया तत्संबंधित्वेनापरोक्षत्वापत्तेः वृत्तिसंयोगस्य प्रयोजकत्वे गुणादिष्वदोष इत्याह। पीतेति। ननु पी एम०
१०५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बंधस्य प्रयोजकत्वेन ग्राहिरूपव्यंजकत्वेपि नापरोक्षत्वं विदाभिन्नत्वस्य विषयगतत्वलक्षणत्वेनोक्तस्य त
त्राभावादित्यत आह। एतन्मतइति। जीवस्य परिच्छिन्नत्वेपि घटाद्यधिष्ठानचैतन्याभिन्नत्वेन तत्तदर्थेसंब त
न्धितया कथं वृत्तेः संबंधार्थत्वमित्याशंक्य किं जीवस्य स्वत एव घटाद्यधिष्ठानत्वात्तद्वृत्तिसंबंधापेक्षा त
दुपादाने चैतन्याभेदाद्वा तत्राद्यं दूषयति तस्य चेति। नहि चैतन्यमात्रं नोपादानं स्यात् तन्निष्कलंकत्वस्य निवि
रोधेन युक्तं चैतन्यस्याप्युपादानत्वादिति शंक्यते। किंत्विति कल्पितबिंबभावमीश्वर एवाचेद्ब्रह्मैव जगदु
पादानमित्याह ब्रह्मैवेति। द्वितीयं तु कल्पितभेदस्य जीवस्य तदुपादानचैतन्याभेदेन वृत्तिं विना संभवतीति
वृत्तिसंबंधापेक्षा दुर्वारेत्याह तथाचेति वृत्तिप्रयोजनमुपसंहरति। एवमिति एवं इंद्रियजमांतःकरणवृ
त्तेर्वस्थाज्ञानावृत्तिनाज्ञानस्वरूपं निरूप्य भावरूपं निरूपयति। इंद्रियाजन्येति। तथा च स्वाप्रत्ययमिंद्रि
याजन्यत्वे तथा पादिनमप्रत्यक्षत्वात्। साक्षात्विधा पादानावृत्तिरविद्यावृत्तिः सा च निःसत्त्वगोचरत्वविधा
गोचरा च। स्वत एव स्वप्नेप्यस्थितानां भवः स्वमहंस्वाप्संनकिंचिदवेदिषमिति तत्तदवस्थास्य बुद्धिरिति निर्विव
क्षितं तत्र घटमहं जानामीत्यविद्यागोचरं परंपरया तदुपादानांतःकरणवृत्तिमाहायजाग्रत्प्रत्ययोनेति
व्याप्तिरित्याह जाग्रदिति। प्रमानुज्ञादिमंतं दूषयति। एतेनेति। चैतन्यात्मकस्य जीवस्य पारमार्थिकमरणत्वमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाधिकं वा नाद्यः अद्वितीयत्वादिश्रुतिविरोधेन तद्योगात् न द्वितीयः जीवस्याविद्योपाधिकत्वपक्षे तद्देहव
टी० व्यापकत्वादेकैकरूपेणोपाधिकत्वे च मध्यमपरिमाणत्वात् उपाधिपरि[illegible]समानपरिमाणस्य घटावच्छि
११० न्नाकाशादेर्दर्शनात् बुद्धेर्गुणेनाणुमात्रः स्सोपाधिकपरिच्छेदश्रवणात् क्वचिदणुत्वश्रवणस्य उ
द्वेयवत्त्वमिवापत्वात् अन्यथाऽणोरणीयानिति श्रवणाद्दान्माऽणोरप्यणुः स्यात् अणुत्वे च त्वस
क्त्वानुपपत्तेश्च शरीरव्यापित्वे त्वाद्यनुभवानापत्तेश्च न चात्मत्वं मणुद्ध्य वृत्तिद्रव्यत्वसाक्षाद्व्याप्य
जातित्वात् पृथिवीत्ववत् मनोऽणुत्वपक्षे मनस्त्वे व्यभिचारात् अनात्मवृत्तित्वस्योपाधित्वात् आत्मा
त्वं नाणुनिष्ठं आत्ममात्रवृत्तित्वात् दीर्घत्वादिवदिति प्रयोगाच्चानन्तस्यात्मनो जीव इति। एवं जीवस्याणुत्व
ह्लादिकं कल्पितं धर्मं निरूप्य संप्रति तस्य पारमार्थिकं रूपं निरूपयति स वेति। नन्वत्र हृदयोपनिषद्ब्रुवच
नेन प्रमाणयति स्वप्नावस्थामिति न चायं शब्दः परमात्मपरः समनन्तरवाक्यविरोधात् तथा ह्यात्मैवास्य ज्यो
तिरित्युपक्रम्य कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः स्वयं पुरुषो जायमानः शरीरमभि
संपद्यमानः पाप्मभिः संसृजते स उत्क्रामन् म्रियमाण इति चोक्त्वा उत्तरत्र स्वयं विहत्य स्वयं निर्माय स्वे
न भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिरित्यादिना स्वप्नप्रकाशस्यैवात्र स्वप्नावस्थामुपदर्श्य ततो वेदान्ताजी ग्रं० ११०

222

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदं शोधपत्रं ज्ञातोऽन्तरे कादम्बोऽज्ञानं कोष्ठे पञ्चमपंक्त्यामिति ज्ञेयं।

+ स्वास्थितिसमानकालीनज्ञानाविषयत्वे सति ज्ञानरूपो न स्यात्। स्वनिष्ठप्रकारकस्वविशेष्यकसंशयादिविषयः स्यात् घटादिवदिति बाधकतर्कसत्वात्। ततश्च जीवः स्वप्रकाशः।। विषयप्रतियोगिनिरूपणानंतरं विषयप्रतिनिरूपणं प्रतिजानीते।। अनुमानेति।। महावाक्येति।। सत्यं ज्ञानमनंतं ब्रह्मेति वाक्यस्यावांतरवाक्यं तत्त्वमस्यहं ब्रह्मास्मि अयमात्मा ब्रह्मेत्यादिवाक्यं महावाक्यं तेन ज्ञातव्या लक्षणया वा तदैक्यं प्रतिपाद्यमित्यर्थः। अनेन चास्य विषयत्वमुक्तं।। अन्याप्रतिपाद्यत्वे सति तस्य सपरिकरप्रतिपाद्यस्य तद्विषयत्वात्।। द्वादशाध्यायी धर्मलक्षिणी मीमांसा विधिवाक्यानामेव तत्र विचार्य धर्मनिरूपणपरा न सिद्धार्थे ब्रह्मपरा तात्पर्यविषयब्रह्मासिद्धिप्रसंगारितत्वात्। वेदांताश्च न विधिपराः तत्त्वमस्यादिवाक्यं जीवेश्वरयोरभेदू तथा च न सत्त्वसिद्धिरिति।। इति शंकते। नन्विति। किंचिदप्रमाणं भेदग्राहि बहुप्रमाणाविरोधात् सत्यसर्वज्ञत्वलस्त्यादीति।। जीवेश्वरौ परस्परं भिन्नौ किंचित्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१..११ क्षणविरुद्धधर्मा[illegible]श्रयत्वाद्दहनतुहिनवदित्यर्थः। तर्हि तत्त्वमस्या
दिवाक्यं न प्रमाणं स्यादित्यत आह॥ तत्त्वमस्यादीति॥ ननु प्रत्यक्षस्य ज्येष्ठ
तया प्रबलत्वेन बाधकमित्यत आह॥ अन्यथेति॥ तर्हि भेदप्रत्यक्षस्या
प्रामाण्यं कथं पुनरभेदप्रामाण्ये बाधकमित्यत आह॥ पाकेति॥ अ
नुमानं च न भेदप्रमापकं नरशिरः [illegible] चानुमानवदागमबाधात् ज्ञेयो
इदं गोधपत्रं शतोत्तरैकादशो[illegible] अनंकपष्ठे पंचमपंक्त्या
मिति बोध्यम्। श्रीराम।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

+ वाक्यवत्तस्योपचरितार्थत्वेनोक्तत्वादित्याशंक्य किं बाधकसत्त्वाद् भेदपरत्वाभावस्तात्पर्यस्य गतिकअगमत्वात् +

वात्मानमेवस्य एष उपस्थापयतीति तथा चास्य जीवात्मात्वमहं ब्रह्मेत्यर्थः। अहो शिरसीति वक्तव्यमनुपपत्तेः तदेतद
भिप्रेत्याह। स्वभावस्याभिधिकस्येति। किंच जीवः स्वप्रकाशचिद्रूपत्वादिहृत्स्वप्रकाशत्वं च सजातीयप्रका
शाप्रकाश्यत्वं न चिद्रूपत्वमसिद्धं तस्य प्रवणादित्याह अत्रभवत्पुरुषस्तिद्योयं विज्ञानघन इत्यिष्ट तिरादिप
दयात्वा। किंच घटज्ञानयोः संबंध आत्मनिष्ठः ज्ञाननिष्ठत्वात् सत्तावत् अपि चआत्मा ज्ञानरूपः आ
त्मामविषयात्मत्वात् ज्ञानवत् न चाप्रयोजकता आत्मायदियाव[illegible]दित्याह अत एवेति। भेदयाहि
ति स्य निर्विरोधं विरुध्यति नाप्यागमं नं तरेति। ननु द्वा सुपर्णेत्यादिवाक्यं प्रतीयमानभेदपरमेवास्तु बाधकाभा
वादित्याशंक्य शास्त्रतात्पर्यपरत्वादुदस्य च प्रत्यक्षादिप्रमाणप्राप्तत्वादनन्यपरत्वमित्याह। लौकिकसि
द्धेति। ननु तत्त्वमस्यादिवाक्यमपि नाभेदपरं प्रत्यक्षा[illegible]नाद्यः प्रत्यक्षस्य यजमानत्वबाधकत्वैवद
भेदे बाधकाभावात् न च प्रत्यक्षादिवाक्यवृत्तेति परत्वं तात्पर्यबाधकं प्रत्यक्षं ग्रहरतिनिर्विविशेषतया
वगतत्वेन प्रत्यक्षस्य सत्तिविषयत्वेपि जीवेश्वरयोर्भेदमन्वयादर्शनेन सत्तिविषयतायोगात् न हि ती
यइत्याह। उपक्रमेति। अर्थापत्तिमाशंक्य निराकरोति। न चेति। संप्रदायमते नाह लक्षणा स्वरूपेति। नन्व
स्तु वाक्येन लक्ष्यस्वरूपमात्रपरत्वं ततः किमित्यत आह। अत एवेति न वेदांतानवब्रह्मपराः पदानां कार्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ११२

न्वितशक्तानुरोधेन कार्यपरत्वे नैव प्रामाण्यावधारणात्। तथा चादित्यो ब्रह्मेति वत्तत्त्वमसीति भेदोपासना
परमिसार्थं कार्यसिद्धेपि संगतिग्रहस्योक्तत्वादिति दूषयन्ति। न चेति। किं च नाभेदोपासना चविधेयोपासी
नेत्यश्रवणात्। तत्त्वमस्यं नेनेच्छा स्यवि। जज्ञाविति ब्रह्मविद्याया एवश्रवणात्। किं च तत्त्वमस्यादिवाक्येनोपा
सनापरं अभयं वेजनकप्राप्तोसि तदात्मानमेवावेदहं ब्रह्मास्मीति स्पष्टार्थकसंतरानुसारेण स्पष्टार्थ
कानेरपि व्याख्यानोचितत्वात् अत एव तं चतुर्विधाकरोतीति वचनं स्पष्टार्थकवचनोत्तरानुसारहाग्नेयवि
षयं व्याख्यातं। न चाहं ब्रह्मेति त्वाभेदोपासनमिति युक्तं श्रवेदिति श्रुतिविरोधात् आत्मानं चेद्विजानीया
दहमस्मीति पूरुषः॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् तत्र को मोहः कः शोक एकत्वमनुपश्य
तइत्येकत्वज्ञानस्यैव श्रुतौ समर्थत्व प्रतिपादनाच्च। जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते तद्ब्रह्मा
हमिति ज्ञात्वा सर्वबंधात्प्रमुच्यते। मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं॥ मयि सर्वं लयं याति तद्ब्रह्माद्वय
मस्म्यहमिति केवल्योपनिषद्वचनाच्च। यदस्थूलमनमहावाच्यमत्र्यमेयमवर्णकं। तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म
संपद्यते ध्रुवमिति विश्वामित्रश्रुतेश्च। अहमेव परं ब्रह्म वासुदेवाख्यमव्ययं इति स्यान्निश्चितो मुक्तो बद्ध
एवान्यथा भवेदिति वराहवचनाच्च। आत्मनोत्मव्यतिरेकेण द्वितीयं योनपश्यति। ब्रह्मभूतः स एवेह दक्षपक्ष राम०

११२

226

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पक्षउदाहृतः इति दक्षस्मृतेश्च सर्वं ब्रह्मतां तरस्यापि निःसमुद्भुचिदात्मने। असकेवेतन्यरूपायमस्येमेवन
मोनमः। इतिवासिष्ठवचनाच्च। अन्यथा तत्त्वमस्यादिवाक्यभेदया हि प्रमाणविरोधेनाभेदप्रामाण्य
राण भावेउक्तश्रुतिस्मृतिपु[redacted]वचनानि बाध्येरन्। तस्मात्सिद्धं तत्त्वमस्यादिवाक्यस्य जीवपरैक्यपरत्वं तदेत
त्सर्वमभिप्रेत्योपसंहरत्येवमिति सप्तमपरिच्छेदः॥ ॥यद्‌दृवगतमिति यद्येनरूपेणावच्छिन्नतयावग
तंतत्थैवस्मृतेतेनरूपेणाचप्रयोजनमित्यर्थः अनागतत्त्वादिकं चावच्छिन्नतयात्वत्वेनानुमा
नात्तज्ञा[redacted]तेनरूपेणाप्यते स्वर्गमेस्यादिति पशुप्रचारादिकं स्विष्टसाधनत्वेनावगतमिच्छाविषयश्चेति
तेन रूपेण प्रयोजनं। तथा च सुखादेरिष्टत्वादिना ऽवगतेः सुखत्वादिनात्मनिबाधदशायां चे
च्छाविरहेपि न दोषः न च पशुप्रचारी नाकथं स्वच्छिन्नत्वपरंपरासंबंधेन स्वच्छिन्नत्वेऽनिप्रसंगादिति वाच्यं
स्वलक्षणसंबंधेन स्वच्छिन्नत्वाभ्युपगमान्न स्वरूपसंबंधस्यापि साक्षात्संबंधत्वात् द्वैविध्यमेवाह। मुख्यमिति
यत्त्वा साधारणरूपेणावगतं सदिष्यमाणं तन्मुख्यप्रयोजनं। अतिरिक्तधर्मज्ञानापेक्षमिष्यमाणं गौणमि
त्यर्थः। तद्‌द्भयं क्रमेणोदाहरति। तत्रेति। सिद्धं तेच सुखस्यद्वैविध्यमित्याह। सुखं चेति। तत्र जन्मप्रसु खं
सातिशयमित्याह। तत्र सातिशयेति। यथा काचिदंतःकरणवृत्तिः सत्त्वगुणजन्यतया चेतन्यगतज्ञानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
११२

शब्दप्रतिबिंबग्राहित्वेन ज्ञानं तथा तादृशी वृत्तिस्तदुत्तानंतरं क्लेशप्रतिबिंबग्राहकत्वात्सुखमिति यत्परिदृश्यते तत्
सांसारिकसुखलक्षणायां वृत्तावन्वयव्यतिरेकाभ्यां स्रक्चंदनवनितादिविषयसंबंधो हेतुः अत एव तत्तारत
म्यात्सुखतारतम्यं अत एव चास्मदादिसुखा[redacted] ग्रज सुखमुत्कृष्टतमो सार्वभौमसुखमुत्कृष्
तरं ततः खंडादि सुखमुत्कृष्टतममिति ननु यथानंदप्रतिबिंबग्राहित्वादंतःकरणवृत्तेरेव तदा संनिहि
तपरिपूर्णानंदस्यापि ग्रहणसंभवेन सर्वमपि सुखमेकरूपं स्यादिति चेन्न परिपूर्णज्ञानवदखंडानंदस्य म
ला विद्यावृतत्वेनेदानीं तदुपायोगात् नन्वस्तु निरतिशयानंदात्मकं ब्रह्म ततः किमिसत आह आनंद
त्मकेति। ननु न ब्रह्मलब्धिर्मोक्षः तस्याः संसारदशायामपि भावात् निरस्तशोकः परिपूर्णानंदो न चा
ऽपीति चेन्न सर्वावश्यकत्वात्तेस्वव्यक्तिरित्यनत तथैव पक्षांतरमाह। शोकनिवृत्तिरिति। अत्र तथेहेत्व विद्यानिवृ
त्तिरित्यर्थः क्रमेण प्रमाणमाह। ब्रह्मेति। तरति शोकमित्सत्र शोकहेतुत्वात्संसेदनाविद्योक्तातरणं चाचतर
न्ति ब्रह्मविद्ब्रह्मैव भवतीति वा निवृत्तिरूपं विवक्षितं ननु सेतुं तीर्त्वेति वच्छोकस्य मन्तृत्वाभावादिति ध्येयं लोकांतरप्रा
प्तिरेव मुक्तिरिति तार्किकाः कल्पयंति तान्निरस्याह। न त्विति। लोकांतरावाप्तेः सुखदुःखाभावात्मतरत्वाभावा
त्स्वतः प्रयोजनत्वाभावादिति भावः। ननु वैकुंठादिलोकविशेषं गतानामानंदाविर्भावो भविष्यतीति चे रामः

११२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

228

ग

ग न्नस्वरूपानंदाभिव्यक्त्यभ्युपगमे लोकांतरगमनवैयर्थ्यात् ननु न लोकांतरप्राप्तिः स्वतो मोक्षः किंतु तत्रत्यवै
षयिकानंदद्वारा स चरितार्थ एवेति न लोकांतरगमनवैयर्थ्यम् इति चेन्न किं स्वैव मुक्तिः उत तत्रत्यवैषयिकानंदः नाद्यः
श्रावण्यकत्वान्मुख्यप्रयोजनत्वाच्च तस्यैव मुक्तित्वौचित्यात् अन्यथा मुक्तेः स्वतः पुरुषार्थत्वाभावप्रसंगात् न
द्वितीयस्त्वाह। तज्जन्मातिवैषयिकानंदस्य मुक्तित्वे तस्य सर्वोदिवत्सातिशयत्वापत्तेर्मोक्षस्य परमपुरुषार्थ
त्वाभावप्रसंगात्। किंचैवं वैषयिकानंदस्य मुक्तित्वे मुक्तिदशायां भेदापत्तेरीयचरत्वस्य सर्वमात्मैवाभूत्तत्केन कं
द्वैतं तु भेदः स्यात् जीवस्य च परस्य च ततः परं न भेदोऽस्ति भेदहेतोरभावतः विभेदजनकेऽज्ञाने नाशमात्यंतिकं
केंगते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीत्यादिवचनविरोधापत्तिः। किंच मुक्तिदशायां शरीराभावेन
वैषयिकानंदानुपपत्तिः तस्य शरीरजन्यत्वनियमात् अत एव स्वर्गे शरीरकल्पनं न चात्रापि तत्कल्पनं
अशरीरं वाव संतमित्यादिश्रुतिविरोधात् किंच न ब्रह्मविदां लोकांतरगमनमस्ति न तस्य प्राणा उत्क्रामंति अत्रैव
समवलीयंत इति श्रुतेः न चार्चिरादिना गमनं श्रूयत इति तद्वचनस्य सगुणोपासकविषयत्वेन ब्रह्मविद्गमनसाभि
धानात् अत एव ब्रह्मविदामपि पंचाग्निविद्योपासकानां अर्चिरादिना गमनं न चैवं ब्रह्मविदां तदनभ्युपगमो वे
तेन प्रतिपाद्यमानाद् इमं मानवमावर्तं नावर्तंत इति अर्चिरादिना गतानाम् पुनरावृत्तिश्रवणात् गोविंदध्येतेति चेद्वाच्यं स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ११२

सगुणोपासकानामर्चिरादिना गतानामप्य इवेणोमाणिविधूयपापमिसादिष्कृ सव गतौ निरस्तसमस्तदोषाणां ब्र
ह्मलोकएव संपादितश्रवणादिसाधनानां तत्रैव ब्रह्मसाक्षात्कारसंपादनेन ब्रह्मणा सह परममृतत्वाभ्युपगमे
नाविरोधात् किंच लोकस्य प्रलयेपि न विनाशसंदेहसोम्पेदमयआसीत्सादिष्कृतिविरोधः विनाशश्रुति
शास्त्रैश्चैव पर्षे। अपि च वैकुंठादिप्राप्तानां सनकादीनां जयविजयादीनां भवावद्धो वारिकाणां ऽनिशापादिना
राक्षसादिदेहप्राप्तिर्न स्यात् न चार्चिरादिगमनस्य परंपरया अपुनरावृत्तिहेतुत्वेन जयविजयादयस्तत्वमन्ते
पिनावर्तेरन्निति वाच्यं नहि जयविजयावर्चिरादिना ब्रह्मलोकं गतौ किंतु वैकुंठाख्यं लोकांतरं नहि तस्यैव
ब्रह्मलोकत्वं प्रमाणापत्तेः सर्गो विश्रमयति पश्चिन्तरति वा काशेषेण कार्यब्रह्माधिष्ठितदेशविशेषस्यैव ब्रह्मलो
कपदेनाभिधानात्। अपि च ब्रह्मवेद ब्रह्मैव भवति ब्रह्मैव सन् ब्रह्माप्येतीत्यादिश्रुतयो वैष्णपिकानेरस्य
मोक्षस्य तत्त्वसामंजस्येनोपपद्येरन् अत एव मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यत इति स्पष्टमेव स्वप्राप्तलं
भगवतैवोक्तं। एकाकिनः सदा ब्रह्मध्यायिनो योगिनो हि ये॥ तेषां तु तत्परं स्थानं यद्वै पश्यंति सूरयः इति विष्णु
पुराणे परं स्थानपदेन ब्रह्मस्वरूपमेवोक्तं। एतेन तत्त्रिकाण्डमते तारतम्यकल्पनमपास्तं। ब्रह्मात्मैकत्व
ज्ञाननिवर्त्यो वा विशेषाभावात्तस्मान्निरस्तसमस्तद्वैतशमभिव्यक्तपरिपूर्णानंदात्माभिन्नं ब्रह्मैव मोक्ष इति निश्च १२०

230

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ + क्रिवदनर्थनिवृत्तिरपि ब्रह्मस्वरूपैव अन्यथाऽद्वैतश्रुतिविरोधात्तद्भावाद्वै तथात्स्यमव + ७

तिस्मृतौ हास्य उरारागन्यायको विदेरभ्युपगंतव्यमिति संक्षेपः। नन्वानंदप्राप्तिरनर्थहेतुत्वविद्यानिवृत्तिर्वा मोक्षइत्य
भ्युपगच्छतस्तव मतेपि तदुभयं सादिस्त्वनादिर्वा आद्ये कृतकत्वेन। अनित्यत्वापत्तौ श्रुतगुनरावृत्तिश्रुतिवि
रोधः द्वितीये मोक्षस्यासिद्धत्वगर्भसाध्यत्वाभावेन तत्साधनश्रवणादौ प्रवृत्तिर्न स्यादिति तांत्रिकः परिचोद
यति नन्विति अभयविधस्यापि मोक्षस्य ब्रह्मस्वरूपतयाऽनादित्वेपि न प्रवृत्त्यनुपपत्तिरित्याह सिद्धस्येवेति। स्व
सिद्धं भ्रमेणेति। लाघवेनेष्टसाधनताज्ञानस्य भ्रमप्रमासाधारणतत्साधनताज्ञानेनैव प्रवर्तकत्वमिति
भावः। अनर्थनिवृत्तिरेव मुक्तिः सा च ब्रह्मस्वरूपातिरिक्तानत्वज्ञानोऽज्ञानासिद्धैव अद्वैतश्रुतेश्च भावाद्वैतप
रत्वात्तन्नहि रोधः इति येषां मतं तेषां मतं दूषयति। अनर्थनिवृत्तिरपीति। आनंदलक्षणमोक्षक्रियामात्रत्वेना र
युक्तत्वादिति भावः। नन्वस्वसाध्येपि मुक्तेस्तत्साधनत्वभ्रमात्कथंचिच्छ्रवणादौ प्रवृत्तिः तथापि कथं पुरुषा
र्थसंसाधकस्येव लोके पुरुषार्थत्वदर्शनेन साध्यत्वस्य पुरुषार्थत्वप्रयोजकत्वादित्याशंक्य किमेतत्पुरुषा
र्थस्य व्याप्यं व्यापकं वा नाद्यः व्याप्याभावेपि व्यापकसत्त्वविरोधाभावात्। दुःखादौ व्यभिचाराच्च। नहि तीयः प्रा
प्तपरिहृत्तानिष्टवाप्तिपरिहारयोरसाध्यत्वेन व्यभिचारादित्याह। लोकेपीति। नन्वसिद्धत्वभ्रमाच्छ्रवणादौ
प्रवृत्तस्य शब्दजन्यपरोक्षसिद्धत्वज्ञानमात्रात्कथं भ्रमनिवृत्तिः कथं वा तन्मूलाविद्यानिवृत्तिस्तदुभयस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरोधिसाक्षात्कारसाधनत्वादिति चेत्तत्वमस्यादिवाक्यजन्यस्यापरोक्षत्वाभ्युपगमात् अत एव तद्धेतुरूपदृष्टांतमाह
टी० यथेति हिरंगपरा अग्र न खे भंजंत इत्यादि मुक्ता मोक्षस्य कर्मसाध्यत्वागमात् ज्ञानकर्मणोः समुच्चय इति येवं
११४ दंति तान चतिनिरावेष्टस्य चेति नान्य इति। तथा च युक्ता उपायांतरप्रतिषेधेन हि रूपहारस्य फलपर्यंतत्व
पि स्वर्गादिफलाभिप्रायत्वान्न दर्शपूर्णमासवत् ज्ञानकर्मणोः फलसमुच्चयः। किंच मोक्षस्य कर्मजन्यत्वे
साध्यत्वे स्वर्गादिवत्तानित्यत्वप्रसक्तेश्च पित्तुना शरीरसंबंधश्च स्यात् अपि च आनंदाविर्भावो मोक्षः आविर्भा
वश्चाविद्यानिवृत्तिः सा च शुक्तिरूप्या दिरूप्ये विरोधिसाक्षात्कारमात्रसाध्यत्वावधारणात् न कर्मत्वसाध्ये
साह। अज्ञाननिवृत्तिरिति। नन्वेवमपि जीवपरैक्यज्ञानेन मुक्तिहेतुर्मोहनाभावात् रतिशोकमात्मविदित्यादेश्च
भेदज्ञानपक्षेऽप्युपपत्तेरित्याह। नैवेति। ननु वाक्यजन्यज्ञानेन नानर्थनिवृत्तिः केतस्य परोक्षत्वनियमादित्यत
आह। नैवेति। न तत्वमस्यादिवाक्यजन्यं वाभेदज्ञानमपरोक्षरूपमेवेति तन्निवर्तकमित्यर्थः। ननु परोक्षज
नकस्वभावाद्वाक्यात्कथमपरोक्षधीरित्याशंक्याह। नैवेति। न तत्वमस्यादिवाक्यादिति साक्षादिति शेषः।
न तत्वमस्यादिवाक्यावगते ब्रह्मणि मनननिदिध्यासनजनितासंभावनानिवृत्तिसहकारिणांतःकरणेन तत्त्व
प्रमाणादेव अपरोक्षज्ञानमुत्पद्यते न तु वाक्यादित्याचार्यैर्वाचस्पतिमिश्रैर्व्याख्यातं तन्मतमाह। मननेति। नतु एन् ११५

232

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करणविशेषायत्तकार्यं न हि कुब्जबीजाद्यवांकुरोत्पत्तिर्दृष्टेत्याशंक्य ब्रह्मस्वरूपपरिच्छेदोक्तमर्थं स्मारयन्ति।
तत्र दृष्टं चार्थोयमिति। शब्दप्रमाणकं यज्ज्ञानमपरोक्षमित्यत्र शास्त्रदृष्टिस्तु उपोद्बलयति। अत एवेति।
यतो वाक्यजन्यज्ञानमपरोक्षमतः शास्त्रदृष्ट्यात्मोपदेशो वामदेववदित्यत्र सूत्रे शास्त्रदृष्टिरिति सूत्रे तत्त्वमसा
तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं शास्त्रदृष्टिशब्देनोक्तमिति संबंधः। ननु यथा ब्रह्मदृष्टिरित्युक्ता
इत्यत्र दृष्टिशब्देनोपासनं तथात्रापि सैव विवक्षिता परोक्षधीरित्याशंक्य अत एव नाधिकरणसंग्रहेण दर्शय
ति। अत एवेति। आर्त्तिर्हि कौषीतकिब्राह्मणोपनिषदि इंद्रप्रतर्दनाख्यायिकायामेतदेवोक्तं वैदेहो दासिरिंद्र
स्य प्रियं धामोपाजगाम युद्धेन च पौरुषेण सा माता तस्यां प्रयते स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृ
तमुपास्स्वेति। तत्र किं प्राणशब्देन वायुरभिधीयते उतेंद्रः उत जीवः परं ब्रह्मैवेति चतुर्विधलिंगसंभवात्च
तुर्विधसंशये इदं शरीरं परिगृह्य उत्थापयतीति वायुविकारप्राणलिंगस्य वक्तारं विजानीयादिति जीवलिं
गस्य मामेव विजानीयादिति इंद्रलिंगस्य आनंदोऽजरोऽमृत इत्यादि ब्रह्मलिंगानां चाप्राबल्यदौर्बल्यविवे
काभावादनिर्णयः। अथवा जीवब्रह्मप्राणास्त्रय एवोपास्याः न चैवं वाक्यभेदो दोषमावहति वाक्यार्थाव
गमपूर्वकत्वात्पदार्थानां चोक्तेन मार्गेण स्वातंत्र्यात्तस्मादुपास्यभेदादुपासनात्रैविध्यमिति पूर्वपक्षे प्राप्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदमुच्यते प्राणस्तथानुगमादिति प्राणशब्दवाच्यं ब्रह्म विजिज्ञेयं पौर्वापर्यालोचनया वाक्यस्य ब्रह्मपरत्वावगमा
टी० त् । उपक्रमे हि तमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति हिततमत्वेन प्राण उपदिश्यते तथोपसं
११५ हारेपि आनंदोऽजरोऽमृत इत्यानंदत्वादिना ॥ न चेदं ब्रह्मणोन्यस्य संभवति जीवप्राणलिंगान्नेति चेन्न तदा
गुणोपनयनेन भव्यत्वात् अन्यथाभिधेयत्वाक्यं न हि संभवत्येकवाक्यत्वे वाक्यभेदः तदाहुर्वाचस्पतिमिश्राः
तस्मादन्यथासिद्धब्रह्मलिंगानुसारतः एकवाक्यत्वे वाक्यभेदः तदाहुर्वाचस्पतिमिश्राः तस्मादन्
यासिद्धब्रह्मलिंगानुसारतः एकवाक्यबलाज्जीवप्राणलिंगोपपादनमिति ॥ तस्मात्प्राणशब्दवाच्यं ब्रह्मै
व तथा चैवं सति प्राणशब्दस्य ब्रह्मपरत्वावगमात्तत्रत्यस्य दृष्टिशब्दस्य नोपास्तिपरत्वं किंतु परोक्षज्ञानप
रत्वं । अत एवोपक्रमगतं मामेव विजानीहीति वचनं संगच्छत इति । ननु विषयविशेषनिबंधनस्य प्रत्य
क्षत्वलक्षणस्य वाक्यजन्यज्ञानेपि सत्त्वाच्छास्त्रदृष्टिसूत्रविरोधाच्च । आचार्यवाचस्पते तत्त्वमस्यादिवा
क्यात्स्याज्ज्ञाने परोक्षत्वोक्तिरयुक्ता इत्याशंक्याह अनेषात्विति । करणविशेषेति । इंद्रियजन्यज्ञानत्वं ज्ञा
नानां प्रत्यक्षत्वमित्यर्थः । प्रत्यक्षत्वस्य विषयविशेषायत्तत्वे सूक्ष्मवस्तुनि परोक्षप्रमाणजन्यज्ञानानां प्रत्य
क्षत्वस्यापि दृष्टयभेदाभावात् न चेष्टापत्तिः तत्रापि प्रत्यक्षत्वव्यवहारविरोधात् अस्मिन्सूक्ष्मवस्तुनि लिपिले राम०
११५

234

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रवा

प्रामाण्ये पश्यामहे इति पिमिति पटुकरणस्य पुनः स्थविरस्य तु करणापाटववतो न पश्यामीति व्यवहार इत्याह एक
स्मिन्निति नन्विंद्रियजन्यत्वं न प्रत्यक्षत्वं मनसोनिंद्रियत्वेन सुखादिप्रत्यक्षापत्तेरतो व्याप्तेरिंद्रियत्वे
चानुमित्याद्यवतिव्याप्तेरिति साशंक्य नहीति। इंद्रियजन्यत्वं प्रत्यक्षत्वं किंतु दीपत्वेन तज्जन्यज्ञानत्वं अनुमि
तिष्वमनस्त्वेन तज्जन्मेति नातिव्याप्तिरत एव मनस इंद्रियत्वाभ्युपगमान्न सुखादिप्रत्यक्षेः व्याप्तिरित्यभि

त्रे

त्याह तथा चेति। नन्वनर्थोपयानयातौपनिषदे ब्रह्मणि प्रमाणांतरनिवृत्तेः अनर्थनिवर्तकापरोक्ष
प्रमितौ तत्त्वमस्यादिवाक्यं करणं कल्प्यते न च मनः करणं इदानीमपि ब्रह्मसाक्षात्कारापत्तेः। इत्यत आ
ह। ब्रह्मेति। मनन एवेति। प्रत्यक्षकरणत्वेन सम्यक् न त्वादि इति भावः। मनसो ब्रह्मसाक्षात्करणत्वे प्रमाणां
तरमाह। मनसैवेति। तस्य मनोगम्यत्वे बाधकमाशंक्य निराकरोति। नैवमिति। अत एवस्यैवद्वैघत्वे
पि तदुपजीव्य उपमानायोपपत्तिवेधत्ववदुपनिषद्वेद्यत्वेपि ब्रह्मणो मननादिसंस्कृतमनउपजीवित्वमनोवेद्य
त्वं न विरुद्धमित्याह। अत एवेति। शास्त्रेति। कल्पतरुकारसंमतिमाह। तदुक्तमिति। अनयो एवमनने मे
व प्रयुक्ते येन प्रयत्नेऽभिमता। तथा हि न तावत्करणविशेषनिबंधनं संविदः प्रत्यक्षत्वं मनस इंद्रियत्वनिराकरणे
न सुखादिप्रत्यक्षे व्याप्तेः। किंतु प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमुक्तं। तस्य च तन्मते मनसः इंद्रियसाम

235

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चि ६

टी० ११६ सन्निकर्षाभावेनांतःकरणस्य बहिर्निर्गमनाभावान्नोक्तदोषः। तथा च ब्रह्मसाक्षात्कारे तत्त्वमस्यादिवाक्यमेव
करणं मननं सेवाद्युपकृतमिति। श्रुतिस्तु तत्सहकारित्वविषया। अन्यथा मनःकरणककामिनीसाक्षात्का
रवत्तस्यानसहकृततज्जन्यतया तस्याप्रमात्वापत्तेः स्वतःप्रमाणाद्वाक्यात् प्रामाण्यमिति च मन्तव्याव
रूपकत्वेनोपनिषद एव हृदयमस्तु न सीति षस्य मानत्वोपपत्तेः तथा च मनोगम्यत्वाभावश्च निरुपित(?)
योः समर्थितो भवतीति न चाप्युज्जीहीनां श्रेयः परिपंथिकल्मषनिबर्हणद्वारेणपयोगः निकेचित्तनानत्वज्ञा
नसत्तिसंभवितस्य कर्मणो निवृत्तत्वेन मुक्तिं प्रति बंधकत्वाभावात् प्रारब्धस्य च भोगैकनाश्यत्वेन यज्ञादि
निर्वहणीयत्वाभावात् तस्मात् कर्मणां मुक्तो विनियोगः किंतु पापनिवृत्तिद्वारा ब्रह्मसाक्षात्कारे सत्त्वविसाहन
श्रुतिः। न च वक्ष्यमाणमाह अत्र एवेति। तमेतमिति। तमेतमात्मानं वेदानुवचनेन यज्ञदानाशकतपोभि
३ र्वेदितुमिच्छंतीति विविदिषासाधनतया वेदानुवचनादीनि विधीयंते तेन तु विदंतीति ज्ञानसाधनतया वक्तः तः प्रधा
नस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वादिच्छायाश्च प्रत्ययार्थतया प्राधान्यात् प्रधानेन च कार्य
संप्रत्ययात् न हि राजपुरुषमानयेति वक्तः ततः प्रधानमपि राजा पुरुषविशेषणतया शब्दतउपसर्जनमानी
यते अपि तु पुरुष एव शब्दतस्तस्य प्राधान्यात्। एतानि च न साक्षाद्विशिष्टाहेतवः किंतु दुरितनिवर्हणेन एम० ११६

236

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षणगुरुषसंस्कारद्वारा यस्यैते चत्वारिंशत्संस्कारा इत्यादिस्मृतेः महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः
ज्ञानगुणघतेऽव संक्षयासापस्यकर्मणः इत्यादिवचनेभ्यश्च तथात्वावगमात् तन्नश्च निरसने नैमित्तिककर्मणि म
ल्ला पकर्षेत्र लक्षणगुरुषसंस्कारद्वारा विविदिषाहेतुत्वस्याचार्यवाचस्पतिमिश्राणां पक्षेण विवरणाचार्या
णां सर्वापेक्षा च कर्माणि तमेतं वेदानुवचनेनेत्यादिना ज्ञानसाधनत्वेन विधीयन्ते न त्विच्छासाधनतया शब्द
तः तथा नाया अपि इच्छायां यज्ञादिसाधनत्वायामानवेदस्य तपसर्जनत्वापि स्वर्गादिवत्साध्यतया प्रा
धान्यतया चभावत्वेनान्वयोपपत्तेः तथा चान्यानुभवक्रमायज्ञादीनां तत्तत्स्वदिशिनीविविदिषः परिणमतन्त्र
निनतु कर्मणां पापनिवृत्तिद्वारा ज्ञानजनकत्वे श्रवणादिवैयर्थ्यं इत्यादिसाशंका नहि कर्मभिः पापनि
वृत्तिस्तथा चाह स ज्ञाननिमित्तिश्रवणादिविवक्षिता किं तु कर्मानुष्ठानात् पापनिरसनात् शुद्धसत्त्वस्य सतिविष
यदोषसंदर्शनसंज्ञातवैराग्यादिसाधनसंपत्तौ श्रवणादिद्वारेत्यभिप्रायात् साह। एवमिनि। न तु श्रवणादिनेव
तज्ज्ञानहेतुत्वं मानाभावादतो नैष सा इष्टश्रवणादिस्वात्प एव च माणत्वात् सत्त्वशुद्धेः सर्वान्वत्सविधि
ष्ठत्वादिति न्यायेन स्वर्गादिफलकल्पनयैव यथैव मीमांसकोक्तोपशमादिसाशंका एतावदेरेवत्वमनन्तत्वमि
स्र्थवादावगतमोक्षसाधनत्वेन बोधितस्य सन्निहितस्यैव ब्रह्मज्ञानस्य फलत्वोपपत्तेर्नोक्ता न स्वर्गादिशरि

237

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ११८ कल्पनावकाशः स्याशयवानाह। मैत्रेयीति। विधानादीति। एतच्च नियमविधिमभ्युपेत्य श्रवणस्य प्रमाणाय
वहितयोग्यप्रमासाक्षात्कारजनकताया अन्वयव्यतिरेकसहकृतत्वस्य स्वसिद्धत्वात् श्रवणविचारोऽपि तत्फलाव
नानादृष्टद्वारा साक्षात्कारहेतुत्वसिद्धेः अदृष्टं विधित्वायोगात्वतत्त्वं न तच्चानियमोऽपि संभवति यावत्सीभाव
त्तथा स्यात् आत्मा वा अरे द्रष्टव्य इत्यस्य च किं विषयनियम आत्मैव श्रोतव्य इति किंवा धात्वर्थनियमः श्रोतव्य
एवेति अयं दृश्यमोहैर्वनिवर्तनाद्यः तरति शोकमात्मविदित्यादिहिंसा आत्मज्ञानस्यैवमो साहेतुत्वावग
मेनात्मविचारस्याप्राप्तेः नापि द्वितीयः मननादिविधिविरोधात ~~[illegible] ज्ञानस्यैवमो[illegible] हेतुत्वावगमेनात्म~~
~~विचारस्याप्राप्तेर्नापि द्वितीयः मननादिविधिविरोधात~~ न चात्मज्ञानाय वेदान्तवाक्यमेव विचारयेदिति। नियम
विध्याश्रयणेन श्रवणवाक्यादिसार्थक्यत्सिद्धिरिति वाच्यं आत्मा वा अरे द्रष्टव्य इत्यस्य हि वेदान्तवाक्यस्य पदार्थ
त्वेनाश्रवणात् अपदार्थनियमनचातिप्रसंगात् बिभेत्यल्पश्रुताद्वेदः मामयं प्रतरिष्यति। इतिहासपुराणाभ्यां
वेदं समुपबृंहयेदिति संभवपर्वणि वेदस्यार्थनिर्णयोपायत्वेनेतिहासपुराणयोरपि विचार्यत्वप्रतिपादनाच्च। किंच श्रव
णं नाम मनात्पर्यावधारणं न तत्कृत्ना मानसी क्रियावा तदुभयमपि शाब्दज्ञानहेतुः तच्च नियमविध्याश्र
यणे श्रवणमेव शाब्दज्ञानहेतुः नान्यदिति स्यात्तच्च न संभवति आकांक्षादेश्च तद्धेतुत्वेन तस्यापि सायोगादस्यत्वा
११८

238

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसिष्याचसिद्धेः। नचैवं श्रवणस्य शाब्दज्ञानहेतुत्वे दर्शनोद्देशेन श्रवणं विधीयत इत्यसंगतं स्यादिति वाच्यं सिद्धां
ते शाब्दज्ञानस्यापरोक्षरूपतया विरोधाभावात्। उक्तस्य श्रवणस्य तात्पर्यविषयकत्वेन परंपरया आत्मवि
षयतया श्रोतव्यदर्शनोद्देशेन विरुध्यते। किंच नचैवं तानां श्रवणादिविधिपरत्वे वाक्यभेदप्रसंगादन्यथा
ब्रह्मपरत्वाभावे ब्रह्मणोऽसिद्धिप्रसंगः ननु सहकार्यंतरविधिः पक्षेणान्तृतीयं तद्वतो विध्यादिवदित्यत्र श्रो
तव्यस्वादिवाक्यानां विधायकत्वांगीकारेन्यतमं दूषितं इति चेन्न [illegible]णेनिवर्हतात्स्वकृतानि श्रवणानां विधि पत्रे ५
नपक्षत्वं जडानां तु सर्वसंगपरित्यागपूर्वकब्रह्मज्ञाने प्रवृत्तिर्न स्यादिति तेषामेव प्रवृत्तिसिध्यर्थं विध्यंगी
करणमिति निरूपितं। अन्यथा पक्षेणेति विशेषणवैयर्थ्यापत्तेः न चात्र वादेवैयर्थ्यं दर्शयं श्रूयमाणोपनिष
दः आत्मायतो मोक्षहेतुः साक्षात्कारसाधनविचारविषय इति प्रकारेणात्मनो विषयत्वे पूर्वस्वर
निवृत्तत्त्वसर्थस्वेनोपपत्तेः। अत एव भाष्यकाराः समन्वयसूत्रे लिंगादयश्रूयमाणा अप्यनियोज्य
विषयत्वात्कुंठीभवंतीत्युक्तं। अत एव च द्वितीयवर्णके टीकाकृतापि एवं किंविधिना स्वयमेव विज्ञानहे
तो पुरुषार्थसाधने प्रवर्तत इति विध्यभावः कंठरवेणांगीकृतः न चैवं विवरणवार्ये निदिध्यासितव्य इति
चात्मप्रतिपादनपरवाक्यैवाक्यभेदाभावापत्तेति परत्वादिति तस्मादर्हार्थे कृत्यप्रत्ययः समभिव्याहारेण प्रदर्शि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० तमायेन श्रोतव्य इत्यादेरप्याहार्यत्वमेवयुक्तं न विधायकत्वमित्यास्तामतिविस्तरः। ननु दर्शन श्रवणादेरपि
११८ ज्ञानजनकतयानानुष्ठेयमित्याशंक्य श्रवणादिस्वरूपं निरूपयति। श्रवणं नामेत्यादिना॥ ननु ध्यानस्य निदिध्या
सनपदवेदनीयस्य ध्येयगोचरसाक्षात्कारणत्वेपि मननश्रवणयोर्नहेतुत्वं ध्यानेन ब्रह्मसाक्षात्कारो
त्पत्तिसमये तयोरभावादित्याशंक्य नहि तेषामेकरूपेण हेतुत्वमिह विवक्षितं किंतु ध्यानस्य साक्षाच्छ्र
वणमननयोस्तु मननिदिध्यासनद्वारेणेत्याह नत्वेति। साक्षादिति। यद्यपि भक्तिमात्रे विशिष्टवे
दांतवाक्यश्रवणस्यैवापरोक्षज्ञाने साक्षात्कारणत्वं तथापि शाब्दज्ञानपरोक्षनियमवादिमते ध्यानस्यैव
साक्षाद्धेतुत्वाभ्युपगमात्तदभिप्रायेणोक्तं। अथवा अनिबद्धब्रह्मापरोक्षज्ञानमेवानर्थनिवृत्तिहेतुः अ
न्यथा तत्त्वमस्यादिवाक्यस्यापरोक्षज्ञानजनकत्ववादिमते मनननिदिध्यासनवैयर्थ्यात् तच्च श्रुति
बंधकनिवर्तकध्यानस्य साक्षात्कारणत्वं न तु श्रवणादीनां तत्र हि शब्दस्येवास्तु प्रधानभावेन
ब्रह्मज्ञाने हेतुत्वं तेषामेकरूपेणाहेतुत्वान्नापि प्रयाजदर्शादिवत् शेषशेषीभावेन श्रुतिलिंगादेस्तत्त्वमा
णस्याभावादित्याशंक्य प्रधानाप्रधानोभयस्मिन्कारणत्वमात्रं विवक्षितमित्याह एतावतेति। ननु तावत्
तीयेति। तृतीयाध्यायनिरूपितशेषत्वलक्षणभंगत्वेनेत्यर्थः। नन्वकारणतायाह कादेवप्रमाणान्मननना रम०

द ११८

240

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेंगत्वमवसीयत इत्याशंक्य प्रधानसाधारणत्वात्तत्फलनिष्पादकत्वमित्यभिप्रेत्याह। नस्येति। अङ्गसाध
भावमेवोपपादयति। तथा हीति। साक्षाद्विनियोजिका श्रुतिर्निराकांक्षत्वात् अनुमानद्वारेण नियोजका लिङ्गादिः सा
शंकां निरस्यति नापीति। न च मनननिदिध्यासनयोः स्वप्राधान्येन प्रकरणाच्छ्रवणांगत्वमवगम्यत इत्या
शंक्याह। विधेहि श्रवणस्य ज्ञानलक्षणफलसाधनत्वेन प्राधान्ये तदाकांक्षालक्षणं स्यात्तदेव तु नास्ति मा
त्र नाभावात्। तथा हि किं दर्शपूर्णमासयोरिव विधिरेकपदश्रवणात् फलान्वयः उत निर्विशेषसामान्यमभि ध्
व्याहारसिद्धसाध्यायां फलउत तदनिमायात्त्वाद्यं निराकुरुते द्वितीयमुत्थापयति। नन्विति। ननु एवं तापि
बहवो यज्ञाविधुरितिवाक्यश्रवणस्य ज्ञानसाधनत्वेन क्रो[illegible]मानेन तथा च श्रवणमेव प्रकरणी प्रमितिः नस्या
पदिश्युपात्त इत्यादोषांतरमाह। किं चेति। विकृतिनिष्ठानि सोपयागादिधिसर्पः। एवं सति प्राधान्याप्राधान्यव्य व्य
देशं समर्थयति। किं तयेति। श्रवणमनननिदिध्यासनानां मध्ये श्रवणं प्रधानकारणं मनननिदिध्यास
ने च तत्सहकारिसंस्थे। न च प्रधानमेव साक्षात्कारणं तथा प्रधानमितिवाच्यं तत्त्वपरविशिष्टवेदान्तावधारणल
क्षणश्रवणस्य प्रमेयावगमं प्रतिकरणत्वेन प्राधान्यात् इदमेव प्राधान्यं प्रथमवर्णके विवरणाचार्यैः उ
चितमित्याह उचितं चेति। न तु ज्ञानसाधनतया श्रवणादिकं नाश्रयत्वेन चाधिकारानिश्चयादिदिके कर्मणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० ११९

तन्निश्चयस्य प्रवृत्तसंगत्वात्। न च नित्यानित्यविवेकवैराग्यशमदमादिसंपन्नोऽधिकारीति वाच्यं शमदमादीनां च
करणेन प्रमाणेनांगत्वावगमेनाधिकारनिमित्तत्वायोगादिति तत्राह श्रवणादिविधिति। उपद्रष्टृणा
मिति मोक्षसाधनब्रह्मज्ञानकामानामित्यर्थः श्रवणादेर्ब्रह्मज्ञानफलकत्वेन तत्कामस्यैव तत्र चाधिका
रोचितत्वात्। उक्तं चैतत्सर्वं समन्वये पंचपादिकाचार्यैः। ब्रह्मज्ञानकामिनेदं शास्त्रमारभ्यमिति। ननु स
र्वाधिकारसमर्थः किं न स्यादित्यत आह। कामस्येति। उपद्रष्टृणामिति यद्यपि मोक्षसाधनब्रह्मज्ञानचिकी
र्षाया एवाधिकारिनिमित्तत्वान्नैव नित्यानित्यविवेकादेर्नांगतोऽविनियोग इति दर्शितं तथाप्युक्तोपमासः
न हि मोक्षमकामयमानं तत्साधनं ज्ञानं कामयते न च नित्यानित्यविवेकादेः फलकामनाहेतुत्वमानाभा
व इति वाच्यं श्रवणविधिप्रकरणे तत्संकीर्तनस्यैवमानत्वादन्यथा संकीर्तनेनैव फलात्। तथाहि सोऽन्वेष
ष्टव्यः इति विधिप्रकरणे तद्यथेह कर्मचितस्तादिना नित्यानित्यविवेकः परीक्ष्य लोकान्कर्मचितान्ब्रा
ह्मणादिना चरहाभ्यामर्थे फलभोगविरागः शांतो दांत उपरतस्तितिक्षुरिति च शमादिर्दर्शितः विजिज्ञास
स्वेति विचारविधिप्रकरणे चतुर्णामपि नरमुपसत्तारेति प्रसंततश्चते हि जिज्ञासार्थे स गुरुमेवाभिगच्छे
दिति च गुरूपसदनं दर्शितं। न च तत्त्वं च फलश्रुतेनैषां फल एव नियोगः स्यादिति वाच्यं शमादिषु फलाश्रुतेरर्थ ११९

242

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वादृत्वेन कामनोत्पादनद्वारा मुमुक्षोरधिकारप्रदर्शनार्थत्वेन वा फलश्रुतेरुपपत्तेः। तदुक्तं विवरणाचार्यैः
सर्वत्र च फलश्रुतयः कामनोत्पादनद्वारेण मुमुक्षोरधिकारप्रदर्शनार्था इति शमदमादिशब्दानभेदेन वा
चष्टे अंतरिंद्रियैर्यसादिना। अत्र संन्यासिनामेव ब्रह्मविद्यायामधिकारः स चापरमशब्दं प्रमाणयंतः स
न्यासयोगाद्यतयः शुद्धसत्वा इति श्रुतिनात्र पि श्रमादेरूपत्वलयंतः संन्यासिनिः श्रोत्रियं ब्रह्मनिष्ठम्
सादिश्रुतिजनकरे स्वचक्षसिद्धानां ब्रह्मविचारप्रतिपादिकामात्स्यापि कां गृहस्थोपि विश्वस्तत इति स्मृतिं
चाच्छादयंत स्तदुपात्वलतया च स्वाश्रयस्कंमोक्षाश्रम नामधेयादिकं प्रत्याभासं वदंतो गृहस्थादिक
तसास्ताग प्रणाममाचेण स्वात्मानमधिकं मन्यमाना ब्रह्मविचारे गृहस्थादीनामधिकारं ते गुप्त प्रदेष्य मा
त्रेणा केचिद्दूषयंति तेषां मतमाह। अत्रेति अत्र परमशब्दार्थः संन्यासस्ततः किंभूता शंका
रा संन्यासतु मुमुक्षार्हो विचाराधिकारनिमित्तत्वात्संन्यासिनामेवाधिकारः सिध्यतीत्याह। तथा चेति। किं
मुपरमशब्देन शक्तया संन्यासावगमः उतार्थात् लक्षणया वा नत्राद्यः निरूढसिद्धौ यंनिरस्यति विक्षेपानि
ब्रह्मविचाराविरोधिविषयानर वा संगाभावस्य गृहस्थेष्वपि केषुचित्संभवेन तस्य संन्यासानुमापकत्वायो
गादि सर्थः। तृतीयं दूषयति जनकादेरपीति नयोच यह स्यादे ब्रह्मविचारप्रतिपादकपूसंतरविरोधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० १२० न्नलक्षणाकल्पनमितिभावः। ननुश्रमुमुक्षासंपादकानां नित्यानित्यविवेकादीनामाश्रमिमात्रसाधारण
त्वेनाधिकारनिमित्तस्य मुमुक्षुत्वस्यापि सर्वसाधारणत्वात् आश्रमिमात्राधिकारिकमेव श्रवणा
दिविधानमित्याह। सर्वाश्रमेति। ननु मोक्षसाधनब्रह्मज्ञानाय श्रवणादीनि कर्तव्यानीत्युक्तं तदयु
क्तं सगुणोपासकानां हिरण्यगर्भलोकं गतानामकृतवेदान्तश्रवणानामपि तत्रैवोत्पन्नमुक्तिश्रवणादित्या
शंक्य किमेतावता ब्रह्मसाक्षात्कारस्य व्यभिचारं चोदयसि उत श्रवणादेः नाद्यः नान्यः पंथा विद्यतेऽय
नायन कर्मणा न प्रजया धनेनेति च श्रुतिनिषेधेन युज्यतादिवेद्वसगुणोपासनस्यापि साक्षात्कृतिहेतुत्वाभ्यु
वादिसंभिप्रेतसिद्धितीयं हृदयंति। सगुणेति। चित्तैकाग्र्यलक्षणनिदिध्यासनद्वारा सगुणोपासनमपि
ब्रह्मसाक्षात्कारहेतुरित्यर्थः ननु सगुणविषयं तदुपासनं तत्कथं निर्गुणसाक्षात्कारोपयोगि अन्यविषय
स्यापि हेतुत्वेऽतिप्रसंगात् वागपि वैराग्यादिसंपन्नस्य इहैव श्रवणमनननिदिध्यासनसंभवेन तत एव त
त्साक्षात्कारोपपत्तौ सगुणोपासनद्वारा निदिध्यासनगौरवं चेत्याशंक्य कल्पतरुकारोक्तं समाधानमाह ममु
क्तमिति। यहिविषयपिकफलाउपरागरहितभवांतरउपचितकर्मजनितचित्तवैमल्यतया अनात्सुको ना
गोचरं उत्सार्य तेनिह्रुषि त्वं चित्तं विषयेभ्योपकृष्य तेनेनिर्विशेषं ब्रह्म ध्यातुमीशते तत्राधिकारिणः किंतु रा०म० १२०
दृ

244

येऽनादिदुर्वासनाजनितविषयांतरविक्षेपवशगत्वात्प्राणपाते निर्विशेषब्रह्मध्यानमशक्ततया तत्त्वसाक्षात्का
रेऽसमर्थास्त एवमंदा निरूपितसगुणोपासनास्वधिकारिणस्तथा चाधिकारिभेदात्तेपासनाद्वैविध्य
मिति भावः। आद्यदोषं निरस्यति। वशीकृतेति। एषां सगुणोपासकानां मनसि सगुणब्रह्मध्यानाभ्यासाद्ब्रह्म ह्म
ण्यपवलिष्ठे रक्ते सति निरुपाधिकस्यापि ध्यानसंभवे न तद्ध्यानं निरुपाधिकतया साक्षात्कृतं भवतीत्यस
र्थः। तथा च विषयभेदाभावान्नातिप्रसंग इति भावः। ननु सगुणोपासनया वशीकृतचित्तानां निरुपाधिक
ब्रह्मध्यानादिहैव साक्षात्कारः स्यादुक्तं तथा सति प्रारब्धकर्मक्षये सत्येव विदेहकैवल्यापत्तेरुपासका
नां कार्यब्रह्मणा सह मुक्तिरित्यभ्युपगमविरोध इत्याशंक्य न हि सर्वेषामुपासकानामिहैव ब्रह्मसाक्षात्कार
इति ब्रूमः किंतु निश्चिततात्पर्यवेदांतावगततदनुकूलानुमानेन च संभावितं निर्विशेषं ब्रह्म सगुणोपास
नया वशीकृतमनस्कतया ध्यातुं समर्थास्तेषामेव निरुपाधिकध्यानाभ्यासजनितब्रह्मसाक्षात्कारे सत्या रा
रब्धक्षये सत्येव मुक्तिरन्येषां त्वकृतब्रह्मविचाराणां सगुणोपासकानां ब्रह्मलोकं गतानां तत्रैव
साधितश्रवणादिसाधनानां साक्षात्कृतब्रह्मभावानां कार्यब्रह्मणा सह मुक्तिरित्यभिप्रेत्याह। सगुणोपा
सकानां चेति। उपासकानां केन मार्गेण ब्रह्मलोकगमनमित्याकांक्षायामाह। अर्चिरादीति। तत्राग्निवा
ख्या भादयोगंतृणंनेतारः सोऽर्चिरादिमार्गस्तथा च श्रुतिः स एवंवेद यानेपथानेनासावग्निलोकमागच्छ

245

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०
१२१

तिसवायुलोके सवरुणलोकमिति। तेर्चिषमभिसंभवंतीति। ननु पथायामं जिगमिषुं प्रतिकिंचिन्मार्गचिह्नमेवोपदिश्यते
अचेतनत्वात् अर्थवादः चिरादयो मोगभूमयो लोकशब्दश्रवणादिति चेन्न। अर्चिरादेर्मार्गचिह्नत्वे भोगभूमि
त्वे वा गंतृणां गमयितृत्वाभावे न गमनानुपपत्तेः नच स्वातंत्र्येण गमनं मूर्छितादिवृत्तस्य सपिंडीकृतत्वात्तेषामर्चि स्मा
रमानवा रश्मिस्वामिकं चाप्त इति तन्न वायुस्वामिकं च यतो वायुनेत्य संभवं गंतव्यं तथा चाहुराचार्या वायुस्पति
मिश्राः। सपिंडीकरणं नं हि सूक्ष्मदेहवतां गतेः।। नस्वातंत्र्ये न चास्मादेर्नेतारो चेतनास्त्वेवेति। ननु विद्याभेदेन
गमनहूयेस नित्रगुणविद्यावतामर्चिरादिमार्गेणाविशेषोक्तिः प्रसते। न च निर्गुणविद्यावतां मार्गोस्ति। साशंकाऽ
एपकर्मिणां मार्गांतरस्य दृष्टत्वात् दृपेक्षया मार्गविशेषकीर्तनमित्याह। कर्मवतामिति। धूमेतीतेधूमं संभवंति
धूमाद्रात्रिमित्यादिरूकृतिरिविभावः। पितृलोकं गतानामिति। यद्यपि कर्मिणां मार्गविशेषजिज्ञासायां तत्की। तं
नेमवयुक्तं तथापि चसंगात्तेषामुपभोगभूनरकादिकीर्तनमत एव वक्ष्यति इत्यत्वं प्रसंगाद्गतप्रपंचेने
के ति। दुष्कृतकारिणां तु नधूमादिना चिरादिना वा मार्गेण गमनप्रसक्तिः किंतु येन केनचित् कुत्सितेन मार्गे
ण भयंकर दुःखेन नरकविशेषप्राप्तनमित्याह। इति विद्यानुधापिनां विति। ननु निर्गुणविद्यावतां पिगतिरंगीका
याविद्यात्वाविशेषात् सगुणानं ब्रह्मगमयतीस मानवं पुरुषस्य परं ब्रह्मगमयिष्टत्वश्रवणात् नचेदं ब्र
ह्मपदं कार्यब्रह्मपरं न तं सकस्य परामिन्नेव ब्रह्मणि रूढस्य मुख्यार्थत्वसंभवे गौणकल्पनकार्यपरत्वा ए.म०
१२१

246

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगात्। किंचेदं ब्रह्म परं परं ब्रह्मपरमेव तत्स्वकरणे श्रूयमाणत्वादिति सत्यमाह निर्गुणोपि। अयं भावः न तावत्परं
ब्रह्म प्राप्यं तस्य सर्वात्मकस्य सर्वदा प्राप्तत्वात्। न च प्राप्तत्वभ्रमात्प्राप्तमेव प्राप्नोतीति साधनं। न तद्वदस्या
दिवाकल्पनस्य साक्षात्कारस्याकं नाहं शब्दसंभवेपि तद्युक्तस्तदसंभवात्तस्मादगत्या कार्यब्रह्मण एव कथं
चिद्ब्रह्मशब्दवाच्यं यत्तत्संप्राप्य मानवः पुरुषः सगुणोपासकानामेव लोकान्तवर्तिकार्यब्रह्म प्रापयतीति स
स्वरूपेयनदादुर्गहरा चार्यवाचस्पतिमिश्राः कार्यस्य प्राप्तिद्वित्वात् प्राप्त प्राप्यरोगतिः। प्रापयेत्परं ब्र
ह्म प्राप्तत्वाज्जगदात्मकमिति। न हि साक्षात्कारवतः स एव विदेहकैवल्यं स्यादिति शंकते किंचेति। ओमि
ष्टो मोदिस्वर्गस्यैहिकशरीरेणैव मोक्षस्य प्रारब्धकर्मणा प्रतिबंधात्तन्नाशानंतरमेव विदेहकैवल्यमित्याह।
यावदिति प्रारब्धं कार्यं युगकल्पादिपर्यंतमप्युपभोक्तव्यमस्तु स्वादिरूपेयेनन त्वारब्धकर्म यथा वसिष्ठा
दीनां पौरोहित्यादि प्रापकं कर्म तत्त्व प्रक्षिप्त प्राप्य जन्मभेदेन विनश्यतीति किं तु कर्तव्यं सकलभोगसम्पन्नो घेव शा
म्यतीत्यर्थः। ब्रह्मसाक्षात्कारवतः प्रारब्धकर्मावस्थानमाक्षिपति। नन्विति। श्रुतिसिद्धं भोगाप्रारब्धकार्मा
णां देहपातक्षणावधित्वं तीक्ष्णावगमेन। क्षीयंते चास्य कर्माणीति। सामान्यश्रुतेरनारब्धकार्यकर्मविना
शपरत्वादनारब्धकर्मणामेव स्वकृतदुष्कृतकर्मणां विद्यासामर्थ्याद्धि नाशस्साह। तस्येति। अन्यथा देवरी णि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८।० हिरण्यगर्भमनुष्ठानकल्पभुक्तीनां ब्रह्मसाक्षात्कारवतां सद्योनजीवितम्भवेत्। अथ येनैवेष्टं आनिरूढीहास्यपरो
१२७ भूतत्वज्ञता महाकल्पसमर्थो न जीविनात् नरवेनेमहर्द्धिघः न ब्रह्मविदः ब्रह्मविदस्मात्सपरएपशमामनु यो
वदिति भवतीति संभवति। तस्मादागमात्तसारेण प्रारब्धकार्याणां सत्वपि तत्वमस्यादिसाक्षात्कारे ऽवस्थानेपत्तमि
ति भावः। ननु यदि तस्य तावदेव चिरं यावदिति प्रारब्धकर्मावस्थानप्रतिपादकश्रुतिः स्मृतरुवशास्त्रीयं तेन प्राप
कर्माणीति सामान्यश्रुतेरनारब्धकार्यपरत्वं। नहि यथा पुष्करपलाशम् आपो न श्लिष्यन्ते एवमेवं हास्य सर्वे पा
प्मानः प्रदूयन्ते इति विशेषश्रवणात्सामान्यवचने पापकर्मविशेषउपसंहरणीयं किंच धर्मस्य स्वर्गादि
निबंधनतया शास्त्रीयेण ब्रह्मज्ञानेन विनाशो युक्तः धर्मब्रह्मज्ञानयोस्तु शास्त्रीयत्वेन ज्योतिष्टोमदर्श
पूर्णमासवदविरोधान्नोच्छेद्योच्छेदकभावः अन्यथा तस्य फलस्यापि धर्मस्य नाशे स्वर्गादिसाधनत्वप्र
तिपादकज्योतिष्टोमदर्शपूर्णमासवाक्यस्याप्रमाणापत्तिः तस्मादुक्तमेवसंचितकर्मज्ञानविनाश्य
मित्याशंक्यं नहि पापस्य संचितपापत्वमुक्तं विधानिवर्त्सत्वं किंतु। नन्विदसाः विधानिबंधनत्वमुक्तं तु
क्तेन त्वत्कृतेप्यविशिष्टं उभयोर्वैषम्यगते तरतीतिश्रुतेः सुकृतदुष्कृते तपोरुभयोरपि ज्ञानविवर्त्सत्वश्रव
णादेवं हास्य सर्वे पाप्मानः प्रदूयन्ते इत्यादिश्रुतिरपि सुकृतदुष्कृतनाशपरत्वात् इष्टव्योयोगश्चापि पुण्ये राम०
१२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिपाप्मशब्दः। तथा उत्तरपापे प्यकर्म्मसर्वे पाप्मानो निवर्तन्ते तस्य यत्तत्त्वं सकृतदुष्कृतभेदेन द्विविधमपि ब्रह्म
ज्ञाननिवर्त्यमित्यभिप्रेत्याह संचितमिति। त उच्चारीति। यद्यपि सर्वात्मकस्य ज्ञानिनः स्वदृष्टिविभागो ना
स्ति तथापि ज्ञानपूर्वकालाभिप्रायेण परदृष्ट्या वा तत्तत्संभवादिति बोध्यं। ननु ब्रह्मज्ञानादज्ञाननिव
र्त्तौ न ज्ञानामीति व्यवहारस्तन्निबंधनसंचितकर्मनिवृत्तिप्रसंगात्सर्वस्यातो विशेषाभावप्रसंगाच्च त
न्निवृत्तौ जीवन्मुक्तस्य देहादिप्रपंचोऽनुपपन्नः इति चोदयति। नन्विति जीवन्मुक्तानां तत्त्वसाक्षात्कारसा
रमार्थिकत्वव्यवहारकत्वसंपादनपटीयः शक्तिविशिष्टाज्ञानविनाशेपि प्रतिभासकत्वसंपादनपटी
यः शक्तिविशेषविशिष्टाज्ञानस्यापि निवृत्तेर्देहादिधारणमुक्तमित्यभिप्रेत्याह। नाप्रतिबंधेति। नन्वस
र्वबाधेपि प्रभयकंपानुवृत्तिवज्जीवन्मुक्तस्याविद्यासंस्कारवशाद्देहादिप्रपंचोस्तु किं शक्तिविशिष्टा
ज्ञानकल्पनागौरवेण शक्तिभेदमानाभावाच्चेति चेन्न। अविद्योपादेयदेहादिप्रपंचस्य तन्निवृत्तावस्थानायो
गात्। न च तत्त्वज्ञानोत्तरकालीनदेहाद्यविद्यासंस्कारस्योपादानं नाविद्येति वाच्यं संस्कारस्यापि भावकार्य
त्वादुपादानावश्यंभावेन ससोपादानत्वस्य सत्यत्वापत्तेः। तेनाविद्याया एवोपादानत्वेन तन्निवृत्तौ संस्का
रस्याप्यनुपपत्तेः सर्पादिभ्रमबाधेपि भयकंपानुवृत्तिर्न भ्रमसंस्कारादिनानंतरमपि स्मरणात्तु सम्भवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

टी० १२३ स्तोऽस्यतावत्कालस्थायित्वपातावत्पर्यन्तं भयाद्यनिवृत्त्यापत्तेः किन्तु सर्पभ्रमजनितभयप्रयुक्तकम्पादिवैषम्य
विशेषादिवद्वानन्तरं वैषम्यं च कर्मानुसारेण यावत्कर्मस्थायीति कल्पनेनैनोन संस्कारवशाज्जीवन्मुक्तस्य
देहादिप्रपंचः किन्तु शक्तिभेदविशिष्टाज्ञानात् न च शक्तिभेदे मानाभावः कार्यबलेनैव तत्कल्पना
त्। तथाहि। यथा विक्षेपावरणात्मककार्यद्वयबलेन तद्द्वयत्वं शक्तिद्वयं कल्प्यते तथेहापि त्रयं अश्रु
तवेदान्तानां प्रपंचे पारमार्थिकत्वभ्रमः श्रुतवेदान्तानाम् अनुत्पन्नब्रह्मसाक्षात्काराणां व्यावहारिक
भ्रमः उत्पन्नब्रह्मसाक्षात्काराणां प्रातीतिकभ्रमः जनकयाज्ञवल्क्यप्रह्लादकोद्धवप्रह्लादप्रभृती
नां यावद्देहपातं प्रतिभासकत्वभ्रमः इत्यविद्यायास्त्रयः शक्तयः स्वीकार्या एतदभिप्रायेण तुच्छाऽनिर्वचनी
या वास्तविकी च त्रिधा मता। मायास्तेया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैरिति प्राचीनैरुक्तं अत एव शा
स्त्रेण नश्यति पारमार्थिकत्वभ्रमः नश्यति चापरोक्षाद्व्यावहारिकत्वभ्रमः प्रारब्धनाशात्प्रातिभासि
कभ्रमनाश इति शक्तित्रयस्य नाश उक्तः। तथा च श्रुतिः। तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चा
न्ते विश्वमायानिवृत्तिरिति सर्वशक्तिविशिष्टाज्ञाननिवृत्तिरित्यर्थः। ननु कस्यापि तत्त्वभावे प्रकृते वाम
देवादि मुक्तिघटितपादकस्मृतिस्तु निर्विरोधः इत्यत आमनन्तान्तरस्मात् अत्र परोक्षेति। ननु लाघवसहकृ
तानुमानानुगृहीतानां मत्सिस्यैकवचनश्रुतीनां विरोधान्नाविद्यानानात्वं मायाभिरिति बहुवचनश्रुति राम० १२३

250

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्याह वो

त्तदुनशक्तिभेदमादायै[illegible]पपन्नानवोक्तदोषभयान्नानात्वं वक्ष्यमाणरीत्या तद्दोषनिरासस्संभवादित्यस्वरसात्स
माधानांतरमाह। अन्ये त्विति। एकशक्तेर्न सर्वशक्तिरिति नन्वस्य चकारवचनेनापि हठयनिपञ्चन एवेति
।नन्वेवं तत्त्वज्ञानमन्यपरकल्पतामित्यत आह। नत्विति। तथा चेकशक्तेः सर्वशक्तिरित्यभ्युपगतावचेदधिकर नय
टी॰ णाविरोधो दुर्वारः। यतो[illegible]निं न ज्ञएकाविद्योगतृ नानाश[illegible]भ्युपगन्तृमते त्वेकशक्तेः सर्वशक्तिरेव इयमा
१२४ स्थे वरणशक्तिनिवृत्तावयं नेत्तच नियामकाभावेन ब्रह्मसाक्षात्कारात्सर्वावरणशक्तिविशिष्टाऽविद्याविनाशा
वश्यंभावादित्याशंक्य यथा शुक्तिसाक्षात्कारात्सकलबले नैकावरणशक्तिविनाशः यथा सर्वज्ञानचा
गभाववृत्तिस्वरूपयोग्येन ज्ञानेन नकस्यचिदेव ज्ञानाभावस्य निवृत्तिरेवमन्यानं च प्रपंचोपलंभानुरोधेन यस्य
ब्रह्मज्ञानं तदीयानर्थनिवृत्तिहेत्वावरणशक्तिरेव नाशः चानन्दीयसंस्कारहेत्वावरणशक्तीनामिति मव
स्यापपद्यत इत्यत आह तस्मादिति परिच्छेदचतुष्टयार्थं निगमयति तदेवमिति। प्रमा इति लिखितं सत्तत्प्रमा
द्दालस्य दोषतः। तस्मात्तत्संबन्धेः सद्भिक्ष्यमाहि विदुषां धनं सुवर्णं विना कापि कृतिरेषा मया कृता विदुषाम
त्क्वेदान्तशिखामणिरत्नं किमु॥ ॥ अनेन मत्प्रबन्धेन वेदान्तार्थावलंबिना गुरुकारुण्यलब्धेन नारकं ब्र
त्तनुष्पन्तु वदेहं वदनीयानां वयाचामर्चीश्वरः॥ कामिताशेषकल्पालकल्पनावेल्लवल्लरी इति श्रीमद्भर ॥ ॥ राम॰
राजाध्वरीन्द्रात्मजरामकृष्णाध्वरिविरचिते वेदान्तशिखामणौ विषयपरिच्छेदश्चतुर्थः॥ १२४

K K S U LIBRARY RAMTEK 441 106 Dist. Nagpur M-1675

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.09.20 15:07
,TRANSFERRED=2020/09/24 at 15:44:31
,PAGES=251
,TYPE=STD
,NAME=S0003714
,Book Name=M-1675-VEDANT PARIBHASHA TIPPAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection